सागरिका

त्रैमासिकी

[दशमवर्षे चतुर्थाङ्कः]

२०२९

विश्व-संस्कृतसम्मेलन-विशेषाङ्कः

संपादकः

डॉ० रामजी उपाध्यायः

सागरविश्वविद्यालये

संस्कृतविभागस्य प्राध्यापकाध्यक्षः

[भारतवर्षम्]

मूल्यं १० रूप्यकाणि

प्रकाशिका
संस्कृतपरिषद्
सागरविश्वविद्यालयः,
सागरम् [म० प्र०]

देयम्

प्रत्यङ्कम्	३ रूपकाः
वार्षिकम्	१० रूपकाः
वस्त्रावरणसहितवार्षिचतुरङ्काणाम्	१२ रूपकाः
आजीवनग्राहकस्य	१५० रूपकाः
अङ्कनिर्गमनम्	आषाढ-आश्विन-पौष-चैत्र-(जून-सितम्बर-दिसम्बर-मार्च) मासेषु

मुद्रकः
श्रीशिवनरायण उपाध्यायः
नयासंसारमुद्रणालयः
भदैनी
वाराणसी—५

अभिनन्दनम्

अभिवादनं प्राच्याः

प्राची स्वशुद्धनिटिले निज-रक्त-सिन्धून्
सोढ्वापि राक्षसबलानि मलानि कृत्वा।
स्वातन्त्र्य-कुङ्कुम-विशेषकमादधे यत्
तस्याभिवादनमिमे वयमालपामः ॥

स्वागतं तपोधनानाम्

'अस्मिँस्तपोमहति भारतवर्षनाम्नि
तीर्थे समागतवतां विदुषां वराणाम् ।
ब्रूतेऽभिनन्दनवचो दशवर्षदघ्ना
निघ्ना भवन्मतिषु 'सागरिका' ऽस्मदीया ॥

या भारती जगति 'संस्कृत'—नामधेया
सा भारतीयजनतैकपरायणा नो ।
तस्याः पयांसि मधुराणि पिबन्ति सर्वा
आशाः, दुहन्ति निखिला अपि तां वसिष्ठाः ॥

नो तत्र सिन्धुपरिखा गिरिमेखला वा
प्रत्यूहमाचरति सार्वजनीनतायै ।
नो तत्र जाति-तनु-वर्ण-वयो-धनादि-
रेखाः समादधति भेदधियं वराकीम् ॥

ये केऽप्युपासत इमां हृदयेन विश्वं
विश्वात्मभावविशदाः सुपथेन नेतुम् ।
स्युः केऽपि ते, शिरसि तच्चरणारविन्द-
धूलिं दधाति मखधूलिमिवैष देशः ॥

अस्मिन्नङ्के

छायानाटकम्

डॉ० रामजी उपाध्यायः

[छायानाटके छायानामभिनयः स्यादेवेति भ्रान्तिवशादद्यावधि कतिपयविद्वांसो दूताङ्गदादीनां छायानाटकत्वं सन्दिहन्ति । छायानाटके कस्यचित् पात्रस्य मायामयी छाया प्रतिकृतिः (shadow) प्रयुज्यते, अतएव छायानाटकं नाम सार्थकं भवतीति पर्यालोचित लेखकेन]

किं नाम छायानाटकमित्यस्मिन्विषये विदुषां विप्रतिपत्तिर्दृश्यते । तद्यथा दूताङ्गदादीनि छायानाटकानि सन्ति न वेति प्रश्नं समाधातुं चिरकालादेव विपश्चितां विमर्शो विपथे जागर्ति । एतेषु रूपकेषु छायाभिनयः (Shadow-play) भवतीति सिद्धान्तितं पिशेल-ल्यूडर्सादिमहाभागैः ।[1] डा० डे महोदयः स्पष्टमेवाभिप्रैति 'यद्यपि किन्नाम छायानाटकमित्यतिनिगूढमस्ति,तथापि छायाभिनय-(Shadow play) सिद्धान्तो नितरां निराधार एव । नैतेषु किमपि छायाभिनयस्य लक्षणं प्रतीयते' इति[2] छायाभिनयो वस्तुतो वैदेशिकी रीतिः । एतस्य प्रमुखं लक्षणमधोनिर्दिष्टम्—

(१) श्रोतृशालारङ्गमञ्चयोर्मध्ये काचित् तिरस्करिणी नीचैरुपरि प्रसार्यते ।

(२) नाट्यवृत्तिपराणि पात्राणि तिरस्करिण्यास्तले छायाद्वारेण प्रतिबिम्बी-

---

१. दूताङ्गदे छायाभिनयो वर्तते इति मतं प्रतिपादयन्ति—

R. Pischel, Das altindische Schattenspiel in SBAW, 1906, pp. 482-502; H. Luders, Die subhikas in SBAW, 1916; p. 698 f; sten konow, Op, cit, pp 89-90; Winternitz, GIL, III, p. 243 (also in ZDMG; LXXIV, 1920, p. 118 f)

2. While the counotation of the term Chaya nataka itself is extremely dubuious, the shadow-play theory, however, appears to be entirely uncalled for and without foundation, and there is hardly any characteristic feature which is not otherwise intelligible by purely historical and literary considerations. History of Skt. Lit. P. 501.

क्रियन्ते ।[1]

एतानि लक्षणानि दूताङ्गदादिषु न संगम्यन्ते छायानाटके छायापदस्यौचित्यमन्यत्र गवेषयन् कीथमहोदयो राजेन्द्रलालमित्रस्यैतद्विषयकं मतमुद्धरन्नाह—नाटकाङ्गानामभिनयस्यान्तराले कदाचित् दूताङ्गदस्याभिनय उद्दिष्ट आसीत् । एतस्य हेतोर्नाटकस्याभिनयार्थं संक्षिप्तिश्छायारूपेण सम्पादिता ।[2] 'दूताङ्गस्य वास्तविकं काव्यरूपं निर्धारयितुं किमपि तत्त्वमेतस्मिन् पुस्तके नास्त्येव इति कीथस्यापि मतम् ।[3]

अतो हि नाम छायानुसन्धेया । छायानाम्नः संकेततत्त्वानि दूताङ्गदे सन्त्येवेति प्रतिपाद्यतेऽस्माभिः ।

छायापदस्य सार्थकता

तद्यथा भासस्य प्रतिमानाटकं विद्यते, तथैव सुभटस्य छायानाटकमस्तीति निश्चप्रचमेव । प्रतिमानाटके दशरथस्य प्रतिमायाः किञ्चिदभिनवमायोजनं कृतम् । एतस्याः प्रतिमाया माहात्म्यं विशदयितुमेव नाटकस्य नाम प्रतिमानाटकं कृतम् । अनया दिशा कुन्दमाला नाम कुन्दमालाया माहात्म्यं स्पष्टयितुं वर्तते । उत्तररामचरिते सीतायाश्छायाया अभिनवायोजनस्य लोकप्रियत्वं वा माहात्म्यं वा विशदयितुं तृतीयाङ्कस्य नाम कविना छायाङ्क इति निर्धारितम् । तदनुसारं छायायाः किमपि विशिष्टमेव महत्त्वं दूताङ्गदे वर्तते ।

दूताङ्गदे छायाविधानम्

दूताङ्गदे छायाया बोधार्थं प्रथमं तावत् पौराणिकी छाया प्रकल्पनीया वर्तते । छाया तु संज्ञायाः प्रतिरूपा सती सूर्यस्य पत्नी बभूव । संज्ञा सूर्यस्य

---

1. A play in which the actors appear as shadows cast upon a screen placed between the stage and the auditorium, The Oxford English Dictionary.

2. It is natural to suggest, as did Pishel that the Dutangada of subhata, which is styled a Chayanataka, really was shadaw play. On the other hand, Rajendralalamitra suggested that the drama was perhaps simply intended as an entr-acte, and this may be justified on the interpretation of the term of drama in the form of a shadow : i. e. reduced to the minimum for representation in such a form. sanskrit Drama p. 269.

3. Ibid. p. 269

तापमसहमाना पत्नीत्वे स्वकीयां प्रतिरूपां छायां नियुज्य पितुर्गृहमगमत्। कालान्तरे सूर्यस्य छायायां त्रीणि अपत्यानि बभूवुः। पश्चात् सूर्यश्च समाज्ञात्तं यादियं मम पत्नी संज्ञा नास्ति। सा छायाप्रतिरूपा एव संज्ञायाः।[1] अनेन प्रकरणेन छायायाः प्रतिरूपत्वं प्रमाणितम्। इदमेव प्रतिरूपत्वं छायानाटकस्य विशिष्टं लक्षणमिति प्रतिपाद्यमस्माकम्।

दूताङ्गदे सीतायाश्छाया मायामैथिलीति पुरस्कृता वर्तते। यदाङ्गदो रावणं सीतायाः प्रत्यावर्तनाय कथयामास, तदा तेन प्रहस्तद्वारा मायामैथिली प्रयोजिता। सा मायामैथिली प्रहस्तेन सह रावणसमीपं रङ्गमञ्चे आगच्छति। नाटकानुसारं तु—

(ततः प्रविशति प्रहस्तेन सह मायामैथिली)।

मैथिली—जयतु जयत्वार्यपुत्रः। (इत्यभिदधाना रावणोत्सङ्गमारोहति)

रावणः—(स्वगतम्) साधु, भो मायामयि, साधु जानासि दशकण्ठमाराधयितुम्।

अङ्गदः—(सविषादमात्मगतम्) अपि नाम जानकी पण्याङ्गनाचरितमाचरेत्। भवतु विलोकयामि तावत्।

रावणः—देवि, विदेहनन्दिनि, प्रतिबोध्यतां रामप्रहितोऽयं शाखामृगः।

मायामैथिली—(अङ्गदं सबहुमानमवलोक्य) वत्स, अङ्गद, मम वचनैः प्रतिबोधय राघवम्—

एषामुपरि कस्मात् खिद्यसे राघव तद् व्रज निजं नगरम्।
दत्ताहं निज हृदये साक्षीकृत्य मदनमेतस्मै॥ २८

अपि च

मयि रावणाङ्कपङ्कजविलासहंस्यामद्य रघुनाथः।
राक्षसभटैर्भञ्जितभरतं भूषयतु निजराज्यम्॥ २९

अङ्गदः—(कर्णौ पिधाय) न खलु भवति जानकी यतः

अश्रुतपूर्वाविनया पर्याप्तालंकृता च शीलेन।
सा राघवस्य पत्नी पुनाति भुवनानि गङ्गेव॥ ३०

---

१. The Practical Sanskit-English Dictionary ग्रन्थे छाया। शब्दकल्पद्रुमानुसारं च छाया सूर्यपत्नी : सा संज्ञाप्रतिकृतिः। यथा मत्स्यपुराणे ११.५

अनेन छायाविधानेन दूताङ्गदस्य छायानाटकं नाम प्रसिद्धम् । अन्यत्रापि सर्वेषु तेषु छाया-नाटकेषु छायाविधानं वर्तते । तथाहि—हनुमन्नाटकं महानाटकं वा छायानाटकमिति संज्ञितम् । तदनुसारं

रावणः—महान्तं प्रपञ्चमुत्पाद्य नूनं जानकीमनुभविष्यामीत्यवधार्य—

भेरीनिःस्वाणशंखध्वनिगणतुरगस्यन्दनस्फीतनादैः
सानन्दं राक्षसेन्द्रः कटकभटभुजास्फालकोलाहलेन ।
लङ्कामापूर्य रामः स्वयमभवदथो मायया रावणस्य-
च्छिन्नान् मूर्ध्नो दधानः शिरसिरुहभरेष्वेकतः पंच पंच ॥ १०.१८

एवंविधो भूत्वा पुनरशोकवनिकां प्रविश्य रावणः

लङ्काभटोऽथ रघुनन्दनवेशधारी
पापो जगाम पुरतो जनकात्मजायाः ।
नाम्नापि यस्य कुल इच्छति तस्य रूपा-
दन्याङ्गनापहरणे न मनः कदाचित् ॥ १०.१९

जानकी—(रघुनन्दन-वेषधारिणं तमालोक्य) सहर्षं—

साक्षादालोक्य रामं झटिति कुचतटीभारनम्रापि हर्षा—
दुत्थायोदस्तदोर्भ्यां दरचलितकुचाभोगचैलोन्नताङ्गी ।
त्वं मामालिंग्य खेदं जहि विरहमहापावकः शान्तिमेतु ॥ १०.२०
(इत्यालिंगितुमिच्छति)

रामवेषधारी रावणः—(सविषादम्)

भूत्वा ततोऽप्यवसरे जनकात्मजायां
लङ्कापतिर्मकरकेतुशरातुरायाम् ।
क्लीबो विशीर्णमणिदण्डयुतः स्मरार्तः
पापात्ततः शिवशिवान्तरधीयत द्राक् ॥ १०.२१

अस्मिन् प्रकरणे स मायया राम एव बभूव । यतो हि नाम रहस्यं जानन्त्या सरमया विज्ञापिता सती सा 'नायं रामोऽपितु रावणः' इति तथ्यं व्यजानात् ।

पुनश्च महानाटके सीतायाः प्रतिरूपं प्रयोजितं वर्तते । तद्यथा

सभयं रणसंकटमुपलभ्य सप्रपञ्चम्—

पापो विरच्य समरे जनकस्य पुत्रीं
हा राम राम रमणेति गिरं गिरन्तीम् ।
खड्गेन पश्यत वदन्निति रे प्रवीरा
मायामयीं शिवशिवेन्द्रजिदाजघान ।। १२.१३

द्विधाकृतां तां पुनराददानो मायारथस्थोऽम्बरवर्त्मना च ।
ब्रह्मोपदेशात् स निकुम्भिलाद्रेर्न्यग्रोधमूलावटमाजगाम ।। १२-१४

राम :—समरचत्वरे

दृष्ट्वा मायाजनकतनयाखण्डनं रामचन्द्रो
गुर्वामुर्वीतलमुपगतो दीर्घमासाद्य मूर्च्छाम् ।
तत्पादाग्रे पुनरनुजनिश्चेतनां प्राप्य रामं
कृत्वोत्सङ्गे स्मरसि न गिरो व्याहरन्नित्यरोदीत् ।।१२-१५

छायानाटकस्योपर्युक्तं लक्षणमविजानन्नेव डेमहाभागः छायानाटके छायाभिनयस्य (Shadow play) वर्त्तनमावश्यकं मन्यमानो भ्रान्तिवशात् सिद्धान्तयति—महानाटके किमपि तत्त्वं नास्ति येनैतस्य छायानाटकत्वं प्रमाणितं स्यादिति ।[1]

मेघप्रभाचार्येण स्वोपज्ञे धर्माभ्युदये नाटके [2]पुत्तलकाभिनयोऽभिनवप्रयोग इति लोकप्रीत्यर्थं प्रयोजितः । पुत्तलकस्यापि प्रतिरूपत्वात् धर्माभ्युदयस्य छायानाट्यप्रबन्ध इति ख्यातिः कविना समारोपिता । धर्माभ्युदये प्रतिरूपवत्पुत्तलकप्रयोगोऽस्ति, अतएव च छायानाट्यप्रबन्ध इति तस्याभिख्या वर्तते । अनया दिशा दूताङ्गदादीनां मायामैथिली-प्रयोगेण छायानाटकमिति नाम समीचीनमस्ति ।

---

1. Nor can the origin of the Mahanataka be sought in the far-fetched hypothesis of the shadow-play, the very existence of which in ancient India is not yet beyond doubt. We have here no description of the work as a Chayanataka, as we have in the case of Dutangada and some other plays; and there is nothing in the work itself, in spite of its irregularities, to show that the composition was intended or ever used for shadow-pictures. Hist. of Sanskrit Lit. p. 507.

२. तत्र रङ्गनिर्देशो वर्तते—यमनिकान्तराद् यतिवेषधारी पुत्तलकस्तत्र स्थापनीयः ।

उल्लाघराघवं छायानाटकमिति तस्य लेखकेन सोमेश्वरदेवेन पुष्पिकायां निर्दिष्टम् । तद्यथा,

इति कुमारसूनोः श्रीसोमेश्वरदेवस्य कृतावुल्लाघराघवे च्छायानाटके चतुर्थोऽङ्कः समाप्त, इति ।

नाटकेऽस्मिन् मायासीतां निर्माय तस्याश्च शिरो विलूनं कृत्वा रावणस्तां रामस्य समक्षं मृतामदर्शयत् ।

छायानाट्यम्

धर्माभ्युदयं छायानाट्यप्रबन्ध इति लेखकेन मेघप्रभाचार्येण निर्दिष्टम् । तत्र नायकस्यच्छाया पुत्तलकरूपेणाभिनयार्थं प्रयोजिता । तस्मिन् युगे चित्रद्वारेणापि नाट्याभिनयः प्रयोजित आसीत् । तद्यथोल्लाघराघवे सप्तमेऽङ्के प्रमाणितं सोमेश्वरदेवेन प्रसङ्गतो वृकमुखकार्पटिकयोः संवादमुखेन । तद्यथा—

वृकमुखः—सखे, कियदप्यन्तर्गतं मया रामलक्ष्मणयोः स्वरूपं स्वामिनो मनोविनोदाय पत्रपट्टे विन्यस्तमस्ति तदवलोकयतु । (इति पट्टमर्पयति)

कार्पटिकः—(गृहीत्वा विलोक्य च) साधु महामते, साधु ।

छायानाट्यानुसारेण मनोहरमिदमालिखितं भवता । (इति वाचयति)[1]

प्रकरणेऽस्मिन् रामलक्ष्मणयोरन्तर्गतं स्वरूपमभिनयात्मकमेवेति सुव्यक्तमेव । चित्रपट्टेषु कृतानां नायिकानायकादीनां प्रतिरूपात्मकाभिनयस्यायोजनात् छायानाट्यत्वं प्रसिद्धमिति प्रतिभाति ।

---

१. राम :— सवैलक्ष्यम्) प्रिये श्रूयताम् । इह हि—

मायाकृतामपि मृगाक्षि मृतिं त्वदीयां
सत्यां विदन् न सहसैव मृतोऽस्मि यस्मात् ।
व्रीडाजडस्तदहमेष मृषानुरक्तः
शक्तो न दर्शयितुमात्ममुखं पुरस्ते ।

सीता—अज्जउत्त एसो वि जणो इत्थ समाणावराह ज्येव ।

राम :—(विमृश्य) प्रिये कदाचिदस्मदीयमपि कृतविलूनं शिरस्तवाग्रे वैदुरात्मनिर्दर्शितं भविष्यति ।

प्रतिरूपस्य त्रैविध्याच्छायानाटकानि त्रिविधानि स्युरिति प्रमीयते। तद्यथा--

(१) मायाद्वारेण प्रमुखपात्राणां प्रतिकृतयो रङ्गमञ्चे नियोजिता आसन्। अभिनयकाले प्रेक्षकास्ताः प्रतिकृतीर्मूलपात्रेभ्योऽभिन्ना अमन्यन्त। एतादृशी योजना हनुमन्नाटके, उल्लाघराघवे, दूताङ्गदे च वर्तते।

(२) रङ्गमञ्चे प्रमुखपात्रस्य प्रतिरूपं पुत्रकद्वारेण स्थापितम्। एतादृशी योजना धर्माभ्युदये वर्तते।

(३) तथा च प्रमुखपात्रस्याभिनयात्मकं प्रतिरूपं रंगमञ्चे चित्रद्वारेण पुरस्कृतमासीत्। तदेतदुल्लाघराघवस्योल्लेखेन प्रतीयते।

कथावस्तुनि प्रतिरूपस्य (छायायाः) आयोगाच्छायानाटकत्वं सार्थकमभवत् न तु छायायाः (Shadow) अभिनयस्य तत्र व्यपेक्षया।

महाकविहरिचन्द्रस्य धर्मशर्माभ्युदयम्

श्रीपन्नालालः साहित्याचार्यः

धर्मशर्माभ्युदयस्य प्रत्येकसर्गस्यावसाने दत्तैः पुष्पिकावाक्यैरेकोनविंशतितमसर्गस्य ९८-९९ श्लोकाभ्यां रचिते षोडशदलकमलबन्धे सूचितेन 'हरिचन्द्रकृतं धर्मजिनपतिचरितम्' इति पदेन, तस्यैव सर्गस्य १०१-१०२ श्लोकाभ्यां निर्मिताच्चक्रबन्धान्निर्गतया —

'आर्द्रदेवसुतेनेदं काव्यं धर्मजिनोदयम् ।
रचितं हरिचन्द्रेण परमं रसमन्दिरम् ॥

इत्युक्त्या, तस्यैव च सर्गस्य १०३-१०४ श्लोकाभ्यां निर्मितचक्रबन्धान्निर्गतेन 'श्रीधर्मशर्माभ्युदयः हरिचन्द्रकाव्यम्' इत्युल्लेखेन सिद्धमस्ति यद्धर्मशर्माभ्युदयस्य रचयिता महाकविर्हरिचन्द्रो वर्तते । कोऽयम् ? कस्यासौ पुत्रः ? इत्यस्य परिचयो धर्मशर्माभ्युदयस्यान्ते प्रदत्तया प्रशस्त्या प्राप्यते ।

उक्तप्रशस्त्या ज्ञायते यन्नोमकवंशस्य कायस्थकुले समुत्पन्नयोरार्द्रदेवरथ्याभिधानयोर्दम्पत्योः पुत्रोऽयमासीत् । प्रशस्तेः पञ्चमश्लोकेन महाकविना स्वस्यानुजस्य लक्ष्मणेति नाम सूचितम् । यथा हि भगवान् दाशरथिर्भक्तेन शक्तेन चानुजेन लक्ष्मणेन निर्व्याकुलीभूय समुद्रस्य पारं गतवान् तथा महाकविहरिचन्द्रोऽपि तथाविधेन स्वानुजेन लक्ष्मणेन निर्व्याकुलीभूय शास्त्रसागरस्य परं पारं प्राप्तवान् ! कविनेत्येतत्तु लिखितं यद् गुरोः प्रसादान्मदीया वाणी निर्मलाभवत् किन्तु, स गुरुः क इति नोल्लिखितम् । काव्यस्य प्रतिपाद्यपदार्थानां वर्णनेन प्रतीयते यदयं दिगम्बरजैनधर्मानुगोऽभूत् ।

हरिचन्द्रनामानोऽनेके विद्वांसः

'कर्पूरमञ्जरी'-नाटिकायां महाकविराजशेखरेण प्रथमयवनिकाया अनन्तरमेकस्य विदूषकेण[1] हरिचन्द्रकवेरुल्लेखः कृतः । एकस्य हरिचन्द्रस्योल्लेखो बाणभट्टेन 'श्रीहर्षचरिते' कृतः[2] । एको हरिचन्द्रो विश्वप्रकाशकोषस्य कर्ता

१. विदूषकः—(ऋज्वेव तात्किं न भण्यते, अस्माकं चेटिका हरिचन्द्रनन्दिचन्द्र कोटिशहालप्रभृतीनामपि सुकविरिति)

२. पदबन्धोज्ज्वलो हारी कृतवर्णक्रमस्थितिः ।
भट्टार हरिचन्द्रस्य गद्यबन्धो नृपायते ॥

महेश्वरस्य पूर्वजश्चरकसंहितायाष्टीकाकारः साहसाङ्कनृपतेः प्रधानवैद्य आसीत्। परन्त्वेषां सर्वेषां धर्मशर्माभ्युदयस्य कर्त्रा हरिचन्द्रेण साकं कोऽपि सम्बन्धो न सिध्यति। यतो हि धर्मशर्माभ्युदयस्यैकविंशतितमे सर्गे जैनधर्मस्य यद्वर्णनमस्ति तद् यशस्तिलकचम्प्वाश्चन्द्रप्रभचरिताच्च प्रभावितं वर्तते। अतस्तस्य कर्ता सोमदेवाद् आचार्यवीरनन्दिनश्च परवर्ती भवेन्न पूर्ववर्ती। यदा च कर्पूरमञ्जर्याः कर्ता राजशेखरः श्रीहर्षचरितस्य च कर्ता बाणभट्टः पूर्ववर्ती वर्तते। जीवन्धरचम्प्वाः [1]प्रस्तावनायां जीवन्धरचम्प्वा धर्मशर्माभ्युदयस्य च तुलनात्मकान्युद्धरणानि दत्त्वा मयैतत्साधितं यद् धर्मशर्माभ्युदयस्य कर्ता हरिचन्द्र एव जीवन्धरचम्प्वा अपि कर्ता विद्यते। जीवन्धरचम्प्वाः कथानकं यत्र वादीभसिंहसूरेः क्षत्रचूडामणेर्गद्यचिन्तामणेश्च समाप्तं तत्र गुणभद्राचार्यस्योत्तरपुराणादपि तत्प्रभावितं वर्तते। अतो हरिचन्द्रो गुणभद्रात्परवर्ती सिध्यति। सार्धमेवात्र भावकस्याष्टानां मूलगुणानां वर्णनं कृतं तद् यशस्तिलकचम्प्वा रचयितुः सोमदेवस्य मतानुगुणं विद्यते ततोऽपि सोमदेवात्परवर्ती सिध्यति। सोमदेवेन यशस्तिलकचम्प्वा रचना १०१६ विक्रमाब्दे कृता। धर्मशर्माभ्युदस्यैका प्राचीना पुस्तिका पाटणस्य 'संघवीपाड़ा' इत्येतस्य पुस्तकभाण्डारे १२८७ विक्रमाब्दस्य लिखिता विद्यते[2]। एतेन निश्चीयते यत् महाकविर्हरिचन्द्र उक्तसम्वत्सरात् पूर्ववर्ती वर्तते। इत्थं पूर्वापरावधिसमीक्षणेन ज्ञायते यदयं ११-१२ विक्रमशताब्द्या विद्वानस्ति। धर्मशर्माभ्युदयोपरि कालिदास-भारवि-माघानां काव्यशैल्याः प्रभावो लक्ष्यते। कालिदासस्येन्दुमतीस्वयंवरवर्णनमनुसृत्य हरिचन्द्रेण धर्मशर्माभ्युदये प्रभावत्याः स्वयंवरवर्णनं कृतम्। भारवेः शैलीमनुसृत्य राजनीतेर्जलक्रीडायाश्च वर्णनं विहितं। माघस्य शैलीमनुश्रित्य च स्वयम्वरयात्राया विन्ध्याचलस्य च वर्णनं कृतम्। प्राक्तनकवीनां शैल्या अनुसरणेऽपि धर्मशर्माभ्युदये सर्वत्र कविप्रतिभाया विलक्षणश्चमत्कारो दृश्यते।

महाकविहरिचन्द्रस्यान्याः कृतयः—

महाकविना हरिचन्द्रेण रचितेषु ग्रन्थेषु धर्मशर्माभ्युदयं तस्य निर्भ्रान्ता कृतिरस्ति। जीवन्धरचम्प्वा विषये स्व० नाथूराम प्रेमीत्येतस्य मतमासीत्

---

१. भारतीयज्ञानपीठवाराणसीतः प्रकाशिता जीवन्धरचम्प्वाः प्रस्तावना (पृष्ठाः ३७-४०)

२. द्रष्टव्या, 'संघवीपाड़ा' इत्येतस्य पुस्तकभण्डारस्य सूची, गायकवाड-ग्रन्थमालया प्रकाशिता, बड़ौदा ९१७ ई०।

यदेषा कृतिः कस्याप्यन्यस्य कवेरस्ति, परन्तु यदा मयोभयोस्तुलना......
लिखिता जीवन्धरचम्प्वाः प्रस्तावना तत्समीपे प्रेषिता तदा तेन तयोरेककर्तृकत्वं स्वीकृतम्। आग्लेन विदुषा डा० कीथमहाशयेनापि हरिचन्द्र एव जीवन्धरचम्प्वाः कर्ता स्वीकृतः। धर्मशर्माभ्युदयं जीवन्धरचम्पूश्च द्वे अपि कृती मया सम्पादिते भारतीयज्ञानपीठात् प्रकाशिते। उभयोरपि कोमलकान्तपदावली विविधालंकारचातुरी च पाठकानां हृदयं बलादाकर्षति। तत्र

धर्मशर्माभ्युदयस्य काव्यवैभवम्

पण्डितराजजगन्नाथेन काव्यस्य प्राचीन-प्राचीनतरलक्षणानां समन्वयं कुर्वता स्वकीये रसगङ्गाधरे काव्यस्य लक्षणं लिखितम्—

'रमणीयार्थप्रतिपादकः शब्दः काव्यम्'

इति। रमणीयार्थप्रतिपादकशब्दसमूह एव काव्यमस्तीति तदर्थः। सा च रमणीयतालंकारेण, अभिधया, लक्षणया, व्यञ्जनया वा प्रकटिता स्यात्। केवलैः सुन्दरशब्दैः, केवलैः सुन्दरार्थैश्च काव्यं काव्यं न कथ्यते, किन्तूभयोः सयोगेनैव काव्यं निगद्यते। महाकविना हरिचन्द्रेण धर्मशर्माभ्युदये शब्दार्थयोरुभयोरपि सुन्दरः संयोगः संस्थापितः। संदर्भेऽस्मिन्नेते श्लोकाः संप्रेक्षणीयाः:—

अर्थे हृदिस्थेऽपि कविर्न कश्चिन्निर्ग्रन्थिगीर्गुम्फविचक्षणः स्यात्।
जिह्वाञ्चलस्पर्शमपास्य पातुं श्वा नान्यथाम्भो घनमप्यवैति ॥१४॥
हृद्यार्थवन्ध्या पदबन्धुरापि वाणी बुधानां न मनो धिनोति।
न रोचते लोचनवल्लभापि स्नुही क्षरत्क्षीरसरित्नरेभ्यः ॥१५॥
वाणी भवेत्कस्यचिदेव पुण्यैः शब्दार्थसंदर्भविशेषगर्भा।
इन्दुं विनान्यस्य न दृश्यते द्युत्तमो धुनाना च सुधाधुनी च ॥१६।

उक्तसंदर्भस्य तात्पर्यमिदमेवास्ति यद् धर्मशर्माभ्युदये शब्दार्थयोरुभयोरेव सुन्दरः संयोगो विद्यते।

उपमालंकारापेक्षयोत्प्रेक्षालंकारः कविप्रतिभां विकसिततमां विदधाति। प्रेक्षेऽहं यद् धर्मशर्माभ्युदयस्य मध्य उत्प्रेक्षालंकारस्य धारा महानद्याः प्रवाह इव प्रारम्भादारभ्यान्तं यावत् अजस्रगत्या प्रवाहिता वर्तते? उपमा, रूपकं, विरोधाभासः श्लेषः, परिसंख्या, दीपकोऽथान्तरन्यास इतिप्रभृतयोऽलंकाराः पदे पदेऽस्य शोभां वर्धयन्ति। यथा

श्लेषः (१।१०)

लब्धात्मलाभा [1]बहुधान्यवृद्ध्यै निमूलयन्ती घन[2]नीरसत्वम् ।
सा मेघसंघात[3]मपेतपङ्का[4] शरत्सतां संसदपि क्षिणोतु ॥

उत्प्रेक्षा (१।६३)

संक्रान्तबिम्बः स्रवदिन्दुकान्ते नृपालये प्राहरिकैः परीते ।
हृताननश्रीः सुदृशां चकास्ति काराधृतो यत्र रुदन्निवेन्दुः ॥

क्षरच्चन्द्रकान्ते प्राहरिकैः परीते च राजभवने प्रतिफलितमण्डलो मृगाङ्क एवं भाति यत्सुलोचनानामास्यलक्ष्म्या अपहारकत्वापराधेन काराधृतस्तेन च रोदितीव

अन्योऽपि (२।३६)

[5]प्रयाणलीलाजितराजहंसकं विशुद्धपार्ष्णि विजिगीषुवत्स्थितम् ।
तदंघ्रिमालोक्य न कोपदण्डभाग् भियेव पद्मं जलदुर्गमत्यजत् ॥

रूपकोपमयोः संमिश्रणम् (२।५९)

अनिन्द्यदन्तद्युतिफेनिलाधरप्रवालशालिन्युरुलोचनोत्पले ।
तदास्यलावण्यसुधोदधौ बभुस्तरङ्गभङ्गा इव भङ्गुरालकाः ॥

श्लेषोपमा (४।२३)

स्वस्थो धृतच्छद्मगुरूपदेशः श्रीदानवारातिविराजमानः ।
यस्यां करोल्लासितवज्रमुद्रः पौरो जनो जिष्णुरिवावभाति ॥

यस्यां नगर्यां नगरवासिजन इन्द्र इव शोभते यतोहि यथेन्द्रः स्वस्थः— स्वः स्वर्गे तिष्ठतीति स्वस्थो वर्तते तथा नगरवासिजनोऽपि स्वस्थः—स्वस्मिन् तिष्ठतीति स्वस्थो नीरोगो विद्यते। यथेन्द्रश्छलरहितस्य गुरोर्बृहस्पतेरुपदेशं धरति तथा नगरवासिजनोऽपि निश्छलगुरोरुपदेशं धरति। यथेन्द्रः श्रीदानवाराति-

---

१. शरत्पक्षे बहुधान्यानां वृद्ध्यै सतां संसदः पक्षे बहुधा-अनेकधा अन्येषां वृद्ध्यै ।

२. शरत्पक्षे घनेषु मेघेषु नीरस्य सत्त्वं पक्षे घनञ्च तत् नीरसत्वं च घन-नीरसत्वम् ।

३. मेघानां घनानां समूहं शरत्पक्षे, मे मम अघसंघातं पापपुञ्जं सतां संसदः पक्षे ।

४. अपगतकर्दमा शरत्पक्षे, अपगतपापा सतां संसदः पक्षे ।

५. प्रयाण प्रकृष्टगमनं पक्षे युद्धाय प्रस्थानं तस्य लीलया जिता राजहंसका हंसविशेषा येन पक्षे राजश्रेष्ठा येन तम् ।

विराजमानः—श्रीसंपन्नेन दानवारातिना-उपेन्द्रेण सुशोभितो भवति तथा नगरवासिजनोऽपि श्रीदानवारा लक्ष्मीदानसलिलेन + अतिविराजमानो विशोभितो विद्यते। यथा चेन्द्रः करोल्लासितवज्रमुद्रः—करे वज्रायुधधारको विद्यते तथा नगरनिवासिजनोऽपि करधृतहीरकाङ्गुलीयकोऽभवत्।

अर्थान्तरन्यासः (७।५३)

स वारितो मत्तमरुद्द्विपौघः प्रसह्य कामश्रमशान्तिमिच्छन्।
रजस्वला अप्यभजत्स्रवन्ती रहो मदान्धस्य कुतो विवेकः॥

यथा मदनोद्रेकनिपीडितः कश्चित्प्रतिषिद्धोऽपि बलात्कामखेदमपनिनीषू रजस्वला अपि स्त्रियः सेवते तथा देवानां मदोन्मत्तमतङ्गजसमूहो वारितो—जलात्स्वकीयश्रमशान्तिमभिकाङ्क्षन् रजस्वला पङ्किला अपि नदीरभजत्। अत्र मदान्धस्य विवेकाभावो हेतुत्वेनार्थान्तरतया न्यस्तः।

परिसंख्या (२।३०)

निशासु नूनं मलिनाम्बरस्थितिः प्रगल्भकान्तासुरते द्विजक्षतिः।
यदि क्विपः सर्वविनाशसंस्तवः प्रमाणशास्त्रे परमोहसंभवः॥

यदि मलिनाम्बरस्य—मलिनाकाशस्य स्थितिरासीत्तर्हि निशास्वेवासीत् नतु तत्रत्यमनुष्येषु मलिनाम्बराणां मलीमसवस्त्राणां स्थितिरासीत्। यदि द्विजक्षतिर्दन्तक्षतिरासीत् तर्हि प्रगल्भकान्तानां प्रौढकान्तानां सुरते संभोग एवासीत्, न तु तत्रत्यमनुष्येषु द्विजक्षतिर्ब्राह्मणादिघात आसीत्। यदि सर्वविनाशसंस्तवो निखिलवर्णानां लोपस्य प्रसङ्ग आसीत् तर्हि क्विप्प्रत्ययस्यैव न तु तत्रत्यमनुष्येषु कस्यचित्सर्वस्वनाशोऽभूत्। परमोहसंभवः परमस्य निर्बाधत्वेन समुत्कृष्टस्य ऊहस्य तर्कस्य संभवो यद्यासीत्तर्हि प्रमाणशास्त्रे न्यायशास्त्र एवासीत् नतु तत्रत्यमनुष्येषु परमोहस्य अत्यधिकमोहस्य, अन्यजनमोहस्य वा समुत्पत्तिरासीत्।

विरोधाभासः (२। ३०)

महानदीनोऽप्यजडाशयो जगत्यनष्टसिद्धिः परमेश्वरोऽपि सन्।
बभूव राजापि निकारकारणं विभावरीणामयमद्भुतोदयः॥

स राजा जगति महानदीनो महासागरोऽपि सन् अजडाशयो जलरहितोऽभवत्, परमेश्वरोऽपि सन् अणिमाद्यष्टसिद्धिरहितोऽभूत्, राजा चन्द्रोऽपि

सन् विभावरीणां रात्रीणां निकारकारणं दुःखकारणमभवदिति विरोधः। परिहारपक्षे स राजा महान्-अत्युदारः अदीनः— दैन्यरहितः, अजडाशयः प्रबुद्धाशययुक्तो बभूव। परमेश्वरोऽपि सम्पन्नोऽपि न नष्टा सिद्धिर्यस्य तथाभूतोऽभवत्। राजा नृपतिः सन् अरीणां विभौ शत्रूणां स्वामिनि निकारकारणं दुःखकारणमजायत।

धर्मशर्माभ्युदयस्य कौतुकावहस्थलानि—

काव्यमिदमनेकैः कौतुकावहैः स्थलैः परिपूर्णं वर्तते। महाकाव्यस्य लक्षणे लिखितं—'क्वचिन्निन्दा खलादीनां सतां च गुणकीर्तनम्'। एतदनुसृत्य प्रायो गद्यपद्यात्मकेषु काव्येषु निखिलेष्वपि सज्जनप्रशंसाया दुर्जननिन्दायाश्च-प्रकरणानि निहितानि, परन्तु धर्मशर्माभ्युदयस्यैतत्प्रकरणं (प्रथमसर्गस्य १८-३१) संस्कृतसाहित्ये निरौपम्यमेव तिष्ठति। गृहस्थदम्पत्योरधिहृदयं पुत्रस्य स्वाभाविकी स्पृहा भवति। तेन विना तयोर्गार्हस्थ्यमपूर्णं भवति। रघुवंशे कालिदासेन दिलीपस्य पुत्राभावो वर्णितः। बाणभट्टेन कादम्बर्यामेतस्य सविस्तरं मार्मिकञ्च वर्णनं विहितम्। चन्द्रप्रभचरिते महाकविना वीरनन्दिनाऽप्यस्य चर्चा रचिता। परन्तु धर्मशर्माभ्युदयस्य द्वितीयसर्गान्ते (६८-७४) महाकविना हरिचन्द्रेण सुव्रताया राज्ञ्याः पुत्रानुत्पत्त्या महासेनमहाराजस्य मुखेन यद् दुःखं प्रकटितं तत्तत्त्वरमेव हृदये प्रविशति। उदाहरणार्थं तस्य द्वौ श्लोकौ द्रष्टव्यौ—

> सहस्रधा सत्यपि गोत्रजे जने सुतं विना कस्य मनः प्रसीदति।
> अपीद्धताराग्रहगर्भितं भवेदृते विधोर्श्यामलमेव दिङ्मुखम् ॥२।७०॥
> न चन्दनेन्दीवरहारयष्टयो न चन्द्ररोचींषि न चामृतच्छटाः।
> सुताङ्गसंस्पर्शसुखस्य निस्तुलां कलामयन्ते खलु षोडशीमपि ॥२।७१॥

दीपकदीपितोऽन्योऽप्येतत्प्रकरणागतः श्लोकः प्रेक्षणीयो वर्तते प्रेक्षावताम्—

> नभो दिनेशेन नयेन विक्रमो वनं मृगेन्द्रेण निशीथमिन्दुना।
> प्रतापलक्ष्मीबलकान्तिशालिना विना न पुत्रेण च भाति नः कुलम् ॥२।७२

तृतीय सर्गस्य वर्णनं कवेर्वैदुष्यं वर्णयितुं स्वसादृश्यं न प्राप्नोति। अस्य प्रकरणस्यैतान् श्लोकान् निरीक्ष्य कवेः श्लेषचातुरीं प्रशंसन्तु सन्तः—

[1]कान्तारतरवो नैत [2]कामोनादकृत परम्
अभवन्न प्रातये सोऽभ्युद्यन्मधुपराशयः[3] ॥२३॥
[4]अनेक - विटपस्पृष्टपयोधरतटा स्वयम् ।
वदत्युद्यानमालेयमकुलीनत्वमात्मनः[5] ॥२४॥
[6]उल्लसत्केसरो [7]रक्तपलाशः कुञ्जराजिनः[8] ।
कण्ठीरव इवारामः कं न व्याकुलयत्यसौ ॥२५॥
एताः [9]प्रवालहारिण्यो मुदा [10]भ्रमरसंगताः ।
मरुन्नर्तकतालेन नृत्यन्तीव वने लताः ॥२६॥
चित्रमेतज्जगन्मित्रे[11] नेत्रमैत्रीं गते त्वयि ।
यन्मे जडाशयस्यापि[12] पङ्कजातं[13] निमीलति ॥५१॥
युष्मत्पदप्रयोगेण[14] पुरुषः स्याद्युत्तमः[15] ।
अर्थोऽयं सर्वथा नाथ लक्षणस्यापि गोचरः ॥५२॥

---

१. कान्तारस्य वनस्य तरवो वृक्षाः पक्षे कान्तारतस्य स्त्रीसंभोगस्य रवः शब्द
२ कामस्योन्मादं कुर्वन्तीति कामोन्मादकृतः पक्षे कामोन्मादेन कृतः ।
३. उद्यन् मधुपानां राशिः पक्षे उद्यन् प्रकटीभवन् मधुपरो मद्यपानपर आशयो यस्मिन् सः ।
४ अनेकविटपैरनेकशाखाभिः स्पृष्टं पयोधरतटं मेघतटं यया सा पक्षे अनेकविटपैरनेकभुजङ्गैः स्पृष्टं पयोधरतटं स्तनतटं यस्याः सा ।
५. कौ पृथिव्यां लीनत्वं कुलीनत्वं तथा न भवति अकुलीनत्वं पक्षे नीचकुलोत्पन्नत्वम् ।
६. उल्लसन्तः केसरा बकुलवृक्षाः पक्षे सटा यस्य सः ।
७. रक्ता लोहितवर्णाः पलाशाः किंशुका यस्मिन् सः पक्षे रक्तपले रुधिरमांसे अश्नातीति तथा ।
८. कुञ्जैर्लतागृहै राजितः शोभितः पक्षे कुञ्जरैः करिभिरजितोऽपराजितः
९. प्रवालैः पल्लवैर्हारिण्यः पक्षे प्रकृष्टकेशैर्हारिण्यः ।
१०. भ्रमरैः षट्पदैः संगताः पक्षे भ्रमे परिक्रमणे रसं स्नेहं गताः प्राप्ताः ।
११. सूर्ये पक्षे लोकसुहृदि ।
१२. डलयोरभेदात् जलाशयस्यपि पक्षे जडाभिप्रायस्यापि ।
१३. कमलं पक्षे पापसमूहः ।
१४. युष्मत्पदप्रयोगे पक्षे तव चरणयोः संयोगे ।
१५. उत्तमपुरुषः उत्कृष्टश्च ।

चतुर्थसर्गे (४१-४४) चन्द्रग्रहणस्य यत्कौतुकावहं वर्णनं कविनाकारि तदन्यत्र न प्राप्यते । दृश्यताम्—

अथैकदा व्योम्नि निरभ्रगर्भे क्षणक्षपायां क्षणदाधिनाथम् ।
अनाथनारीव्यथनैनसेव स राहुणा प्रैक्षत गृह्यमाणम् ॥४१॥
किं सीधुना स्फाटिकपानपात्रमिदं रजन्याः परिपूर्णमाणम् ।
चलद्द्विरेफोच्चयचुम्ब्यमानमाकाशगङ्गास्फुटकैरवं वा ॥४२॥
ऐरावणस्याथ करात्कथंचिच्च्युतः सपङ्को बिसकन्द एषः ।
किं व्योम्नि नीलोपलदर्पणाभे सश्मश्रु वक्त्रं प्रतिबिम्बितं मे ॥४३॥
क्षणं वितर्क्येति स निश्चिकाय चन्द्रोपरागोऽयमिति क्षितीशः ।
दृङ्मीलनाविष्कृतचित्तखेदमचिन्तयच्चैवमुदारचेताः ॥४४॥

वृद्धावस्थाया निमित्तमुपलभ्य राज्ञश्चित्तं संसारशरीरभोगेभ्यो निर्विण्ण जायते । तस्यामेव दशायां स वृद्धावस्थां चिन्तयति । तदा नरस्य दन्ताः पतन्ति, केशाः काशकुसुमसंकाशा भवन्ति, शरीरे वलयो जायन्ते, मध्यं च भुग्नं भवति, एषामखिलानां वर्णनं महाकवेः शब्देषु दृश्यताम् कियत्सुन्दरं विद्यते—

अन्याङ्गनासङ्गमलालसानां जराकृतेर्ष्येव कुतोऽप्युपेत्य ।
आकृष्य केशेषु करिष्यते नः पदप्रहारैरिव दन्तभङ्गम् ॥ ५५ ॥
कान्ते तवाङ्गे वलिभिः समन्तान्नश्यत्यनङ्गः किमसाविलीव ।
वृद्धस्य कर्णान्तगता जरेयं हसत्युदञ्चत्पलितच्छलेव ॥ ५६ ॥
आकर्णपूर्णं कुटिलालकोर्मि रराज लावण्यसरो यदङ्गे ।
वलिच्छलात्सारणिधोरणीभिः प्रवाह्यते तज्जरसा नरस्य ॥ ५७ ॥
असंभृतं मण्डनमङ्गयष्टेर्नष्टं क्व मे यौवनरत्नमेतत् ।
इतीव वृद्धो नतपूर्वकायः पश्यन्नधोऽधो भुवि बम्भ्रमीति ॥ ५९ ॥
(चतुर्थसर्गः)

चन्द्रप्रभचरिते द्वितीयसर्गस्य विस्तृतं न्यायवर्णनं काव्यानुरूपतां विहाय स्वतन्त्रदर्शनशास्त्रमिव जातम् । एवमेव नैषधचरिते सप्तदशसर्गस्य दार्शनिकत्वं काव्यानुरूपतां नानुसरति परन्तु धर्मशर्माभ्युदयस्य चतुर्थसर्गे (६२–७६) यश्चार्वाकीयः सिद्धान्तः सुमन्त्रमन्त्रिणा मण्डितो राज्ञा दशरथेन खण्डितश्च स काव्यानुरूपतां न जहाति स्म । सप्तमसर्गस्य (२०–३८) सुमेरुवर्णनं कवेरनुपमं पाण्डित्यं प्रदर्शयितुमलम् । अस्य संदर्भस्य निम्नाङ्कित श्लोका द्रष्टव्याः सन्ति—

[1]मरुद्ध्वनद्वंश–मनेकतालं[2] [3]रसालसंभावित-मन्मथैलम् ।
धृतस्मरातङ्कमिवाश्रयन्तं वनं च गात्रं च मृगाङ्गनानाम् ।। ३० ।।
[4]विशालदन्तं [5]घनदानवारिं प्रसारितोद्दामकराग्रदण्डम् ।
उपेयुषो दिग्गजपुङ्गवस्य पुरो दधानं प्रतिमल्ललीलाम्[6] ।। ३१ ।।
[7]अधिश्रियं नीरद[8]माश्रयन्ती नवान्नुदन्तीमतिनिष्कलाभान्[9] ।
स्वनैर्भुजङ्गा[10]ञ्जिक्षखिनां[11]दधानं प्रगल्भवेश्यामिव चन्दनालीम् ।। ३२ ।।
(सप्तमसर्गः)

अत्र देववाहनत्वेन समागतानां हस्तिनामश्वानां वृषभाणां च स्वभावोक्ति-मयं वर्णनं माघस्य शैलीं स्मारयति । अष्टमसर्गस्यापि क्षीरसागरजन्माभिषेकयो-र्वर्णनं मालिनीच्छन्दसातिरम्यं जातम् ।

पुत्रस्पर्शवर्णनम्—

नवमसर्गे पुत्रस्पर्शवर्णने समागतयोः

---

१. मरुता पवनेन ध्वनन्तो वंशा वेणुवृक्षा यस्मिन् गानपक्षे मरुद्भिर्देवैर्ध्व-नन्तो वंशा वाद्यविशेषा यस्मिन् तत् ।

२. अनेके तालास्तालवृक्षा यस्मिन् पक्षे अनेकताला स्वरप्रदर्शनप्रक्रम-विशेषा यस्मिन् तत् ।

३. रसालैराम्रवृक्षैः संभाविताः संन्मानिता मन्मथा मदनवृक्षा एलाश्चन्द्र-बालवृक्षाश्च यस्मिन्तत् पक्षे रसेनालसं रसालसं यथास्यात्तथा भाविता मन्मथैला कामचेष्टा यस्मिन् तत् ।

४. विशाला दन्ता गजदन्ताभिधानाः प्रत्यन्तपर्वता यस्य तं पक्षे विशाला दन्ता रदना यस्य तं ।

५. घना बहवो दानवारयो देवा यस्मिंस्तं पक्षे घनं प्रचुरं दानवारि मदजलं यस्य तम् ।

६. प्रतिद्वन्द्विलीलाम् ।

७. अधिका श्रीर्यस्य तं प्रभूतलक्ष्मीकं पक्षे प्रभूतशोभम् ।

८. निर्गता रदा दन्ता यस्य तं दन्तरहितं पक्षे नीरं ददातीति नीरदो मेघस्तं ।

९. अतिक्रान्तो निष्कलाभो हेममुद्रालाभो येभ्यस्तान् दरिद्रानित्यर्थः पक्षे अतिनिष्कला कृष्णतरा आभा येषां तान् ।

१०. विटान् सर्पांश्च ।

११. मयूराणां पक्षे शिखण्डिपुरुषाणाम् ।

पुत्रस्य तस्याङ्गसमागमक्षणे निमीलयन्नेत्रयुगं नृपो बभौ ।
अन्तः कियद्गाढनिर्पीडनाद् वपुः प्रविष्टमस्येति निरूपयन्निव ॥१०॥
उत्सङ्गमारोप्य तमङ्गजं नृपः परिष्वजन्मीलितलोचनो बभौ ।
अन्तर्विनिक्षिप्य सुखं वपुर्गृहे कपाटयोः सघटयन्निव द्वयम् ॥ ११ ॥

अनयोः श्लोकयोः पुरस्तात् कालिदासस्य रघुवंशे समायातं निम्नाङ्कित-पुत्रस्पर्शवर्णनं न्यूनकलं प्रतिभाति—

तमङ्कमारोप्य शरीरयोगजैः सुखैर्निषिञ्चन्तमिवामृतं त्वचि ।
उपान्तसंमीलितलोचनो नृपश्चिरात्सुतस्पर्शरसज्ञतां ययौ ॥ २८ ॥
रघुवंशतृतीयसर्गे

युवराजो धर्मनाथः शृङ्गारवत्याः स्वयंवरे संमिलितो भवितुं दक्षिणदिशां प्रति प्रयाणं करोति । तदवस्थायाः श्लेषमयं वर्णनं दर्शनीयं वर्तते—

तां नेत्रपेयां विनिशम्य, सुन्दरीं सुधामलं[1] कामयमान उत्सुकः ।
क्रामन्नपाचीं हरिसेनया[2] वृतो बभौ स काकुत्स्थ[3] इवास्तदूषण[4] ॥६-५१॥

एव प्रतीयते यत् 'सुधामलं कामयमानः' इत्यस्य मनोज्ञसुरभिः नैषधस्य 'चेतो नलं कामयते मदीयम्' इति यावत्प्रयातः । नवमसर्गस्य (६६-७७) गङ्गावर्णनं साहित्यिकदृष्ट्योत्कृष्टतरं विद्यते । दशमसर्गस्य नानावृत्तमयं विन्ध्य-गिरिवर्णनं माघस्य चतुर्थसर्गख्यातं रैवतकगिरिवर्णनं स्मारयति । उभयत्र यमकालङ्कारस्यानुपमा छटा विकीर्णा वर्तते । माघे 'दारुकमुखेन' अत्र च 'प्रभाकरमुखेन' पर्वतस्य वर्णनं कारितम् ।

महाकविना कालिदासेन रघुवंशस्य नवमसर्गे चतुर्थपादव्यापिना यमकेन साकं द्रुतविलम्बितच्छन्दोऽवतार्य काव्यसुधाया या मन्दाकिनी प्रवाहिता तस्या अनुसरणं माघस्य षष्ठस्य धर्मशर्माभ्युदयस्य चैकादशे सर्गे षड्तुवर्णनप्रसङ्गे कृतम् । यथा नासायां धृतमवदातं मौक्तिकं कस्याश्चिच्छुभ्रवदनाया मुखारविन्दे

---

१. तां सुन्दरीं नेत्रपेयां सुधां विनिशम्य अलमत्यर्थं कामयमानोऽभिलषन् पक्षे तां सुन्दरीं नेत्रपेयां विनिशम्य सुष्ठुधामानि यस्यां तथा भूता सुधामा, सुधामा चासौ लङ्का चेति ताम् अयमानो गच्छन् ।
२. हरिसेनया वानरसेनया पक्षेऽश्वसेनया ।
३. रामः ।
४. निर्दोषः पक्षे निहतदूषणाख्यराक्षसः ।

विभासयति तथात्रानेन पदद्वयव्यापिना यमकेन द्रुतविलम्बितच्छन्दो विभासितम्। एतत्संदर्भस्य श्लोकद्वयं दृश्यताम्—

[1]कलविराजिविराजितकानने [2]नवरसालरसालसषट्पदः।
[3]सुरभिकेसरकेसरशोभितः प्रविससार स सारबलो मधुः॥ १०॥
तदभिधानपदैरिव षट्पदैः शबलिताम्रतरोरिह मञ्जरी।
कनकभल्लिरिव स्मरधन्विनो जनमदार मदारथदञ्जसा॥ १२॥

धर्म० सर्ग ११

द्वादशसर्गस्य वनक्रीडा छन्दसोऽलंकारनिचयस्य चानुकूल्येन माघस्य वनक्रीडापेक्षयातिमनोहारिणी जाता। समग्रे त्रयोदशसर्गे व्याप्ता जलक्रीडभारवेः किरातार्जुनीयस्याष्टमसर्गव्यापिनी जलक्रीडां विस्मृतां विदधाति। चतुर्दशसर्गस्य प्रदोषस्य, रजन्याः रजनीरमणोदयस्य च वर्णनं पाठकहृदयममन्दानन्दामृताप्लुतं विदधाति। सति चन्द्रोदये कमलानां लक्ष्मीश्चन्द्रमसोऽभ्यर्णं गतेत्यस्य वर्णनं दृश्यतां कियत्सुन्दरं वर्तते—

तावत्सती स्त्री ध्रुवमन्यपुंसो हस्ताग्रसंस्पर्शसहा न यावत्।
स्पृष्टा कराग्रैः कमला तथाहि त्वक्सारविन्दाभिससार चन्द्रम्॥ ५५॥

सर्ग १४

पञ्चदशसर्गस्य मधुपानं काव्यदृष्टयात्युच्चकोटिकमस्ति। मदिराया मदेन स्खलितवाचः कस्याश्चित्सुन्दर्या वर्णनं दृश्यतां कियद् हृदयहारि वर्तते—

त्यज्यतां पिपिपिपिपि प्रिय पात्रं दीयतां मुमुमुखासव एव।
इत्यमन्थरपदस्खलितोक्तिः प्रेयसी मुदमदाद् दयितस्य॥ २२॥

षोडश सर्गस्य प्रभातवर्णनं माघस्यैकादशसर्गं स्मारयति। माघस्य प्रभातवर्णने यद्यपि मालिनीवृत्तेनाधिका शोभा समानीता तथापि धर्मशर्माभ्युदयस्य विचित्राः कल्पनास्तस्य स्वभावोक्तिभ्योऽतितरां रम्याः प्रतीयन्ते। दृश्यताम्,

---

१. कलवीनां सुन्दरपक्षिणां राजिभिः पङ्क्तिभिर्यत् विराजितं काननं तस्मिन्।

२. नव रस लसेन अलसाः षट्पदा यस्मिन् सः।

३. सुरभिकेसराणां मनोज्ञबकुलपुष्पाणां केसरेण किञ्जल्केन शोभितः।

चन्द्रोऽस्तोन्मुखो वर्तते, प्राच्यामरुणस्य लोहितिमा समाच्छन्नो विद्यते, दुन्दुभिश्च मन्द्र ध्वनति। एतद्वर्णनं धर्मशर्माभ्युदये कियन्मनोज्ञं वर्तते—

राजानं जगति निरस्य सूरसूतेनाक्रान्ते प्रसरति दुन्दुभेरिदानीम्।
यामिन्याः प्रियतमविप्रयोगदुःखैर्हृत्सन्धेः स्फुटत इवोद्भटः प्रणादः ॥१६-८॥

एतस्मिन्नेव षोडशे सर्गे सेनायाः प्रस्थानं माघस्य द्वादश सर्गे वर्णित श्रीकृष्णसेनायाः प्रमाणं स्मारयति। सप्तदशसर्गे शृङ्गारवत्याः स्वयंवरवर्णनं कालिदासस्येन्दुमतीस्वयंवरवर्णनं पृष्ठे त्यजति। स्वयंवरसभां समायान्त्येव शृङ्गारवती राज्ञां मनसि प्रविष्टा इत्यस्य श्लेषमयं वर्णनं दृश्यतां कियत्कौतुकावहं वर्तते—

पयोधरश्री-समये प्रसर्पद्धारावलीशालिनि संप्रवृत्ते।
सा राजहंसीव विशुद्धपक्षा महीभृतां मानसमाविवेश ॥ १७-१८ ॥

स्वयंवरानन्तरं राजपथे शृङ्गारवत्या सार्धं गच्छन्तं धर्मनाथं द्रष्टुं स्त्रीणां कौतूहलं परमार्थतः कुतूहलास्पदे जातम्। धर्मशर्माभ्युदयस्यैतद्वर्णनेन रघुवंश-कुमारसंभवयोर्वर्णनं पश्चात्कृतम्। विवाहदीक्षाया अनन्तरं धर्मनाथः शृङ्गारवत्या साधमधिच्चत्वरं सुवर्णसिंहासनमलंचकार यदा, तदैव तत्पितुरेकं पत्रं प्राप्तम्, यत्पठित्वा स सहसा कुबेरनिर्मितविमानमधिरुह्य रत्नपुरं प्रति चचाल। अनेनैवं प्रतीयते यत्कविना रसस्याकाण्डच्छेदः कृतः। पाठकस्य हृदये वहन्ती रसधारा-एव शुष्का भवन्ती प्रतिभाति। स्वयंवरानन्तरं भविष्यता युद्धेन धर्मनाथम-स्पृष्टं रक्षितुं कविनैतत्कृतमिति प्रतीयते। कविनासौ धर्मनाथो विमानेन रत्नपुरं प्रेषितो, युद्धस्य च दायित्वं सुषेणसेनापतेरुपरि निक्षिप्तम्।

अष्टादशसर्गे (६–४३) संसारस्य मायाममताया विरज्य महासेनो महाराजो मुनिदीक्षां ग्रहीतुं कृतसंकल्पो वर्तते। स राज्याभिषेकानन्तरं युवराज-धर्मनाथाय यमुपदेशं ददाति स कादम्बर्याः शुकनासोपदेशस्य, गद्यचिन्ता-मणेश्चाचार्यनन्द्युपदेशस्य संक्षिप्तसंस्करणमिव ज्ञायते। तेन युवराजधर्मनाथाय गुणार्जनस्य य उपदेशो दत्तः स कविना श्लेषोपमालंकारेण कियदाकर्षकः कृत इति दृश्यताम्—

भृशं गुणानर्जय सद्गुणो जनैः क्रियासु कोदण्ड इव प्रशस्यते।
गुणच्युतो बाण इवातिभीषणः प्रयाति वैलक्ष्यमिह क्षणादपि ॥१८-१॥

एकोनविंशतितमे युद्धवर्णनाय कविना यच्छन्दश्चित्रालंकारश्चावचित-स रसस्यानुकूलो नास्ति। यमकश्चित्रालंकारश्च कवेः काव्यकौशलं परीक्षितु

निकषोपलस्य कार्यं प्रददाति। महाकविहरिचन्द्रस्य कौशलं यद्यपि तदुपरि प्रखरं समवतीर्णं तथापि तेन वीररसस्य धारावरुद्धा जाता। यद्यपि भारविणा माघेन चैतद्वर्णनार्थमनुष्टुपछन्द एवावचितं तथापि पृष्ठे पुरस्ताच्चान्यैश्छन्दोभिर्वीररसस्य वर्णने समायाते तस्य प्रवाहे न्यूनता नायाता। धर्मशर्माभ्युदये तु वीररसवर्णनाय तस्यैवैकस्य सर्गस्य सत्त्वादनुकूलच्छन्दोऽभावे तस्य धारा सामर्थ्येण न विकासिता।

विंशतितमे सर्गे धर्मनाथस्य भगवतो राज्यस्य तपश्चरणस्य, समवसरणस्य च यद् वर्णनं कृतं तद् यद्यपि स्वस्मिन् परिपूर्णं वर्तते तथाप्येवं प्रतिभाति यत्कविः काव्यस्यैतत्प्रमुखं कथानकं सत्वरं निवर्त्तयितुमिच्छति। एकविंशतितमस्य धर्मोपदेशो विस्तृतश्छन्दोऽनुरूपश्च विद्यते।

इत्थं धर्मशर्माभ्युदयं काव्यवैभवेन युक्तमुच्चकोटिकं महाकाव्यमस्ति।

पद्यद्वयमीमांसा

सुदर्शनः शर्मा

सन्दर्भेऽस्मिन् पद्यद्वयं मीमांसामहे। तत्रैकं रत्नावलीपद्यम् रत्नावलीकर्त्तुः, अपरं च मेघदूतकवेः। तत्र

[१] रत्नावलीपद्यम्

श्रीहर्षवर्धनकृता नाटिका रत्नावली शृङ्गारप्रधाना क्वचित्स्थलेषु पाठभेदान् व्यनक्ति। पाठभेदभावोऽर्थभेदभावको भवितुमर्हतीति विषयमूरीकृत्य पत्रेऽस्मिन् पद्यमेकं विवक्तुर्महे। पद्यं तु तदिदमेव—

'स्थितमुरसि विशालं पद्मिनीपत्रमेतत्
कथयति न तथान्तर्मन्मथोत्थामवस्थाम्।
अतिगुरुपरितापम्लापिताभ्यां यथास्याः
स्तनयुगपरिणाहं मण्डलाभ्यां ब्रवीति॥'[१]

संस्करणान्तरे[२] तृतीयपादे 'अतिगुरुपरितापम्लापिताभ्याम्' इतिस्थाने 'अतिगुरुपरितापम्लापिताङ्ग्या' इति पाठभेदं व्यनक्ति। पाठद्वये शब्दभेदोऽर्थभेदक इति सुतरां व्यज्यते। त्रिपाठिमहोदयस्तु पद्यमिदमेवं विवक्ति सागरिकायाः स्तनयोर्विशालत्वं सूचयन्नाह स्थितमिति-उरसि=वक्षःस्थले स्थितम् = स्थापितमित्यर्थः, एतत् = इदम्, पुरो दृश्यमानमिति यावत्, विशालम् = महत्, पद्मिनीपत्रम् = कमलिनीदलम्, (अस्याः = चित्रगतायाः सुन्दर्याः), अन्तः = मध्ये हृदयाभ्यन्तरे इति यावत्, मन्मथोत्थां मन्मथेन कामेन उत्थाम् = जनिताम्, कृतामिति यावत्, अवस्थाम् = दशाम्, तथा = तेन प्रकारेण, न कथयति = न वदति, न सूचयतीत्यर्थः, यथा = येन प्रकारेण, अतिगुरुपरितापम्लापिताभ्याम् अतिगुरुः=अतिमहान् यः परितापः सन्तापः, कन्दर्पकृता ज्वरवेदनेति यावत्, तेन म्लापिताभ्याम् = ग्लापिताभ्याम्, मण्डलाभ्याम् = स्तनसंयोगकृताभ्याम् चक्रवालाभ्याम् ('चक्रवालं तु मण्डलम्' इत्यमरः), 'अस्याः, = चित्रितायाः शयनादुत्थाय गतायाः इत्यर्थः, स्तनयुग-

१. रत्नावलीनाटिका—डा० रमाशङ्करत्रिपाठी सम्पादिता। द्वितीयोऽङ्कः पद्यं चतुर्दशम्। पृष्ठम चतुरुत्तरशतम् (१०४ तमम्)

२. सेप—सी-आर-देवधर-एन-जी-सूरु-विद्वद्द्वयसम्पादितम् संस्करणम्। द्वादशं पद्यम सप्तत्युत्तरचतुरम् च पृष्ठम्।

परिणाहम्-स्तनयोः कुचयोः युगम = युग्मम तस्य परिणाहः = विशालता ('परिणाहो विशालता' इत्यमरः) तम, ब्रवीति = वदति, बोधयतीत्यर्थः। अतितुङ्गयोः स्तनयोरुपरि वर्तमानस्य कमलिनीपत्रस्य हृदयसंसर्गाभावात् हृदयस्थतापबोधकत्वाभावः।"[१]

देवधरमहोदयश्च पद्यमिदमेवमनुवक्ति—"विपुलं पद्मपत्रमिदम् अस्याः वक्षःस्थले वर्तमानं न तथा विधामस्याः कामयमानामवस्थां प्रकटीकरोति—यस्याः अङ्गानि अत्यर्थमनोऽन्यथाविसर्पेण ग्लानिं गतानि, यथाविधमुरोमण्डलगोलाकारत्वम्, मण्डलाकारचक्रसदृशबिम्बाभ्याम् व्यनक्ति इति।[२]

विद्वद्द्वयमतविवक्षायाम् विशेषेणार्थभेदः सुतरां शब्दविवक्षापरो मक्षिकास्थाने मक्षिकास्थापनतत्पर एव प्रतीयते। वस्तुतः प्रसंगोऽत्र नाटिकायाम् विप्रलम्भे सम्भोगवाञ्छापरत्वात् भावानुभावगमितः व्यभिचारिभावगर्भितः स्वाद्यत्वमानीयमानः रसनिर्माणापेक्ष्येव। न तु मेघदूतीयो विप्रलम्भोऽत्र विवक्ष्यः। मालविकाग्निमित्राग्निमित्रमालविकाविप्रलम्भपरकोऽयम् प्रतिमातुं शक्यते। सागरिकापरनामधेया रत्नावली नायिकाभूता उदयनेऽग्निमित्र इव मालविका धारिणीरावतीभ्यामिव वासवदत्तया पत्युः पुरस्तात् परिहारिता 'परस्परप्राप्तिनिराशयोर्वरं शरीरनाशोऽपि समानुरागयोः'[३] कालिदासप्रतिपादिता दर्शविधेयीभूता चित्रविद्याविनोदप्रक्रियामनुभवन्ती वियोगजन्यदुःखं चापहारयन्ती नायकोदयनस्य हृद्गतान् भावानुन्मोचयन्ती कविना चित्रिता वर्तते।

> 'निर्वेदग्लानिशङ्काश्रमधृतिजडता हर्षदैन्योग्र्यचिन्ता
> स्त्रासेर्ष्यामर्षगर्वाः स्मृतिमरणमदाः सुप्तनिद्राविबोधाः।
> व्रीडापस्मारमोहाः सुमतिरलसतावेगतर्कावहित्था
> व्याध्युन्मादौ विषादोत्सुकचपलयुतास्त्रिंशदेते त्रयश्च॥'[४]

१—प्रथमप्रसंगीये षडधिकशततमे पृष्ठे।

2—This big lotus-leaf that reposed on her bosom does not so much betray the condition produced by love in her, whose limbs have grown languid through the violence of her passion, as it reveals the size of her breasts by the circles (formed on it) 12.

द्वितीये प्रसंङ्गे सप्तत्युत्तरपञ्चमं पृष्ठम्।

३—मालविकाग्निमित्रे तृतीयेऽङ्के पञ्चदशः श्लोकः।

४—धनञ्जयकृते दशरूपके—४-८ पृ० २६८

डा० श्रीनिवासशास्त्रिकृते संस्करणे।

इति त्र्यधिकत्रिंशद्व्यभिचारिणो भावाः विप्रलम्भशृङ्गाराधारभूताः मनोविनोदोपायव्यपेक्षिणः रत्नावलीप्रसंगे सुघट्याः स्युः। रत्नावल्यैव सागरिकाभूतया निर्वेदग्लानिशङ्काश्रमदैन्यौग्र्यचिन्तात्रासादिभावविहितात्मभावया मनोविनोदाय चित्रितं चित्रमवलोक्य शङ्काश्रमजडता दैन्यौग्र्यचिन्तात्रासेर्ष्यामर्षगर्वादिभिग्रस्तो नायक उदयनः—

कृच्छ्रादूरुयुगं व्यतीत्य सुचिरं भ्रान्त्वा नितम्बस्थले
मध्येऽस्यास्त्रिबलीतरङ्गविषमे निष्पन्दतामागता।
मद्दृष्टिस्तृषितेव सम्प्रति शनैरारुह्य तुङ्गौ स्तनौ
साकाङ्क्षं मुहुरीक्षते जललवप्रस्यन्दिनी लोचने॥[1]

परिम्लानं पीनस्तनजघनसंगादुभयत-
स्तनोर्मध्यस्यान्तःपरिमिलनमप्राप्य हरितम्।
इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः
कृशाङ्ग्याः सन्तापं वदति नलिनीपत्रशयनम्॥[2]

इति प्रकारान् मनउद्गारान् प्रकटय्य प्रसंगानुगतं पद्यं पठति। नायिकावपुर्मनसोऽवस्थामवलोक्य नायकमनउद्गारप्रकटीभावः विप्रलम्भशृङ्गारे—

'कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु'[3] इति कालिदासोक्तिपुष्टिकर एव स्यादिति विवेचनं विविच्य उदयनस्य कामार्त्तित्वेन चित्रगतायाः सागरिकायाः वपुर्लतासौहित्यं सूचितम्। चित्रगता नायिकाऽचेतना विप्रलम्भगतेन निर्विवेकेन मूढेन च धृतिश्लथेन नायकेन चेतनस्वरूपैव परिचिता। नायिकयैव स्वेन युक्तो नायकश्चित्रगतः निश्चेतनचित्रेऽपि चेतनबुद्धिमादधानः कमलपत्रपुटयुक्तस्तनीं नायिकाम् चित्रेऽपि चेतनाचितां चिन्वानः प्रसंगानुगत पद्यं वक्ति यस्मिन् शब्दपरिवर्तनकल्पः प्रयासोऽस्मदीयः अलंकारसुषमामर्थवैचित्र्येण विवक्षामर्हति। विचारेणास्मदीयेन तु—

---

१ – रत्नावली—द्वितीयेऽङ्के एकादशं पद्यम्।
त्रिपाठिसम्पादिते संस्करणे।
नवमं च पद्यं सी–आर–देवधर–सम्पादिते संस्करणे।

२—तत्रैव २.१३ त्रिपाठीये संस्करणे
२.११ च देवधरीये।

३—डा॰ वासुदेवशरणाग्रवालसम्पादिते मेघदूते १५६ तमे पृष्ठे पञ्चमं पद्यम्।

"स्थितमुरसि विशालं पद्मिनीपत्रमेतत्
कथयति न तथान्तर्मन्मथोत्थामवस्थाम्।
अतिगुरुपरितापम्लापिताभ्यां यथास्याः
स्तनयुगपरिणाहः मण्डलाभ्यां ब्रवीति ॥"

पद्यमिदं सर्वङ्कत्वदृष्ट्याऽलंकारभावनां पूर्णरूपेणैवमेव पुष्टीकरोति। सान्वयमत्र विश्लेष्यते पद्यमिदम्।

"उरसि स्थितम् विशालं पद्मिनीपत्रम् एतत् एतत् पद्मिनीपत्रं वा तथा अन्तर्मन्मथोत्थाम् अवस्थां न कथयति यथा अस्याः स्तनयुगपरिणाहः अतिगुरु-परितापम्लापिताभ्यां मण्डलाभ्याम् (ताम्) (अन्तर्मन्मथोत्थामवस्थामिति) ब्रवीति-कथयति प्रकटीकरोति।"

अतः वक्षःस्थले निहितो वरीयान् स कमलकिसलयः तन्मात्रया सागरिका हृत्तलोत्पद्यमानां कामवासनाजन्याम आर्त्तावस्थाम न प्रकटीचकार यन्मात्रया तामेव मनोव्यथाम् तस्याः सागरिकायाः कुचयुगलगोलाकारत्वम् अत्यर्थशरीर दाहज्वरोष्मप्रभावान्निश्वासपरम्परापरिवेपमानचूचुकाभ्याम् परिस्फुटीचकार इति। पाठान्तरे 'अतिगुरुपरितापम्लापिताङ्ग्याः' इति समस्तपदेन—"तस्या" इति शब्दस्थानमेव पूर्यते। पूर्वार्धे 'परिवेपमानचचुकाभ्यामिति' स्थाने 'परि-शुष्यच्चूचुकाभ्यामिति' भावो विधातुं समीचीयते।

पयोधरोत्सेधविहितबृहत्सरोरुहपलाशे यथा यथा नायिकायाः निश्वसे म्लायमानकुचमुखपरिवेपनादुपरिनीचैश्च विकल्पेन याति तेन तस्याः अथवा गरीयोमनोभवभावाभिभूतप्रभावकृशवपुर्लतायाः मनसो विकारः तेन च नायकमनःप्रसक्तिरिति तादात्म्येन तात्कालिकेन विधिना भवितुमर्हतः। कुच-युगलगतगोलाकारमुखयुगलभार्दवेन तीव्रनिश्वासलीलया चाव्जोर्जितत्वप्रसंगः ससूच्यते। कामवासनाधायकत्वं च विशेषेण निश्वासारोहावरोहपरम्परितं प्रवि-सर्पति। इति।

[२] मेघदूतीयं पद्यम्

निःशङ्कमेव विद्वद्भिः कालिदासो व्याख्यातबहुलः। न चावकाशो लभ्यते कवेः कृतिषु किमपि नवं नवं व्याकर्तुम्, तथापि 'क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः'—इति तत्त्वविशेषप्रकाशनी कवेरस्य प्रज्ञा नवनवोन्मेष-शालिनीप्रतिभाप्रतीका सती किमपि क्षणे क्षणे पुनः पुनरुद्भाव्यमाना नवमेवार्थ

व्यञ्जयति। मेघदूतं हि नाम कवेरस्य कौशलाढ्या कृतिः पद्ये पद्ये प्रीति जनयति।

"आराध्यैनं शरवणभवं देवमुल्लङ्घिताध्वा
सिद्धद्वन्द्वैर्जलकणभयाद्वीणिभिर्मुक्तमार्गः।
व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्यन्
स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्तिम्॥"[1]

पद्यमिदमर्थवैचित्र्यव्यञ्जकम् पादोत्तरद्वये व्याख्यामर्हति।

मेघस्य रामगिर्याश्रमादलकायानमार्गम् संसूचयन् यक्षो वक्ति—

"नड्वलतृणगुल्मगुपिलाख्यजातमेनं देवमिमं भगवन्तं कार्त्तिकेयमाराध्य संपूज्य लङ्घिताध्वा संचरितमार्गः वीणिभिः वल्लकीहस्तैः सिद्धद्वन्द्वैः सिद्धाना युगलैः जलकणभयात् पानीयविप्रुड्भिर्वीणाकोणक्लेदनपरित्रासात् मुक्तमार्ग निर्बाधीकृताध्वा"—इति पद्यभागीयपादद्वये तु शब्दार्थः सुस्पष्ट एव। पर तृतीयतुरीयपादद्वये तु मतैक्यं नैव स्यादर्थविवेचने।

"सुरभितनयानां गवामालम्भेन संज्ञपनेन जायते इति यथोक्तम्। भुवि लोके स्रोतोमूर्त्त्या प्रवाहरूपेण परिणतां रूपविशेषमापन्नां रन्तिदेवस्य दशपुरपते-र्महाराजस्य कीर्तिम्। चर्मण्वत्याख्यां नदीमित्यर्थः। मानयिष्यन् सत्कारयिष्यन् व्यालम्बेथाः। आलम्ब्यावतरेरित्यर्थः। पुरा किल राज्ञो रन्तिदेवस्य गवालम्भे-ष्वेकत्र संभृतादृक्तनिष्यन्दाच्चर्मराशेः काचिन्नदी सस्यन्दे। सा चर्मण्वतीत्या-ख्यायते। 'इति मल्लिनाथव्याख्या सावधेया।[2] मल्लिनाथटीकासावहितिः सुतरा सूचयति यत्तेन योऽप्यर्थः संगृहीतः स तु पारम्परिक एव। 'संज्ञपनेन' इति शब्दोऽत्र विवादग्रस्त इव लक्ष्यते। अमरसिंहोऽमरकोशे—

१—पूर्वमेघः—एम-आर काले सम्पादिते संस्करणे ४८ तमं पद्यम्।

तत्रैव श्रीरञ्जनसूरिदेवीये संस्करणे ४५ तमं पद्यम्।

मेघदूतम्—एस के-दे-४५ तमं पद्यम्।

मेघदूत विलासः—वाक् कन्वे कृतं संस्करणम् ४५ तमं पद्यम्।

२ एम-आर-काले संस्करणे ४१-४२ पृष्ठद्वयम्।

'निर्वासनं संज्ञपनं निर्ग्रन्थनमपासनम्' संज्ञपनशब्दमर्थचतुष्टयेन वक्ति। न त्वत्र—

'निस्तर्हणं निहननं क्षणनं परिवर्जनम्।[१]
निर्वापणं विशसनं मारणं प्रतिघातनम्॥[२]

इतिप्रकाराः अर्थाः समपेक्षिताः। अतः संज्ञपनशब्दो विशसनमारण-पर्यायस्तु नैव कोशकृतामरसिंहेन परिकल्पितः इति वक्तुं पार्यते। 'निर्वासनं, निर्ग्रन्थनम् अपासनम्' इति शब्दत्रयं तु वासात् निर्मोचनम् विश्लथीकरणम्, दूरीकरणमिति भावत्रयविशेषकं लक्ष्यते अतः मल्लिनाथेनापि—

"*गवां संज्ञपनेन लोके प्रवाहरूपेण* रूपविशेषमापन्नां दशपुरपतेर्महाराजस्य कीर्तिम् चर्मण्वत्याख्यां नदीमित्यर्थः' इति भावो विशेषीकृतः। 'पुरा किल' इति शब्दैस्तेन गवामालम्भेषु एकत्र संभृतरक्तनिष्यन्दाच्चर्मराशेः काचिन्नदी सस्यन्दे इति भावोत्तरत्वं व्यञ्जितम्। रन्तिदेवो हि नाम राजा गवां हननात् रक्तं स्रावं स्रावं सरित्पूरमाप्लाव्य चर्मण्वतीनदीं निर्मिमाय इति सर्वमान्यो मतोऽर्थरूपेण विद्वद्भिः पेशलीकृतः। परमश्रद्धेयोऽयमभिप्रायो लक्ष्यते कारणान्तरैः।

राजा प्रकृतिरञ्जनात्।[३]
वसुमत्या हि नृपाः कलत्रिणः।[४]
प्रजानां विनयाधानाद्रक्षणाद्भरणादपि[५]
स पिता पितरस्तासां केवलं जन्महेतवः[६]॥

'आर्त्तत्राणाय नः शस्त्रं न प्रहर्तुमनागसि' इत्यादर्शाः कविना कालिदासेन स्वान् राज्ञ अधिकृत्य प्रतिपादिताश्चेत् कथं तर्ह्यसौ नाम 'क्वापि काव्ये

१. अकारादिक्रमसंख्या १६६४तमी नारायणरामाचार्यसंस्करणे। पृष्ठमष्टसप्ततितमम्।
२.-५ तत्रैव १६६५-१६६६ पृ० ७८
३. रघुवंशे ४. १२ पृ. ९५. जी-आर्-नन्दर्गीकर-संस्करणे।
४. तत्रैव ८. ८३ पृ. २५२.
५. तत्रैव १. २४. पृ. ११.
६. अभिज्ञानशाकुन्तले १. ११. पृ. १८.
एम्--आर्--काले--संस्करणे।

प्राणिसंहारकल्प ऽऽकेण राज्ञा कृत कविना च प्रतिपादितः सन् विश्वास्यो भवेदिति विषयो विशेषणीयः। कालिदासो हि नाम वेदाध्येता वेदविद्यार्थमूलप्रतिपत्तिधायकः—

'श्रुतेरिवार्थं स्मृतिरन्वगच्छत्'[1]

'दिनक्षपामध्यगतेव संध्या।'[2]

'निवर्त्य राजा दयितां दयालुस्तां

सौरभेयीं सुरभिर्यशोभिः।'

पयोधरीभूतचतुः समुद्रां

जुगोप गोरूपधरामिवोर्वीम्॥'[3]

इति स्वरघुवंशे 'श्रुतिस्मृत्योः सायुज्यत्वं, सन्ध्याप्रतिरूपिणीं गां परिकल्प्य तां पयोधरीभूतचतुःसमुद्राम् उर्वीम्' मत्वा राज्ञा दिलीपेन परिरक्ष्यमाणां प्रथयति। अथ 'गौः' नाम जन्तुः ऋग्यजुरथर्वसामवेदेषु,[4] शतपथब्राह्मणे[5] तैत्तिरीयब्राह्मणे,[6] ताण्ड्यब्राह्मणे, मनुस्मृतौ[7] च सामान्यतः "अघ्नी" इति मतः। 'अघ्नी' शब्दः ऋग्वेदे[8] (१०-४६-३) इति प्रसंगे 'गोः' समानार्थकः। 'न हन्तुं योग्या' 'हन्तुमयोग्येति' वा 'अघ्नी'।

कथं नु शक्योऽनुनयो महर्षेर्विश्राणनाच्चान्यपयस्विनीनाम्।
इमामनूनां सुरभेरवेहि रुद्रौजसा तु प्रहृतं त्वयास्याम्॥[9]

---

१. रघुवंशे २, २, पृ० ३६ नन्दर्गिकर संस्करणे।

२. तत्रैव २, २०, पृ० ४३,

३. तत्रैव २, ३ पृ० ३७,

४. ऋग्वेदे—१०, ८७; १६, १६; ७-४० (२, ४); यजुर्वेदे ३६, १८; सामवेदे ८०, अथर्ववेदे १६, ४८; १८-४; ८, ६-२३; ५, २६, ११; ८, ३-१८; ५, २६, १०;

५. ६, २, १५, १, १, ६, ७, ८;

६. १८

७. २, १७७

८. संस्कृताङ्ग्लकोशः—सर मोनियरविलियम्ज

९. रघुवंशे २, ५४, पृ० ५५

इति पद्ये कविना पुनरपि 'सुरभितनया' नन्दिनी 'सुरभेरनूना' 'हन्तुमयोग्या' 'अघ्नी' वा पुष्टीकृता। अतः मेघदूतीयं पद्यमिदं वयमेवं परिचिन्मः—

"सुरभितनयानां गवां आलम्भेन समन्ततः प्रापणेन जाताम्[1] अपि च स्रोतोमूर्त्या प्रवाहरूपेण नदीरूपेण वा। गवां प्राप्तिः नदीनां निर्माणं च राज्ञां व्यसनमभूत्। गवां लब्धिः रक्षाविधेया सती राज्ञो यशस्करी। एवमेव सेचनकर्मकौशलमपि राज्ञां यशस्करमेव स्यात्। सुरभितो नयो नीतिमार्गः सुगन्धितो राज्यकार्यविधिः। प्रसरणशीलो विधिः सुव्यवस्थितो वा नीतिमार्गः श्लेषेण गवां प्राप्तये दुग्धप्राप्तिभावं प्रथयति। प्रजानां पोषणं च व्यनक्ति। सुव्यवस्थितनीतिमार्गेण गवां प्राप्त्या च जातामुत्पन्नामेवमेव चर्मण्वतीनदीनिर्माणप्रजाहितार्थकार्यकरणं रन्तिदेवस्य यशःपताकां प्रसरन्तीं पृथिव्यां राज्ञोऽस्य कार्यं श्लाघ्यं मानयन्तीम् मानयिष्यन् समादरेण परिकीर्त्तितुमिच्छन्—व्यालम्बेथाः विश्रामं कुर्याः इति मेघसम्बोधनम्।"

१—नन्दर्गिकर संस्करणे।

मेघदूतेऽभिव्यक्तिदोषाः

डा० रेवाप्रसादद्विवेदी

कालिदाससाहित्ये मेघदूतम् अभिव्यक्तिदृशा प्रारम्भिकमिव प्रतीयते। यथैतत् तद् यथापद्यक्रमं संक्षिप्योपस्थापयामः। तथाहि—

१. 'कश्चित् कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः
शापेनास्तंगमितमहिमा वर्षभोग्येण भर्तुः।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु॥

इति प्रथम एव पद्ये गर्भितत्वं नाम वाक्यदोषमनुभवामः। तथाहि पद्येऽस्मिन् वाक्यार्थद्वयं हेतु-हेतुमद्भावेन सुकवेर्निबिभन्तिसतम्, शापवाक्यार्थः, प्रवासवाक्यार्थश्च। तत्र द्वितीयो विधेयः। तत्रापि यक्षमुद्दिश्य वसतिकरणक्रिया विधेयतया प्रस्तूयते। ततश्च योऽयं शापवृत्तान्तः स यक्षविशेषणीभूतास्तंगमितमहिमत्वविशेषणतया स्फुटमेवोद्देश्यतावच्छेदकम्, तत एव चाप्रधानम्। अप्रधानस्यास्यात्राविच्छिद्यबोधितैवोचिता। नास्ति च सा, तन्मध्ये 'स्वाधिकारप्रमत्तता-'त्मनो यक्षविशेषणस्य निक्षिप्तत्वात्। तेन हि किंपदवाच्याद् व्यक्तिविशेषाद् उड्डीना मतिः कान्ताविरहगुरुत्वकक्षामाक्रम्य शापक्षेत्रे प्राप्तप्रवेशापि 'स्वाधिकारप्रमाद-' रूपेण व्यक्तिविशेषस्यैव विशेषणेन खण्डितप्रसरा सती तमेव व्यक्तिविशेषं पुनरागच्छति। न च शाप-शम-योर्विशेषणगतं साम्यमत्र विवक्षितं 'ततो मृगेन्द्रस्य मृगेन्द्रगामी-'त्यत्रेव, 'विद्युत्वन्तं ललितवनिता' इत्यत्रैव वा, येनेदमधिगतक्रम-वक्रभावविच्छित्तिकमुपगम्येत। ततः—

'कश्चित् कान्ताविरहगुरुणा वर्षभोग्येण भर्तुः
शापेनास्तंगमितमहिमा धर्मलोपागतेन।' इति

योजनान्तरमत्र श्रेयस्करमुत्प्रेक्षामहे। न च 'नास्ति तथापि क्षेमः, शापतद्विशेषण-धर्मलोपागतत्वयोर्यक्षविशेषणीभूतास्तंगमितमहिमत्ववाचकपदव्यवहितत्वात्' इति वाच्यम्, हेतुवाक्यमुख्यार्थीभूते शापे तदपरिहार्यत्वसाधने भर्तृसम्बन्धित्वे, तद्गुरुत्वसाधने कान्ताविरहविषयकत्वे सति वर्षभोग्यत्वे चाखण्डिततया लब्धे तदौचित्यसाधनत्वमात्रौपयिकस्य धर्मलोपागतत्वरूपस्य

विशेषणस्य व्यवधाय बुद्धत्वेपि दोषानुभवाभावात् । अस्ति च धर्मलोपागतत्वं महिमलोपे साधनम् । ततो महिमलोपोपक्षेपानुव्याहृतिकत्वमेवात्र प्रत्युत श्रेयस्करम् । न च 'धर्मकर्मप्रमादी-'ति यक्षविशेषणतयैव धर्मलोपोपक्षेपे कृते नास्ति व्यवहितिभीति-'रिति वाच्यम्, तथा सति व्यवधानदोषाभासनेत्रांजन-परिहारे संभवत्यपि विरुद्धमतिकृत्त्वस्य प्रसक्तेः । ननु कीदृशं तदिति चेत् 'तथा सत्यस्तंगमितमहिमत्वस्यैत्र हेतुत्वं धर्मकर्मप्रमादस्यैव च तत्कार्यत्वमत्र प्रतीयेत', 'यतो यक्षः अस्तंगमितमहिमा ततो धर्मकर्मप्रमादी-'ति । सर्वथा विशेषणविन्यासक्रमोऽत्र कवेश्छन्दोयोजनादौर्बल्यं प्रत्याययति । वस्तुतः श्लोक-द्वयमत्र सुकविना निर्मातव्यम् एकं शापवृत्तान्ताय, अपरं च ततः परं प्रवासोदन्ताय ।

२. 'आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुम्—'

इत्यत्र प्रथमपदं प्रमुखत्वमात्रपरमिति निर्णीतमेवास्माभिः मेघालोक-शापावसानावधेः प्रसिद्धचातुर्मास्यपरत्वं निर्णीय । प्रमुखत्वाय च पद्येऽत्र प्रमुखमेव पदमत्र दातुं शक्यते । ततश्च तददत्वा तदर्थं प्रथमपदमुपाददता सुकविना दर्शितैवात्मनः अवाचकत्व-निहतार्थत्वान्यतरं प्रति अनवहितता । यदि च प्रतिपदेवात्र प्रथमपदाद् विवक्षिता तर्हि 'आषाढस्य प्रतिपदि तिथा-' वित्येवोच्येत । न च 'आषाढस्य मेघं प्रथमदिवस आश्लिष्टसानुं ददर्श-' त्यन्वयोऽत्र क्षेमंकरः, तथापि 'आषाढीयं प्रथमदिवसे श्लिष्टसानुं स मेघम्'-इति वक्तुं युज्येत, येनात्र गर्भितत्व-संदिग्धत्वा-भवन्मतयोगत्वादिकस्य शङ्का-पङ्कः परिक्षाल्येत ।

३. 'प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी
जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम् ॥'

इत्यत्र दयिताजीवितालम्बनार्थं मेघस्य 'जीवनस्य मूतः पटबन्ध' इति व्युत्पत्तिगर्भं जीमूतेति पदं स्वकीयं योगार्थमेव प्रदर्शयितुं सार्थकतां बिभर्त्ति । तदर्थं च कविनानेन 'जीमूतं तं स्वकुशलमयीं हारयिष्यन् प्रवृत्तिमि-'ति वचनोपन्यास आदरणीयः । एवं सति मेघपदार्थस्य प्रकरणादेव सुलभत्वे तदर्थं जीमूतपदोपग्रहोऽपुनरुक्ततामासादयेत्, आसादयेच्च स्वकीयं योगार्थं प्रति सचेतसां चेतोधातुं प्रवर्त्तयितुं कुर्वद्रूपताम् ।

---

१. अभिव्यक्तिरत्र वक्तव्यप्रतिपादनम्, न तु व्यञ्जनावृत्तिः ।

४. "धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
संदेशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥—" इति

पद्यस्य चतुर्थे चरणे यत् प्रकृतिपदं तत् संदर्भविरुद्धम् । तथाहि पदमिदमत्र स्वभावार्थकमेव संभवति, तेन यक्षस्य स्वभावे चेतनाचेतनाविवेककार्पण्यदोष आधीयते । एतेन च दोषेण तस्य प्रमत्तता पर्यवसीयते । ततश्च 'जातं वंशे भुवनविदित' इति, 'मार्गं तावच्छृणु कथयत' इति विवेकातिशयसौभाग्यभाञ्जि यानि तस्यैव वचांसि तानि स्वभावविरोधं भजन्ति । अस्ति चात्र [1]"प्रणयकृपणा' इति पाठः ।

किं च समापतत्येवास्मिन् पद्यार्थे प्रबन्धानौचित्यम् । ये कामार्त्तास्ते भवन्त्येव चेतनाचेतनेषु प्रणयकृपणाः कालिदासस्यैव हि तथाविधकार्पण्याय प्रथिताः 'पुरुरवःप्रभृतयो'ऽत्र प्रमाणम् । एवं कामार्तत्वेनैव प्रणयकृपणतायाः सिद्धौ को नु गुण एतस्य पद्यार्थस्योपनिबन्धने । न च तथोपनिबद्धमेतेन विक्रमोर्वशीये, न वा रघुवंशस्य रामवियोगप्रकरणे । आर्त्तिश्चेयमुपनिबद्धैव 'कामी' त्यादिभिर्विशेषणपदैः पूर्ववर्त्तिनि संदर्भे । इत्थं पद्यार्थ एष प्रकरणेऽत्र पुष्टात्मतां नासादयति ।

५. 'जातं वंशे भुवनविदिते पुष्करावर्त्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूप मघोनः ॥'

अत्र प्रकृतिपदेनादावर्थद्वयं प्रतीतिपथमुपयाति प्रधानरूपम्, अमात्यरूपं चेति । अनयोः प्रथमे नेयार्थता क्लिष्टता वा प्रसज्यते परत्र च निहतार्थता । तथा हि प्रथमे प्रकृतिपदात् प्रथमं सांख्यानां प्रकृतिरुपतिष्ठते, ततः तस्याः पर्यायः प्रधानम्, तदनन्तरं चाभिन्नानुपूर्वीकशब्दवाच्यतयाऽस्मादेव शब्दादन्यदप्येकं प्रमुखत्वपरं प्रधानपदमुन्मिषेत्, ततश्च कदलीगर्भपत्रन्यायेन विकल्पपरानन्तरं प्रकृतार्थानुगुण्यभाजोऽर्थस्यास्य स्यादुपलम्भः । ततश्च जायेतैव रसभोगे विलम्बः । द्वितीये प्रकृतिशब्दात् अमात्यरूपोऽर्थो निघण्टबलाद् राजशास्त्रप्रसिद्ध्या वा लब्धोऽपि कथंचित् पुरुषपदसाहचर्याज्जायेतैव सांख्यप्रकृति-

---

१—एतदर्थं द्रष्टव्योऽस्माकं 'कालिदासभारती'—तिलेखमालायाः पञ्चमो लेखः [सागरिका ५।४ अङ्के]।

स्मारकम्, ततश्च जायेतैवानभिमतवाच्यत्वकवलितम्। नास्ति हि अमात्यरूपेऽर्थे प्रकृतिशब्दस्तथा प्रतीतः 'प्रकृतिरेव सतामविषादिता' इत्यादिषु स्वभावरूपे तस्मिन् यथा। एवं च गवेषणमात्रलभ्य एवैषोऽर्थः, न च भवति गवेषणं रसभोगेऽनुगुणम्।

६. 'त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः
प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसन्त्यः ॥'

अत्र यत् पवनपदवीपदं तत् निहतार्थम्, 'क्वचित् पथा संचरते घनाना क्वचित् खगानां मरुतां क्वचिच्च' [रघुवं० १३] इति, 'वायोरमुं परिवहस्य वदन्ति मार्गम्' [शाकु० ७] इति च कालिदास एव वायुमार्गत्वेनाकाशस्थल-विशेषस्य प्रथमं प्रतीतेः, अलब्धप्रसरतया च पश्चादाकाशमात्रपरतया तदवगतेः।

७. 'कर्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्यां
तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः।
आ कैलाशाद् बिसकिसलयच्छेदपाथेयवन्तः
सम्पत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ॥'

अत्र मतुप्प्रयोगो व्यर्थः, समासवृत्त्यैव तदर्थलाभात्। न च प्राशस्त्यार्थं स इति वाच्यम्, आश्रयासिद्धेः। कथमिति चेत्, मतुबर्थानां भूमनिन्दादीनामेवा-त्राप्रसक्तेः। अत एव व्यक्तिविवेककारोऽत्र पौनरुक्त्यमेव पश्यति, त्वगुत्तरा-सगवतीमि' [कुमार–५] त्यत्रेव। अत एव च ब्रह्मणि भूमनिन्दादीनामसंगतेः 'अनादिमत् परं ब्रह्मे'ति गीतावचनम् अनादि च मत्परं वासुदेवश्रीकृष्णपरं चेति विच्छिद्य शोधयन्ति विज्ञाः।

८. रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत् पुरस्ताद्
वल्मीकाग्रात् प्रभवति धनुष्खण्डमाखण्डलस्य–'

त्यत्र 'चिन्तारत्नमिव च्युतोऽसि करतो धिङ् मन्दभाग्यस्य मे' इत्यत्रेव, 'हंसीव धवलश्चन्द्र' इत्यत्रेव वा भग्नप्रक्रमत्वं कृतपदमेव। कथमिति चेदेवम् 'यदिदमत्र प्रेक्ष्यत्वं तदेवात्र साधारण्येन विवक्षितमिति निर्विवादमेव। एतद्वाचकं च यत् प्रेक्ष्यमिति पदं तन्नपुंसकलिंगपठितत्वाद् शब्दवृत्त्या धनुष्खण्डरूपेण केवलेनोपमेयेनैवान्वेति, नोपमानेनापि रत्नच्छायाव्यतिकर-रूपेण, तद्वाचकस्य पुंसि पठितत्वात्। न च एकशेषेण पुं-नपुंसकयोर्मध्या-

न्नपुंसकत्वमात्रशेषमादाय साधारणधर्मसंगतिरिति वक्तुं शक्येत, तथापि व्यतिकरपक्षे कल्पनया शब्दविशेषप्रसवः, ततश्च तदुपनीतेनार्थेन वाक्यार्थोपपत्तिरिति विलम्बार्गलाबन्धान्नास्ति क्षेमंकर एष निर्वाहवृत्तान्तः। नास्ति चैकशेषस्य साहित्यशास्त्रसम्मतत्वम् अनुक्तितिरस्कृतत्वात्। अस्ति च तत्रापि गण्डोपरि स्फोटः, पृथक्शब्दाभ्यामुपस्थितयोर्धर्मयोः साधारण्यस्य पार्थक्यबोधबाधितत्वात्। तत्राप्यभेदसाधनाय कक्षान्तरकल्पनागौरवमंगीक्रियेत। ततश्च स्थित एवात्र चमत्कृतिभंगे विलम्बः।

६. "नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढै-
राविर्भूत-प्रथममुकुलाः कन्दलीश्चानुकच्छम्।
जग्ध्वारण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः
सारंगास्ते जललवमुचः सूचयिष्यन्ति मार्गम्॥"

इति मल्लिनाथादृते पाठेऽत्र क्रमेलकवदसस्थुलो वाक्यार्थः प्रहेलिकार्थं विडम्बयति। अत्र प्रथमं पूर्वार्धवाक्यार्थस्य तृतीयचरणारम्भकप्रथमपदप्रतीतार्थसापेक्षत्वाद् अर्थान्तरैकवाचकत्वरूपो वाक्यदोषः सुप्रतीतः, अपरं च पूर्वकालक्रियायास्त्रित्वेऽत्र द्वितीयक्रियावाक्यार्थसमुच्चयोऽनपेक्षितः, ततश्च तदर्थं द्वितीयपादे चकारव्याहृतिः पुनरुक्तैव। अस्मिंश्चोचिततयाभिमते प्रथमपादगततयापि तादृशस्य कस्यचित् समुच्चायकस्योपादानमभ्यर्हितम्। नास्ति च तदिति जागर्त्येवात्र वाच्यावचनत्वम्, न्यूनपदत्वं वा। नास्ति चात्राधिकं पुष्टम् अधिकत्वम् अधिकसुरभि-पदप्रतिपाद्यम्। सुरभि गन्धमाघ्रायेति वाक्यादपि प्रतिपाद्योपपत्तेरनुपपत्तेः। वस्तुतोऽत्र तृतीयचरणारम्भे यत् पाठान्तरं तदेव साधीयः। तच्च 'जग्ध्वा' इत्यस्य स्थाने 'दग्धे-'तिरूपम्। अस्ति चैतदभिमतं टीकाकृताम्। तेन हि पृथिवीगन्धसौरभ्ये यदाधिक्यं तदप्युपपद्यते, दग्धस्य मृत्पिण्डस्य तथादर्शनात्, कालिदासेऽपि

तदाननं मृत्सुरभि क्षितीश्वरो रहस्युपाघ्राय न तृप्तिमाययौ।
करीव सिक्तं पृषतैः पयोमुचां शुचिव्यपाये वनराजिपल्वलम्॥ इति

रघुवंशे तस्य तथैवोपपादितत्वदर्शनात्। न च भवति तथा समुच्चायकपौनरुक्त्यार्थान्तरैकवाचकत्वयोश्च व्यासंगः। परिह्रियते च तथा तथाकल्पितात्मनो न्यूनपदत्वस्य क्लृप्तिः।

अत्र सारंगपदमपि क्लिष्टार्थकम्। तद्धि कालिदाससाहित्ये तत्समकालिकेऽमरकोशे च मृगश्चातकश्चेति द्वयोरेवार्थयोः प्रसिद्धम्। यथा चैतत् तदमरकोशस्य—'चातके हरिणे पुंसि सारंगः' इति वचनात्, कालिदासस्यैव च—

हरिणार्थे १. रामस्त्वासन्नदेशत्वाद् भरतागमनं पुनः ।
आशंक्योत्सुकसारंगां चित्रकूटस्थलीं जहौ ॥ रघु० १२।२४

२. तवास्मि गीतरागेण हारिणा प्रसभं हृतः ।
एष राजेव दुष्यन्तः सारंगेणातिरंहसा ॥ शाकु० १।५॥

३. दूरममुना सारंगेण वयमाकृष्टाः ॥ शाकु० १।७॥

४. इमं तावत् प्रियाप्रवृत्तये सारंगमासीनमभ्यर्थये—
कृष्णशारच्छवियोंऽसौ दृश्यते काननश्रियाः ।
नवशष्पावलोकाय कटाक्ष इव पातितः ॥ विक्रमो० ४।५६॥

५. प्रथमं सारंगाक्ष्या प्रियया प्रतिबोध्यमानमपि सुप्तम् ।
अनुशयदुःखायेदं हतहृदयं संप्रति विबुद्धम् ॥ शाकु० ६।७॥

६. शरीरं क्षामं स्यादसति दयितालिंगनसुखे
भवेत् सास्रं चक्षुः क्षणमपि न सा दृश्यत इति ।
तया सारंगाक्ष्या त्वमसि न कदाचिद् विरहितं
प्रसक्ते निर्वाणे हृदय परितापं व्रजसि किम् ॥ मा० ३।१॥

—इत्येवं शब्दस्यास्य षोढा प्रयोगात्, प्रयोगाच्च

स्तूयमानः क्षणे तस्मिन्नलक्ष्यत स वन्दिभिः ।
प्रवृद्ध इव पर्जन्यः सारंगैरभिनन्दितः ॥ रघु० १७।१५॥

इत्येवमेकवारं चातकार्थे । ततश्चास्मिन् मेघपद्ये कुरंग-मतंगयोरपि यत् सारंगपदेनादानं तद् दुष्करमेव । यद्यपि पश्चाद्वर्त्तिनि विश्वप्रकाशनाम्नि महेश्वरकृतावनेकार्थकोषे 'सारंगश्चातके भृंगे कुरंगे च मतंगजे' इत्येवं कुरंगमातंगपरत्वमप्यस्य प्रसिद्धम्, तथापि कालिदाससमये तथाप्रसिद्धेरदर्शनादनुसन्धानमात्रनेयार्थकत्वमेतयोरर्थयोः, ततश्च सिद्ध एवात्र क्लिष्टत्वनामार्थदोषः ।

अत्र इदमप्येकमपरमनुसन्धेयं यत् प्रथमपादार्थकर्तृत्वेनोत्प्रेक्षिते भृंगरूपिणि सारंगपदार्थे नीपदर्शनस्य दग्धारण्येति पाठे च द्वितीयपादार्थकर्तृत्वेनोत्प्रेक्षिते मृगे कन्दलीदर्शनस्य कथमुपपत्तिः । तौ हि भृंगकुरंगौ नीपं कन्दलीं च घ्राणरसनाभ्यां भोक्तुं प्रतीतौ, न तु चक्षुर्भ्यां द्रष्टुम् । एवं सति दृष्ट्वेत्यस्य स्थाने स्पृष्ट्वेति पाठकल्पना समौचित्तीसुभगा स्यात् । सर्वथा एतेषु सर्वेष्वप्यर्थेषु सारंगशब्दस्य पुनरनुसन्धानरूपामावृत्तिं विना संगतत्वाभावादस्यैवैतत् पद्यं प्रहेलिकासोदरम्, ततश्च विप्रलम्भबन्धुरेऽस्मिन् काव्ये गड्डुभूतमेव ।

इदमपरमत्र संभाव्येत यत् यदि दृष्ट्वेत्येव पाठो मन्यते तदा कदाचित् सारंगपदं देशभाषापदमिव मनुष्यार्थकमपि भवेत्। वर्षारम्भे प्रायेण मनुष्या एव वृक्षविकारान् पार्थिवं गन्धं च सप्रहर्षमध्यक्षीकुर्वन्ति। अस्ति च देशभाषापदं संस्कृतेऽपि मान्यप्रयोगम्, मन्यते च स्वयं कालिदासस्यैव 'हाला' पदं मल्लिनाथस्तादृशमेव।

१०. 'नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतोः—

इति पद्ये यदिदं विश्रामपदं तत् पाणिनीयां व्याकृतिस्मृतिमनुसृत्य असाधुत्वविश्रान्तिपदमेव 'नोदात्तोपदेशस्य मान्तस्यानाचमेः-' इति वृद्धि—प्रतिषेधात्। 'प्रज्ञादिभ्यश्चे-'ति स्वार्थे अणि श्रामशब्दं संसाध्य विशिष्टार्थकेन 'वि'-पदेन 'प्रादिभ्यो गताद्यर्थे प्रथमये-'ति वार्त्तिकेन समासात् साधुत्वमुद्भाव्यते चेदुद्भाव्यताम्, श्रमापहारस्तु ततो द्योतयितुं न शक्येत, अस्ति चात्र स एव विवक्षितः। नास्ति च सोऽपि मार्गः प्रशस्तः 'अनाचमिकमिवमीनामिति वक्तव्यमि-'ति धात्वन्तराय वृद्धिवर्त्म निर्मिमाणस्य श्रमसंग्रहः क्रियते नु श्रमाय स्याद् वार्तिककर्त्तुः। का चावश्यकता तादृशवार्तिकारम्भस्य, 'प्रज्ञादिभ्यश्चे-'ति सूत्रेणैव काम-वाम-शब्दयोः सिद्धेः। ततश्च 'विश्रामो वे-'ति चान्द्रव्याकरणं शरणीकुर्वाणो मल्लिनाथ एवात्र युक्तदिक् यद्यपि चान्द्रस्यास्य व्याकरणस्य कालिदासपूर्ववर्त्तित्वाभावे तत्रापि न प्रसीदति गवेषकाणां चेतः। अतो **विश्रामं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुरि-'ति** शाकुन्तलप्रयोगोऽपि प्रयोगस्यास्यास्य सहयुध्वैव।

११. ता कस्यांचिद् भवनवलभौ सुप्तपारावतायाम्'—

इत्यत्र वलभीपदं दीर्घकारान्तमेव प्रसिद्धम्, गोपानसी तु वलभी-'ति नामलिंगानुशासनप्रमाणात्, ततश्च

'तेन दूतिविदितं निषेदुषा पृष्ठतः सुरतवाररात्रिषु।
शुश्रुवे प्रियजनस्य कातरं विप्रलम्भपरिशंकिनो वचः ॥र० १९। ८ इति,
'क्लृप्तपुष्पशयनाँल्लतागृहानेत्य दूतिकृतमार्गदर्शनः।
अन्वभूत् परिजनांगनारतं सोऽवरोधभयवेपथूत्तरम् ॥ र० १९।२३॥

इति च दीर्घकारान्तमपि दूतीशब्दं ह्रस्वीकुर्वतः कालिदासस्य वलभीपदेपि ह्रस्वीकरणप्रयासश्छन्दोमात्रनिर्वाहमूलक एव। यद्यपि 'दूत्यां दूतिरपि-' इति शब्दभेदप्रकाशमाश्रित्य दूतिशब्दः, अभिच्प्रत्ययेन च वलभिशब्दोऽपि

साधयितुं शक्यते, तथापि मार्गान्तरपरिग्रहः स्यादेवात्र क्लेशकरः। ततश्चात्र शब्दासाधुत्वरूपं च्युतसंस्कृतित्वं परिहरत्येव वाक्यार्थैकीभावनिष्कलुषताम्।

१२. ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी
पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति।
धौतापाङ्गं हरशशिरुचा पावकेस्तं मयूरं
पश्चादद्रिग्रहण - गुरुभिर्गर्जितैर्नर्तयेथाः॥'

अत्र प्रापिपदं दुरूहार्थकम्। मल्लिनाथस्तत्र क्रियाविशेषणत्वं, क्विबन्तत्वात् सप्तम्यन्तकर्णविशेषणत्वं वा पश्यति। तदुभयमपि प्रसादप्रासादच्युतम्। अत एव स्थिरदेव-चारित्रवर्धन-दक्षिणावर्त्तनाथ-पूर्णसरस्वती-परमेश्वरैः 'कुवलयदलक्षेपी-'ति पठ्यते। उद्ध्रियते च मल्लिनाथेनापि तेषामेष पाठः। पाठान्तरमिदं बर्हविशेषणतया नीयते ततश्च तेषां मते क्विबन्तत्वात् सप्तम्यन्तत्वसाधनेन जायमाना दुर्गतिर्न प्रसज्यते। वस्तुतः मल्लिनाथपाठः संस्कारद्वयेन निर्मितः। एको वल्लभदेवपाठसंस्कारः, परश्च दक्षिणावर्त्तनाथपाठसंस्कारः। वल्लभदेवः कुवलयपदप्रापि-'इति पाठं मनुते, ततश्च प्रापीति वल्लभात्, दलपदं च दक्षिणावर्त्तादादाय 'कुवलयदलप्रापी-'ति पाठः प्ररोहति। अनेन च सांकर्येण, किं नु चित्रं यदि व्यालुप्येत मूलम्। यद्यपि 'रुदता कुत एव सा पुनर्भवता नानुमृतापि लभ्यते' इत्यादिषु क्विबन्तत्वं मल्लिनाथादिभिः प्रसाधयितुं यत्येत तथापि वस्तुतः तत्रापि वर्त्ततेऽसावेव दोषः। अत एव च महिमाचार्यस्तत्र न ह्येव श्रद्धत्ते। सति च सरले पथि क्लिष्टेन तेन को नु सचेता प्रसरीसरीतु।

१३. 'आराध्यैनं शरवणभवं देवमुल्लंघिताध्वा
सिद्धद्वन्द्वैर्, जलकणभयाद् वीणिभिर्मुक्तमार्गः।
व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्यन्
स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्तिम्॥

अत्र आलम्भशब्दो मीमांसामात्रप्रसिद्धः ततस्तच्छास्त्रानभिज्ञं प्रति नितरामेव रसप्रतीतिविघ्नविधाता। मल्लिनाथः शब्दमेतं संज्ञपनशब्देन विवृणोति। तदपि च तथैव मीमांसाप्रसिद्धमेव। अमरकोशे शब्द एष वधार्थकतया गणितः—'आलम्भपिञ्जविशरघातोन्माथवधा अपी'—ति। मीमांसकाः पुनः शब्दमिममिदानीमन्यथयितुं प्रयतिताः। ते हि गोवधविरोधाय गवालम्भं गवां स्थानविशेषे बन्धनेन चरितार्थयन्ति। यच्च मल्लिनाथस्य संज्ञपनं तदपि यस्माद् धातोः निष्पद्यते तस्यापि प्रथमतमोऽर्थः मारणमेव। यथा चैतत् तत्

पाणिनीयाद् धातुपाठादेव प्रतीतम्—'मारण-तोषण-निशामनेषु ज्ञा' इत्यस्माद् । भानुजिदीक्षितः अनयो द्वयोः एतत्सहचरितानामन्येषां चाष्टाविंशतेः अमरसिंह-पठितानां 'त्रिशन्मारणस्य' इति मारणार्थकत्वमेव पश्यति । न च संभवति गवा मारणं विना तेषां रुधिरप्रवाहः, न च संभवति ततो नदीविशेषस्य निर्माणम् । इयमेव च स्थितिः तेषु सर्वेष्वपि स्थलेषु येषु केचित् अप्रसिद्धाः पुराणकथांशाः कविनानेनोपनिबद्धाः ।

१४. 'हस्ते लीलाकमलमलके बालकुन्दाविद्धम्—'

—इति यदनुविद्धमिति पदं सुकविना प्रयोज्यते तत्र स्पष्टमेव श्रुतिकाटवम् । मल्लिनाथो 'नपुंसके भावे क्तः' इति निष्ठाप्रत्ययस्यात्र भावार्थकत्वं मत्वा शब्दमिममनुवेधार्थकं मनुते । तत्र छन्दोयोजनायां स्वयमनुवेधशब्दस्यापि शक्यक्रियत्वात् पापात् पापीयाननुविद्धशब्दः । 'हस्ते लीलाकमलम् अलके बालकुन्दप्रसूनम्' इति यथाप्रक्रममेव कथयितुमुचिते तद्विपरीतं कथनेन प्रक्रमभङ्गोपि न नात्र स्फुटः । अस्ति च दक्षिणावर्त्तनाथोऽत्र अनुवेधस्यैव पाठस्वदर्शी । स्थिरदेव-चारित्रवर्धनावपि तथाविधमेवान्यमप्येकमिमं पाठमत्र पश्यन्ति 'बालकुन्दानुबन्ध' इति । ततो मल्लिनाथस्य कोन्वत्र व्यामोहः यदसौ परिशीलितदक्षिणावर्त्तनाथपाठोऽपि सदोषमेव पाठं मूलाकरोति ।

१५. 'यत्र स्त्रीणां प्रियतमभुजालिङ्गनोच्छ्वासितानाम्—
अङ्गग्लानिं सुरतजनितां तन्तुजालावलम्बाः ।
त्वत्संरोधापगमविशदैश्चन्द्रपादैर् निशीथे
व्यालुम्पन्ति स्फुट-जल-लव-स्यन्दिनश्चन्द्रकान्ताः ।'

अत्र किं तावत् तन्तुजालमिति निश्चेतुं न शक्यत इति सन्दिग्धार्थत्व दोषः । अत एवात्र 'यन्त्रजालावलम्बाः' इत्यपि पाठं केचिदाद्रियन्ते । मल्लिनाथः पदस्यास्यार्थं 'वितानलम्बिसूत्रपुञ्ज धारा' इति करोति । तदप्यव्यक्तमेव । चारित्रवर्धनः पुनरत्र 'तन्तुमयं जालमानायस्तत्रावलम्बते प्रसादानामुपरितनेषु भागेषु चन्द्रमणिबन्धरचना तन्तुजालस्थिता इति भाव' इति टीकते । हिन्दी-व्याख्यातारः 'झालर' इतिपदवाच्यं वस्तु तन्तुजालपदाभिप्रेततया नयन्ति ।

१६. 'सा संन्यस्ताभरणमबला पेशलं धारयन्ती
शय्योत्सङ्गे निहितमसकृद् दुःखदुःखेन गात्रम् ।
त्वामप्यस्रं नवजलमयं मोचयिष्यत्यवश्यं
प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ॥'

—इति पद्यस्य चतुर्थे पादे योऽर्थान्तरन्यासः स समर्थ्यमर्थं पोषयितुं नास्ति प्रकामं शक्तः । आर्द्रान्तरात्मत्वं ह्यत्र करुणावृत्तित्वे तन्त्रम्, तच्च मेघे

जलक्लिन्नतारूपं सत् न कार्यक्षमम्, मेघस्य जडत्वात्, दयालुतारूपस्यान्तःकरणार्द्रत्वस्यासंभवात्। अभिन्नानुपूर्वीकशब्दवाच्यत्वेन चेतनाचेतनार्द्रत्वयोरैक्यसंपादनेऽपि न कुशलम्, तस्य प्रातिभासिकत्वसिद्धौ

'अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम्।
एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ॥'

इत्यत्रैव समर्थ्यसमर्थकत्वानुपपत्तेः। अत एव च व्यक्तिविवेककृत् प्रत्याचष्ट एवंविधामलंकृतियोजनामवाच्यवचनप्रसंगे

'सद्वृत्ते महति स्वभावसरले बद्धोसि यस्मिन् गुणैर्-
युक्ते संयमहेतुतामुपगते यत्रापि विश्राम्यसि।
तस्याक्षेपपरम्पराभिरभितो दोलायमानस्थिते-
रालानस्य मतंगजेष कतमो निर्मूलने दुर्ग्रहः ॥

पद्यमिदमुदाहृत्य-'यत्राप्रस्तुतार्थस्य श्लेषमुखेन असन्नेवोत्कर्षोऽपकर्षो वा तदितरस्य तथाप्रतिपत्तये अभिधीयते नासौ तात्त्विक इति न तत्र तामाधातुमुत्सहते, तयोर्बिम्बप्रतिबिम्बभावेनोपगमादित्यवाच्य एवासौ, तस्य वचनं दोष' इति भूमिकामारचयन्, 'अत्र सद्वृत्तादिभिर्विशेषणैरसन्नुदस्यालानस्याप्रस्तुतस्य श्लेषबलोपकल्पितेन सदाचारत्वादिधर्मसम्बन्धेनोत्कर्षोऽभिहितः, न चासौ वास्तव इति तदुन्मूलनग्रहो गजस्योचित इति न दुष्ट इति उपालम्भयोग्यत्वं तत्रासिद्धमेवे'-त्युपसंहारं चाबध्नन् [अस्मदनूदिते पृ० ४४५]

१७. 'शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्तात्
कर्णे लोलः कथयितुमभूदाननस्पर्शलोभात्।
सोऽतिक्रान्तः श्रवणविषयं लोचनाभ्यामदृष्ट-
स्त्वामुत्कण्ठाविरचितपदं मन्मुखेनेदमाह' ॥—नि

पद्ये 'उत्कण्ठायाः' स्वशब्दवाच्यत्वं जनयत्येव रसदोषं वमनाख्यम्। चरणत्रयार्थात् सात्र स्वयमेव पर्यवस्यति। प्रोषितस्य वैषम्यातिशयोपस्थितौ तस्याः स्वाभाविकत्वात्। अस्ति च वैषम्यमत्र सोऽतिक्रान्तः श्रवणविषयमित्यादिना ससंरम्भमारचितं सुकविना। ततश्च 'त्वन्मात्रप्रणिहितमना' इति, अन्यथापि वेत्थमेवात्र पाठः परिवर्त्तनीयः। 'औत्सुक्येन कृतत्वरा' इत्यादिषु पुनः तादृशामौत्सुक्यादीनां स्वशब्दवाच्यत्वम् अन्यथानुपपत्तिबलादभ्युपेतमेव। एवमेव 'धूमज्योतिःसलिलमरुतां सन्निपातः' इत्यत्रापि उत्कण्ठार्थकस्यौत्सुक्यशब्दस्य प्रयोग आवश्यकः, उपायान्तरे तस्य तत्र बोधनाभावात्। असति च तदुपनिबन्धे निर्हेतुत्वदोषप्रसंगात्। न च चतुर्थचरणेनात्र समर्थित एव

चरणत्रयापस्थापितोऽयं इति नास्ति निर्हेतुत्वप्रसक्तिरिति वाच्यम् अर्थान्तरन्यासस्थले समर्थनीयस्य वाक्यार्थस्य पूर्णताया एव प्रतिष्ठितत्वात्, असति च तादृशौत्सुक्यप्रतिपादके पदे जाग्र्यादेव तत्र वाक्यार्थाविरामः। ततश्च स्थितमेतद् यदत्र सञ्चारिभावस्य स्वशब्दवाच्यत्वस्योचितत्वेपि प्रागुद्धृते शब्दाख्येयमिति स्थलेऽनुचितत्वमेव। एवमेव

१८. 'संक्षिप्येत क्षण इव कथं दीर्घयामा त्रियामा
सर्वावस्थास्वहरपि कथं मन्दमन्दातपं स्यात्।
इत्थं चेतश्चटुलनयने दुर्लभप्रार्थनं मे
गाढोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः॥'

—इत्यत्रापि वियोगव्यथायाः स्वशब्दोल्लेखोऽनुचितः। वियोगो हि चित्तवृत्तिविशेष एव 'वियुक्तास्मी–' ति रूपः, अत एव मानपरिग्रह एकशयनपरिस्थितावपि जागर्त्येव तदनुभवः। तज्जनिता या व्यथा सापि न नास्ति चेतोधर्मः। स्वशब्दवाच्यतातिरस्कारः तौ द्वावप्यत्र व्यथयते। तदत्र 'शापवेलाभिराभिः' इतीव किंचित् कवनीयम्।

१९. 'शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ'—

—इत्यत्र प्रसज्येतावाच्यवचनम् 'आषाढस्य प्रथमदिवसे' इत्यत्र यदि प्रथमपदेन प्रतिपदेवादीयेत। यथा चैतत् तत् प्रतिपादितपूर्वमेवास्माभिः।

२०. 'एतस्मान्मां कुशलनमभिज्ञानदानाद् विदित्वा
मा कौलीनादसितनयने मय्यविश्वासिनी भूः।
स्नेहानाहुः किमपि विरहे ध्वंसिनस्ते त्वभोगा-
दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति॥'

—इत्यत्र 'अभोग'-पदस्य स्थाने 'भोगाभावादि' ति पर्युदासस्थाने प्रसज्यप्रतिषेधः करणीयः, तथा सत्येव अभावस्य प्राधान्यात्। यदि च प्रसज्यप्रतिषेधेपि समास इष्यते तर्हि 'अलब्धजन्मता' इत्यत्रापि स इष्यताम्, इष्यतां च 'क्षणमप्यमुक्ता' इत्यत्रापि। न च भावार्थकात् कृदन्तशब्दादेव भोगादिना नञ्समासे प्रसज्यप्रतिषेध इष्यते नान्यत्रेति वाच्यम् अनुभवविरोधात्। न हि य एवानुभवः 'भोगाभाव'—पदाद् भवति स एव 'अभोग-' पदात्। एकत्र हि भोगप्रतियोगिकः अभावः, अपरत्र च अभावप्रतियोगिकः भोगः। एकत्र अभावे भोगो विशेषणम्, अपरत्र च भोगे अभावः। विशेषणविशेष्यभाववैलक्षण्येऽपि यदि बोधे वैलक्षण्यं नाभ्युपेयेत तर्हि नाभ्युपेयेत तत् कुत्रापि नीलपीतादौ, न्यायसाम्यात्, वैलक्षण्यस्य भेदप्रयोजकत्वानंगीरात्।

किं च मल्लिनाथदृशा यदि अभिज्ञानशब्दः मरणशंकानिवारणार्थकः तर्हि पद्येऽत्र कुशलपदं व्यर्थम्। नास्ति चाभिज्ञानेन मरणाभावेन चात्र सम्बन्धः। अभिज्ञानस्य परस्परसंगराहित्यमात्रप्रतिपादनपरत्वेनात्रोपादानात्। कौलीनात् परस्त्रीसंगो मयि तथाविधस्वप्नगतपरस्त्रीसंगकल्प इति तत्र प्रतिपादनात्। एवं जागर्त्येत्र मल्लिनाथदृशात्र वाक्यार्थदोषः।

२१. 'आश्वास्यैवं प्रथमविरहोदग्रशोकां सखीं ते
शैलादाशु त्रिनयनवृषोत्खातकूटान्निवृत्तः।
साभिज्ञानप्रहितकुशलैस्तद्वचोभिर्ममापि
प्रातःकुन्दप्रसवशिथिलं जीवितं धारयेथाः॥'

—अत्र यक्षीप्रतिसंदेशात् स्वजीवितालम्बनप्रार्थनमुपक्रमविरुद्धम्। उपक्रमे हि नभःप्रत्यासन्ने दयिताजीवितालम्बनार्थितयैव मेघं प्रति यक्षकृतस्य स्वकुशलप्रवृत्तिप्रेषणप्रणयस्योपनिबद्धत्वात्। एतस्यात्रान्तरप्रयोजनतया कथंचिदौचित्यसाधनेऽत्रैव प्रतिवचनेषु साभिज्ञानत्वोक्तिकृतस्यानौचित्यस्य को नु समाधिः। ननु किमत्रानौचित्यमिति चेदभिज्ञानाभावे विश्वासाभावोपस्थितिरेव तत्। प्रार्थनीयस्य चरित्रे दोषदृष्टिरिष्टसिद्धावत्र प्रत्युत विपरीता स्यात्। यत्र मघोनः प्रकृतिपुरुषता, पुष्करावर्तकवंशजातता च दृष्टा तत्र वाभिज्ञानं विना शंकनीयवचनताया दर्शनमत्र प्रकृतिविरुद्धम्, तथा सति विक्रमोर्वशीये वासवसंदेशेन सहाभिज्ञानस्याभावात् तत्प्रापके देवर्षौ नारदेऽपि शंकास्पदवचनता प्रसज्येत। किं च यक्षीं प्रति मेघोऽपरिचितः। ततस्तस्यै प्रेषिते संदेशे अभिज्ञानं सदेशसत्यापनायावश्यकम्, यक्षस्तु परिचित एव मेघेन, तस्य स्वस्या अपि अभिज्ञानानयनप्रार्थनं विश्वास्यतातिरिक्तप्रयोजनकं न सिद्ध्यति। तच्च यथानुचितं तत् प्रतिपादितमेवानुपदमेव। वस्तुतः पद्यमिदं प्रक्षिप्तं प्रतीयते।

२२. 'कच्चित् सौम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे
प्रत्यादेशान्न खलु भवतो धीरतां कल्पयामि।
निश्शब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः
प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव॥'

—अत्र प्रत्यादेशपदमवाचकत्वदूषितम्। तद्धि अमरकोशे स्वयं कालिदाससाहित्ये च निराकरणमात्रसंकेतितमुपलभ्यते। नास्ति चात्र तदेतत्परम्। अत्र समर्थकार्थान्तरवाक्यघटकीभूत- प्रत्युक्त--पद--समर्थनीय-प्रतिवचन--मात्रपरतयैव प्रयोगात्। नास्ति च प्रतिवचनरूपिणि अर्थे तस्य व्यवहारादिकं यतस्तस्यात्र शक्तिरुपगम्येत। यद्यपि 'उक्तिराभाषणं वाक्यमादेशो वचनं वचः' इति मल्लि-

नाथोद्धत तु शब्दार्णववचनाद् आदेशशब्दस्य वचनपरत्वे सिद्धे प्रत्यादेशशब्दस्य प्रतिवचनपरत्वं शक्यत एव लब्धुम्, तथापि तत्रापि निहतार्थता तं निगिरत्येव। प्रसिद्धस्य निराकरणरूपस्यार्थस्य प्रथमप्रतीततया प्रतिवचनरूपस्य तस्य प्रतिहतगतिकत्वात्।

न च 'अप्रत्यादेशाद्धीरतां न कल्पयामीति अकारप्रश्लेषेण मौनलम्भय र् निराकरणांगीकरणयोर्मध्यात् प्रथमस्य परिहारः, उत्तरार्धपादाभ्यां च द्वितीयस्य संसाधनमि' ति नास्ति दोष' इति वाच्यम्, मौनगमकस्य पदस्याभावप्रसक्त्या न्यूनपदत्वप्रसक्तेः। किंच प्रणयिषु 'कर्तुमसमर्थोऽस्मी—'ति स्वीकाराभाव एव सभ्यजनप्रथितः, न तु 'न करिष्यामी—'ति निराकरणम्, असभ्यजनोचितम्। ततश्चात्र स्वीकाराभावकल्पनाया एव निराकरणं स्वरसप्राप्तम्, तदेव चोत्त-रार्धगताभ्यां दृष्टान्तार्थान्तरन्यासाभ्या समर्थ्यते। अतएव प्रत्यादेशादधीरताम् अप्रत्यादेशाद् धीरतामिति पक्षद्वयकल्पनमपि निरर्थकमेव। याचकस्य मान-भङ्गेऽपि याच्यमानानादरेऽनधिकारात् अप्रत्यादेशाद् धीरताकल्पनपक्षेऽपि नितान्तमावश्यकस्य मौनवाचकस्यानुपलब्धिप्रसक्तेः। ततो व्यर्थ एवात्र तथाविधप्रश्लेषाश्लेषक्लेशः।

अत्र व्यवसितपदमपि प्रायेण प्रत्यादेशपदसजातीयमेव। तत्र आद्यकर्मणि क्ते कृते कर्तुमारब्धमिति कथंचिदुचितार्थपरिकलनात् संजाघटीति दोषपातात् चमत्कृतिरक्षा। व्यवसायशब्दस्य निश्चयपरत्वं तु मल्लिनाथमतेर्विपर्यासः एव।

२३. एवमेव अतिवाहयेदिदऽत्यस्य स्थाने वाहयेदिति ब्रुवाणः कालिदासः विदधातेःस्थाने दधातिमिव प्रयुनक्ति २८ पद्ये।

२४. 'देवगिरिमि'ति वक्तव्ये 'देवपूर्वं गिरिमि'-ति ब्रुवाणोऽवाच्यं वक्ति ४२ पद्ये।

२५. 'आसीनानां सुरभितशिल नाभिगन्धैर्मृगाणामि'ति पद्ये उपमेयकोटौ मृग स्थानीयं किञ्चिदपि नास्तीति न्यूनपदत्वमुपमादोषः।

२६. 'तं चेद् वायौ सरती'-ति पद्ये सरतिः गतिमात्रमुपस्थापयति, नतु तीव्रा गतिमिति सामर्थ्यच्युतमेवेदम्।

२७. 'ये संरम्भोत्पतने'-ति पद्येऽपि 'स्व'-पदं मेघपरतया विवक्षितं शरभपरतया प्रतीयते।

इत्येवमन्येऽपि दोषा मेघदूतपद्येष्वनेकशो जाग्रति।

कालिदासस्य काव्ये राष्ट्रियभावना सांस्कृतिकचेतना च

डॉ० कैलाशनाथ द्विवेदी

विश्वकविषु, संस्कृतसाहित्यस्य महाकविषु कालिदासेनैव गौरवमयं स्थानं प्राप्तमस्ति। कविकुलगुरोः कालिदासस्य कान्तासम्मिता सुन्दरभावाभिव्यक्तिपूर्णा भारती राष्ट्रियभावनासांस्कृतिकचेतनाभ्यां समन्विता वर्त्तते; यस्याः मार्मिकानुभूतिः केन सहृदयेन न कृताऽस्ति। महाकवेरमरकृतिषु साहित्यिकविविधपक्षेषु न केवलं भारतवर्षेऽपितु विश्वस्यान्यदेशेष्वधिकं कार्यं सञ्जातम्, किन्तु तासु व्यक्तस्य राजनैतिक-धार्मिक-सांस्कृतिक-भौगोलिकादिशास्त्राणा व्यापकस्य ज्ञानस्य व्याख्या स्वल्पमेव सम्पादिता सुधीभिः। संक्षिप्तेऽस्मिन्निबन्धे समीक्ष्यतेऽत्र मया महाकवेरमरकृतिष्वभिव्यक्ते राष्ट्रियभावना सांस्कृतिक चेतना च।

महाकविना मनोहारिण्याः भारतभूमेरनन्यया शोभया नेत्रनिर्वाणं लब्ध्वाऽस्याः भौतिकाङ्गानां सचेतनरूपे चित्रणं कृत्वा राष्ट्रस्याशेषाः मनीषिपुरुषा ता प्रत्युद्बुद्धाः। तस्य पृथिव्याः मानदण्डः हिमालयो नाम नगाधिराजः 'देवतात्म'-रूपे मण्डितोऽस्ति—

"अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः॥"[1] इति

विरही यक्षः रामगिरिं[2] चेतनरूपे दृष्ट्वा मेघं तस्यानुमतिं प्राप्तुं कथयति। महाकविकालिदासस्य रसिकता यथास्थानं स्वसाहित्यिककलायाः संस्पर्शं कुर्वती एषां राष्ट्रियप्राकृतिकरूपाणां माध्यमेन भारतभूमेः नयनाभिरामां शोभा प्रस्तौति।

१—कुमारसम्भवे–१/१

२—पू० मेघदूते। १२ आपृच्छस्व प्रियसखममुं तुंगमालिंग्य शैलम्.......।

कुत्रचित् पक्वाम्रफलैर्वृतः मेघखण्डमयसानुमानाम्रकूटः[१] कविना पृथिव्या स्तन इवोत्प्रेक्षितः, क्वचिच्च सागरसलिलवसनादनावृतः सह्याद्रिस्तस्याः नितम्ब इव प्रतीयते[२]। नीचगिरेः शिलावेश्मभिः सोद्दामयौवनयुक्तया विलासवार्तया कविः तत्कालीनाः सांस्कृतिकसामाजिकस्थितीः मूकस्वरेण घोषितवान्[३]। गंगासरय्वोरिव सरित्संगमाः कविना श्रेष्ठतीर्थरूपे मोक्षदायकाः परिकल्पिताः[४]।

चित्रकूटे वक्रपर्वतीयमार्गेण प्रवाहिता मन्दाकिनी[५] पृथिव्याः मुक्तावलीव प्रतिभाति। मुक्ताफलप्रसविनीताम्रपर्णीसदृशाः[६] नद्योऽपि राष्ट्रस्यार्थिकसमृद्धौ नाल्पाः सहायिका आसन्। अध्योध्यायाः[७] सरयूः मथुरायाः[८] यमुना, दशपुरस्य चर्मण्वती,[९] उज्जयिन्याश्शिप्रा,[१०] पुष्पपुरस्य[११] गंगा, महिष्मत्याः[१२] नर्मदादिनद्योऽस्य देशस्य नगराणामार्थिकव्यापारिकधार्मिकसांस्कृतिकैतिहासिकसमृद्धेर्न केवलं साक्षिण्य आसन्नपितु तस्याः परमपोषिका अपि वस्तुतोऽभवन्। सलिलवसनाया वसुधाया एतानि जलीयरूपाणि महाकविना राष्ट्रस्य प्राकृतिकसुषमारूपे तु दृष्टान्येव तेन समं सांस्कृतिकसमृद्धावपि एते सहायकाः स्वीकृताः सन्ति।

---

१. पू० मेघदूते। १८—'छन्नोपान्तःपरिणतफलद्योतिभिः काननाम्रै-
स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे।
नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां,
मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः॥'
२. रघुवंशे—४/५२, ५८।
३. पू० मेघो—२७ नीचैराख्यं गिरिमधिवसेस्तत्रविश्रामहेतोः······।
४. रघुवंशे ८/९५ तीर्थेतोयेव्यतिकरभवे जह्नुकन्या सरय्वोर्देहत्यागादमरगणनालेख्यमासाद्य सद्यः।
५. रघु० १३/४८ एषा प्रसन्नास्तिमितप्रवाहा·····मुक्तावली कण्ठगतेव भूमेः।
६. रघुवंशे—४/५०
७ रघु० ९/२०, १३/६१, ६२।
८. रघु०—६/४८, ४९।
९. पू० मेघे—४९, ५१।
१०. पू० मे०—३१।
११. रघुवंशे—६/४८।
१२. रघु०—६/४३।

कालिदासेन महाकविना नानाजलीयरूपाणामपि मानवीकरणमाध्यमेन चेतनवच्चित्रणं कृतम्—तस्य मनोहारिण्यो नद्योऽपि विलासिन्याः नायिकायाः रूपे क्वचिज्जलावर्ते गंभीरनाभिम्[1], क्षीणधारायां स्निग्धवेणीं[2], सलिलवसनाद्नावृत्ते उपतटे पीननितम्बं[3], फेनिले जले कलहास्यं[4], तरंगेषु चारुभ्रूभङ्गम्[5], हंसध्वनौ नूपुररवं[6] विहंगमानां कलनादे[7] कांचीरवं व्यक्तवत्यः दृश्यन्ते। नानावन[8]नदनदी[9]पर्वतोपत्य[10]कासरोवराणा[11] प्राकृतिकसौन्दर्यसमन्वितैर्दृश्यैः कविरस्माकं नेत्रनिर्वाणमकारयत्। अनेन वयं भारतीयसंस्कृतौ निहितां व्यापिकीं चेतनामनुभवामः। यतः काव्यकलया समं एषु प्राकृतिकस्थलेषु राष्ट्रस्य प्राचीनगौरवमप्यस्याभिरनुभूयते।

तत्कालीनं सम्पूर्णं राष्ट्रं विविधेषु लघुगुरुराज्येषु विभक्तमासीत्तथापि महाकविरस्मिन्, विभक्ते रूपेऽपि राष्ट्रव्यापिन्या अखण्डताया एकतायाश्च शोभनोद्भावनां कृतवान् या द्वयोः रूपयोरस्माकं पुरत आयाति—

(१) रघुदिग्विजयप्रसगे महाकविः, रघुणा राष्ट्रस्य बाह्यसीमासु यौद्धिकाभियानं कारयित्वा तस्य दिग्विजयमार्गवर्णनव्याजेन बृहत्तरभारतस्यादर्शसीमाः निर्धारितवान्। (द्रष्टव्यः रघुवंशस्य चतुर्थसर्गः)।

(२) इन्दुमत्याः स्वयंवरस्य व्याजेन रघुवंशे षष्ठसर्गेऽपि कविना देशस्य दूरस्थकोणानां राज्ञोऽपि विदर्भसदृशे राष्ट्रस्य हृदयवत् केन्द्रवर्तिराज्ये एकत्रितान् चित्रीकृत्य तेषां सांस्कृतिकयेकता विवाहतुल्यरक्तसम्बन्धेन प्रतिपादिता। दृष्ट्यानया स्थान एव राष्ट्रियकविरूपे महाकविः महत्त्वशाली मन्यते मनीषिभिः।

१—पू० मेघे—२८ दर्शितावर्तनाभेः······।
२—पू० मे०—२९ वेणीभूतप्रतनुसलिला:······।
३—पू० मे० ४५।
४—विक्रमोर्वशीये-४/२८ तरंगभ्रूभंगा······।
५—पू० मेघे—२४ सभ्रूभंगमुखमिव पयो···।
६—ऋतुसंहारे—३/१, विक्रमो० ४/१७।
७—पू० मेघे—२८ वीचिक्षोभस्तनित विहगश्रेणिकाँचीगुणायाः।
८—रघुवंशे—५/४२,४२,१६/३१, ३२, ऋतुसंहारे—२/८ पू० मे० १७,१८।
९—कुमारसंभवे—१/१-१२, रघु० २/६८, पू० मे० २७।
१०—अभिज्ञानशाकुन्तले, पंचमेऽङ्के—'हिमगिरेरुपत्यकारण्यवासिनः······'।
११—रघु० १८/३१ 'त्रिपुष्करम्'।

स्व० डॉ० वासुदेवशरणाअग्रवालमहोदयस्यापि[1] इयमेव सुविचारिता दृष्टिः वर्तते ।

महाकविरुपर्युक्तेषु सन्दर्भेषु वर्णितानां[2] राज्यानामार्थिकधार्मिकराजनैतिक सांस्कृतिकसमृद्धिं सलक्ष्या च तैः समं [3]पुलिन्दकिरात[4]वनेचर[5]नागा[6]नामनेकासामादिमजातीनामप्युल्लेखं कृतवान् । संभवतः इमे आदिमजातीयजनास्तस्मिन्युगे शक्तिसम्पन्नां राज्याना प्रभुतां स्वीकृत्य राष्ट्रियसमाजस्य जनजीवनेन घनिष्ठरूपेण सम्बन्धिता आसन् ।

महाकविः स्वकृतिषु स्वदेशस्य यानि नगराण्युल्लिखितवान्, तानि सम्राणायाः समृद्धिशालिन्याश्च भारतीयसंस्कृतेः सर्वेषां पक्षाणां शोभनां व्याख्या प्रस्तौति । [7]तस्योज्जयिनी[8]विदिशामथुरा[9]पुष्प[10]पुरायोध्या[11]दिनगर्यः धर्मार्थकामपुरुषार्थैः पूर्णाः भौतिकात्मिकसमृद्ध्योरन्तिमां सीमामधिगतवत्य आसन् । ताः धर्मराजनीतिशासनकलावाणिज्यशिक्षादिविषयाणां केन्द्रीभूय देशविदेशेषु गौरवान्विता बभूवुः ।

कालिदासेनोल्लिखिता [12]ऋषिमुनीनामाश्रमास्तीर्थ[13]मन्दिरादीनि च प्राचीनभारतस्याध्यात्मिकोत्कर्षपूर्णाया उपलब्धेः कीर्तिमयीं कथां कथयन्ति ।

१—'भारत की मौलिक एकता' नाम्नि ग्रंथे, पृ० १५४, प्रथमे संस्करणे ।
२—द्रष्टव्यौ रघुवंशे चतुर्थषष्ठसर्गौ ।
३—रघु० १६/१९, ३२ ।
४—रघुवंशे—४/७६, कुमार० १/६, १५ ।
५—कुमार०—१/१०, पू० मे० २० ।
६—कुमार—१/२०, रघु० १६/७६, ८०, ६/४९ ।
७—रघुवंशे—६/३२, पू० मेघे—३२ ।
८—पू० मेघे—२६, मालविकाग्निमित्रे—५/१० ।
९—रघु० ६/४८, १५/३६ ।
१०—रघु० ६/२४-नेत्रोत्सवं पुष्पपुराङ्गनानाम् ।
११—रघु० ११/९३, १ /१०, २९, १५/३८, ६०, १६/२५ ।
१२—रघु०—१/३५, ४८, २/६७ (वशिष्ठाश्रमः); ५/१, ४, २० (वरतन्तुः) ११/२२-२३ (वामनाश्रम) ।
१३—अभिज्ञानशाकु० १/१३ ततः परान्ते सोमतीर्थम् ५/३१ शचीतीर्थशक्रावतारौ, रघु० १५/१०१ गोप्रतर ।
१४—पू० मेघे—६, ३४, ३७, ४० ।

वस्तुतः परम्परारूपेण पावनाश्रमाणामेषां चित्रणं कृत्वा कविः करुणाक्षमा-दयापरोपकारतपोमयभारतीयजीवनस्य समुज्ज्वलान्तःपक्षस्य मनोमोहिनीं छटां दर्शयित्वा भारतीयसंस्कृतेश्चरमादर्शं प्रति विश्वं विशेषेणोन्मुखीकृतवान्। सामान्यतया कविना वर्णिताः सर्वे आश्रमाः यज्ञतपःशिक्षास्थानरूपेष्वपि गृहस्थधर्मेभ्यः पराङ्मुखाः नासन्निति सुव्यक्तमेव तस्य कृतिषु। ते सम्पूर्णराष्ट्रस्य भौतिकाध्यात्मिकाभ्युदये महत्त्वपूर्णं योगमददुः। राज्यसंरक्षणं लब्ध्वाऽपि इमे स्वतंत्रवातावरणे श्वसन्तोऽन्तमुखीं साधनायां निलीयन्ते स्म।

महाकवेः काव्यकृतिषु वर्णितैर्विविधमार्गैरपि तत्कालीनराष्ट्रव्यापिन्याः शोभनायाश्चेतनाया आर्थिकसमृद्धेश्च सम्यक् परिचयः प्राप्यते। रघुदिग्विजयसम्बन्धि-मार्गेण[1] राष्ट्रस्यादर्शसीमा निर्धार्यते। तेन वयं विदेशिसीमावर्त्ति-राज्येभ्यः राष्ट्रीयसीमां रक्षितुं शक्नुमः। वाल्मीकि-रामायणाद् गृहीतः रामस्य पुष्पकविमानस्य यात्रामार्गो[2] दक्षिणे सेतुबन्धादुत्तरेऽयोध्यापर्यन्तं व्यापकरूपे विस्तृतायाः राष्ट्रभुवः बाण इव समवेतरूपेण संमापनं कृत्वा राष्ट्रीयैकतां प्रत्युन्मुखीं कारयित्रीं चेतनामनुभावयति। मेघमार्गः[3] महाकवेः साहित्यिक-प्रतिभायाः सुन्दरसंस्पर्शेन भारतीयवृष्टिसंस्थानस्योत्कृष्टं स्वरूपं प्रस्तौति। यद् राष्ट्रस्यार्थिकप्राकृतिकसमृद्धयोः मूलाधाररूपे महत्त्वशालि वर्त्तते।

महाकविः कालिदासः राष्ट्रस्य विराटस्वरूपात् सुपरिचित आसीत्। अतः सोऽस्य वैविध्यपूर्णां, मनोहारिणीं, तथ्यपूर्णां, स्वाभाविकीञ्च शोभां प्रस्तुतवान्। कलिंगानां[4] प्राच्यसमुद्रतटस्य श्यामलं राजतालीवनं वा स्यात्, [5]महेन्द्रगिरेर्नागवल्लीनां नारिकेलानामासवस्य चित्रं वा स्यात्, मारीचवने [6]उद्भ्रान्तहारीतका चन्दनैलालतामयीमलयाद्रेः रम्योपत्यका[7] वा स्यात्, पाश्चात्यसीमान्तप्रदेशानां द्राक्षालताभिः कुंकुमकेशरस्य कविः

१—द्रष्टव्यः रघुवंशे चतुर्थसर्गः।

२—रघु० १३/१-१४, ६३।

३—द्रष्टव्यम्—पू० मेघदूतम्, १४-६१।

४—रघुवंशे—४/३४-४४, ६/५६, ५७।

५—रघु०—४/४२, ४३।

६—रघु० ४/४५—"ससञ्जुरश्वक्षुण्णानामेलानामुत्पतिष्णवः।"

७—रघु०—४/६१, ६७, ६८।

कथां कथयेद्वा, नगराजहिमालयस्य[1] भूर्जपत्राणां मर्मरध्वनेः, कस्तूरी-मृगाणां नाभिगन्धस्य, भागीरथ्याः सशीकरशीतलसमीरस्य च गौरवगीतिकानि वा गायेत्, लौहित्यमुत्तीर्य कामरूपाणां [2]गजानामगरुवृक्षाणाञ्च वैविध्यपूर्णं वर्णनं वा कुर्यात् सर्वस्मिन् राष्ट्रस्यैका समन्विता समृद्धिपूर्णा च रमणीयतैव द्रष्टुं शक्यते । इत्थं प्रतिभाति यन्महाकविः मनः प्राणैरिवास्य देशस्य प्रतिकणं रेमे ।

संक्षेपेऽनेन तथ्येनोपसंहर्तुं शक्यतेऽयं लेखः यत् महाकवेः कालिदासस्य काव्य-कृतिषु समाहिते राष्ट्रियभावना सांस्कृतिकचेतना चात्यन्तं महत्त्वपूर्णोपादेये स्तः । अस्माभिराभ्यां स्वकीयस्य स्वर्णिमस्यातीतस्य सत्यं मूल्यांकनं कुर्वद्भिः नवजागर्तिः सांस्कृतिकचेतना चेति लब्ध्वा महाकवेः काव्यकृतीनां धार्मिककैतिहासिकराजनीतिकभौगोलिकपुरातात्त्विकादिदृष्ट्या व्यापकमध्ययनं करणीयम् ।

१—कुमारसंभवे—१/७, १५, ५५ ।

२—रघु०—४/८१-८४, ७/१७ ।

भारतीयदर्शनानि, तेषामाविर्भावक्रमश्च[1]

म० म० गिरिधरशर्मा चतुर्वेदी

यं दर्शयन्ति विविधाभिरहो विधाभि-
रेकं क्रमेण सकलान्यपि दर्शनानि ।
मूकीभवन्ति च ततोऽनधिगत्य पारं
तं स्वप्रकाशमखिलाश्रयमाश्रयेऽहम् ॥ १ ॥

इह हि जगति विद्वत्समाजे शिरसा समाद्रियमाणासु कण्ठालंकरणता नीयमानासु च भारतीयविद्यामुक्तालतासु दर्शनशास्त्रमेव नायकायत इति नैतत्परोक्षं कस्याप्यक्षरजुषः । भारतीयानां दर्शनान्यद्यापि विज्ञानपारंगतैरा-द्रियन्ते, श्लाघ्यन्ते, बहुमन्यन्ते च । दर्शनानां बलेनैव भगवतीयं सुरभारती समधिगच्छत्यद्यापि गौरवं सर्वदेशेष्विति चेदुच्येत, मन्ये नेयमत्युक्तिः स्यात् । संस्कृतसाहित्यकोशाद्दर्शनानि चेन्निष्काश्येरन् सुवर्णादिरहितस्य केवलं मूष-कलीलारंगभूमिभूतस्य कोशस्येव, अपनीतरुचिररत्नस्य जटितग्रैवेयकादेरिव, फलप्रसूनादिदरिद्रस्य शुष्कतरोरिव, किमन्यत्—अपेतसूत्रस्य पटस्येव दशा संस्कृतसाहित्यस्य संपद्येत—इति निश्चला मे मतिः । इत्थंभूतगौरवास्पदं पूर्वदिग्विज्ञानज्योतिरिदं किं नाम दर्शनम्, कुतोऽस्य दर्शनत्वम्, कति वा दर्शनानि—इत्यादिविषयोऽयं यथामति विवेच्यते । तत्र दृशिरयं यदि चाक्षुष-ज्ञानार्थस्तर्हि चाक्षुषप्रत्यक्षे वा तत्करणे चक्षुरिन्द्रिये वा दर्शनशब्दस्य वृत्तिः प्राप्नोति । दृशेः प्रत्यक्षज्ञानार्थकत्वेऽपि च प्रत्यक्षे वा तत्करणेष्विन्द्रियेषु वा शब्दस्यास्य वृत्तिः स्यान्नतु वाङ्मयापरपर्यायेषु शास्त्रेषु । यदि तु ज्ञान-सामान्यार्थ एवात्र दृशिः करणप्रत्ययान्तश्चास्थीयेत, तर्हि ज्ञानसाधनभूते-ष्विन्द्रियलिंगादिषु सर्वेष्वपि च शास्त्रेषु तुल्यमयं दर्शनशब्दः प्रवर्तेत, न तु प्रतिनियतविषयः स्यात् । अथ प्रकरणापेक्षः प्रवर्तत एव तत्र तत्र, इह तु वाङ्मयप्रकरणादेव शाब्दज्ञानकरणेषु शास्त्रेष्वयमुपसंहृतो द्रष्टव्य इति चेत्तथापि तुल्यमयं सर्वेष्वेव शास्त्रेषु दर्शनशब्दः प्रयुज्येतैव । न त्वेवमेत-

---

१. लेखस्यास्य रचयितारः म० म० गिरिधरशर्माणः १०।६।६५–तिथौ दिवंगताः । तेषां पुत्रैः प्राशिवदत्तशर्मचतुर्वेदैः लेख एष सागरिकाया उपहृतः ।

दुपलभामहे, वेदेवदांगपुराणायुर्वेदसाहित्यादिषु बहुत्र दर्शन शब्दस्याभियुक्तैर-प्रयुक्तत्वात्। अतएव च षोढा भिद्यते दर्शनशास्त्रमित्यपि प्राचां चिरन्तनः प्रवादः संगतार्थो भवति। सर्वत्रापि शास्त्रेषु दर्शनशब्दप्रयोगे तु षट्त्वं तत्र सर्वथा व्यवस्थापयितुमशक्यमापद्येत। चतुर्दश हि विद्याः परिगण्यन्तेऽभियुक्तैः—

अंगानि वेदाश्चत्वारो मीमांसा न्याय एव च।
पुराणं धर्मशास्त्रं च विद्यास्त्वेताश्चतुर्दश॥ इति।

कथं ताः सर्वा अपि षट्सु दर्शनेष्वन्तर्भाव्येरन्। तस्मात्प्रकृतस्यास्यदर्शन-शब्दस्यात्मादितत्वनिरूपकेष्वेव शास्त्रेषु विशिष्य प्रवृत्तिरवश्यमास्थेया। सा चेयं योगरूढ्यैवेति केचिदभिप्रयन्ति। ज्ञानसामान्यार्थाद् दृशेर्निष्पन्नोऽय दर्शनशब्दः प्रकरणाच्छाब्दज्ञानकरण उपसंहृतस्तत्रापि सत्रानर्थप्रहाणहेतुतया सर्वप्रधानस्यात्मादितत्वज्ञानस्य साधनभूतेषु वेदान्तादिशास्त्रेषु चिरन्तन-व्यवहाररूढ इति तेषामाशयः। अन्येत्वनेकार्थत्वाद् धातूनां मतापरपर्यायोऽय दर्शनशब्द इत्याहुः। 'तेषां दर्शनमिति' 'तेषां मतमिति' चानन्यार्थावेतौ शब्दौ प्रयुक्तावभियुक्तैः[1]। आर्हतदर्शने च ज्ञानात्प्राग्भाविनि श्रद्धाने निरूढो दर्शनशब्दः[2]। यो हि यथा यमर्थं श्रद्दधाति, नूनं तथैतन्मनुते, तथैव तं तमर्थं जानातीति सुप्रसिद्धोऽयमर्थोऽनुभवशीलानाम्। तथा च भिन्नं भिन्नं श्रद्धा-नमनुरुध्य भिन्नभिन्नतयैव तत्तदर्थजातं प्रतिपादयत्स्वेषु सांख्यादिशास्त्रेषु समुचित एवायं दर्शनशब्दप्रयोग इति द्वितीयः पन्थाः।

वयन्तु पश्यामः—'आत्मा वा अरे द्रष्टव्यः' इति हि भगवती श्रुतिरात्मनः साक्षात्कारापरपर्यायं दर्शनमनुविदधाति, 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति च दर्शनस्य हेतूनप्यवगमयति। तामेव च श्रुतिमुपबृंहयन्ती—

'श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।
मत्वा च सततं ध्येय एते दर्शनहेतवः'॥

इतीयं स्मृतिरपि श्रुत्युपपत्तिध्यानानां दर्शनहेतुतामन्वाह। तत्र यद्यपि श्रुतिरपि दर्शनहेतुः, प्राधान्यं च दर्शनहेतुष्वेतस्याः, श्रुतिमन्तरा केवलाभिरुप-

---

१. 'अस्त्यात्मेत्येकं दर्शनम्' नास्त्यात्मेत्यपरम् 'वात्स्यायनभाष्ये' तस्मादनतिशंकनीयमिदमौपनिषदं दर्शनम्, 'तस्मादप्यसमंजसं सांख्याना दर्शनम्' इत्यादि शांकरे चालोच्यम्।

२. 'सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः' इत्यादौ ज्ञानात्पृथग्दर्शन-परिगणनमालोच्यम्।

पत्ति भरात्मादितत्त्वज्ञानस्य तर्काप्रतिष्ठानादित्यादिसूत्रैरशक्यत्वप्रतिपादनात् अथापि तु प्राथमकल्पिक एव ज्ञाने श्रुतेः प्राधान्यमभ्युपगच्छन्त्याचार्याः। साक्षात्कारापरपर्याये दर्शने तु श्रुतिमवलम्ब्य प्रवर्तमानयोरुपपत्तिनिदिध्यासनयोरेव प्राधान्यमातिष्ठन्ते। तदेतदुक्तं शंकरभगवत्पादैः—'दृष्टसाम्येन चादृष्टमर्थं समर्थयन्ती युक्तिरनुभवस्य संनिकृष्यते, विप्रकृष्यते तु श्रुतिरैतिह्यमात्रेण स्वार्थाभिधानात्। अनुभवावसानं च ब्रह्मविज्ञानमविद्याया निवर्तकं मोक्षसाधनं च दृष्टफलतयेष्यत' इति। 'तर्काप्रतिष्ठाना'दित्यादिभिस्तु निरवलम्ब एव नास्तिकानां तर्क आक्षिप्तो न तु श्रुत्यवलम्बेन प्रवर्तमानोऽपि। तच्चाप्येतच्छ्रुतेः प्रामाण्यमभिमन्यमानानामेव शिरोधार्यं स्यान्न तु बौद्धादिदर्शनानामपीत्यन्यदेतत्! सर्वथापि त्वात्मादिसाक्षात्कार उपपत्तेः प्राधान्यमनुमतमेव सर्वेषामपि। तदित्थमुपपत्तेर्दर्शनहेतुत्वसंसिद्धावुपपत्तिप्रधानानामेषां सांख्यादिशास्त्राणामर्थागतमेव दर्शनहेतुत्वमिति दर्शनहेतुत्वाद्दर्शनव्यपदेश एषां न्यायसिद्धः। यस्य तु धर्मादिप्रमेयस्य नैव साक्षात्कार उपदिष्टः, शब्दैकसमधिगम्यत्वं त्वेवावधारितम्, तस्यैतस्य प्रमितिसाधनानि धर्मशास्त्रादीनि पारोक्ष्येणैवार्थख्यापकानि इति दर्शनाहेतुत्वान्नैव दर्शनशब्दव्यपदेश्यानीति सामान्येन विद्याशब्देनैवाभिधीयन्ते। ततश्च विद्या च दर्शनं चेति विभिन्नमिदं प्रस्थानद्वितयमिति संसिद्धम्। अतएव यथा षट्सु दर्शनेषु पुरस्तादुपदर्शिताश्चतुर्दशविद्या नान्तर्भवन्ति, तथैव तासु चतुर्दशसु विद्यास्वपीमानि दर्शनानि नान्तर्भवन्तीति निभृतमेतदालोच्यम्। यत्तु मीमांसायां वेदान्तस्य, न्याये वैशेषिकस्य, धर्मशास्त्रे सांख्ययोगयोश्चान्तर्भावमुपकल्प्य दर्शनानां विद्यात्वमनुजानन्ति तदेतन्नातिमनोरममाग्रहग्रहिलतया क्लिष्टं च। यथा त्वेतयोर्विद्यासूदाहृतयोर्न्यायमीमांसयोरपि नास्त्येव दर्शनत्वं तदेतदनुपदमेव दर्शयिष्यामः। ता इमाश्चतुर्दशापि विद्याः प्रायेण परोक्षतयैव तं [1]तमर्थमनुशासति, न तु साक्षात्कारपर्यन्तं तत्तदर्थजातमवगमयितुमुत्सहन्ते। उपपत्तिपुरःसरमात्मादितत्त्वनिरूपणपराणि तु शास्त्राणि साक्षात्कारपर्यन्तावगमायैव यतन्त इति दर्शनहेतुत्वाद्दर्शनानि तानि। तदित्थमुपपत्तिपूर्वकमात्मादितत्त्वनिरूपणप्रवणत्वमेव दर्शनत्वमिति निरूढमिदं लक्षणं द्रष्टव्यम्। यद्यपि च सर्वदर्शनसंग्रहादौ मीमांसायाः पाणिनीयस्य शब्दशास्त्रस्य

---

१. आत्मादितत्त्वमपि श्रुत्यादिभिः पारोक्ष्येणैवावबोध्यते, साक्षात्कारस्तु तस्योपपत्तिनिदिध्यासनाभ्यामेवेति प्रतिपादितं प्राक्। पुराणान्यपि सर्गाद्यर्थं परोक्षतयैव बोधयन्ति। अन्येषां तु शाब्दबोधोपयुक्तानामङ्गानां कैव कथाऽर्थसाक्षात्कार इत्यालोच्यम्।

रसेश्वरादेश्च दृश्यते दर्शनत्वाभिमानेनैव मतोपन्यासः, न च तत्र तत्रात्मादितत्त्वनिरूपणं प्रकृतम् शब्दशास्त्रस्य शब्दव्युत्पत्तिप्रदर्शनाय, मीमांसायाः श्रुतिवाक्यार्थव्यवस्थापनाय रसेश्वरस्य च पारदादिगुणख्यापनायैव विशिष्य प्रवृत्तिदर्शनात् । येऽपि तु केचित्तत्र तत्रावलोक्यन्ते दार्शनिकविषयविचारांशास्तेऽपि प्रायेण प्रसंगागता दर्शनान्तरानुवादादिरूपा एवेति न तत्परत्वं तेषां शास्त्राणामवधारयितुं शक्यम् । यत्किञ्चित्प्रमेयैकदेशपरिग्रहणमात्राद्वा दर्शनत्वे सर्वत्रैव तदिदमव्याहतं प्रसज्येत । तस्मात्तेषां दर्शनत्वे विरुध्यते निरूढिरियमिति सत्यम् । अथापि तु दर्शनहेतुत्वरूपदृढतरतर्कानुगृहीतामधिकतमशिष्टसंप्रदायप्रसिद्धिमवलम्ब्य दर्शनत्वाभाव एव तेषामनुसन्धेय इति न दोषः । शब्दशास्त्रादिष्वपि हि दर्शनशब्दप्रयोगेऽभ्युपगम्यमाने विनिगमनाविरहात् सर्वेष्वेव शास्त्रेषु दर्शनव्यपदेशो दुर्निवार एव । इतरथाव्याप्तस्यतत्रानुगतस्य च तर्कानुगृहीतस्य लक्षणस्यासंभवात् । न च शब्दशास्त्रादिष्वेषु शिष्टानां दर्शनव्यपदेशो दृष्टचर । तस्मात्सर्वदर्शनसग्रहादौ तत्तन्मतोपन्यासः कुतुकायैवेत्याकलनीयम् । आहतो वा ज्ञानसामान्यार्थतया सर्वस्मिन्नपि वाङ्मये दर्शनव्यपदेश एकेषाम्, भवतु चेन्द्रियलिंगादिष्वप्ययं परेषाम्, येषान्तु परिच्छिन्नोऽयं दर्शनपदप्रयोगस्तेषामुक्तविधैव शरणमितिकृतंबहुना प्रपंचेन ।

तानि च दर्शनानि षडिति चिरन्तनप्रसिद्धिः । कानि च तानीति जिज्ञासायां दृश्यतेऽनेकधा विप्रतिपत्तिः । एकदेशिनान्तु तामुपेक्ष्य यत्प्राधान्येन प्रसिद्ध्यति तद्विवेचयिष्यामः । तत्रेत्थमिदानीन्तना विशिष्टप्रज्ञा आतिष्ठन्ते- कापिलं, सांख्यम्, पातंजलो योगः, काणादं वैशेषिकम्, गौतमीयो न्यायः, जैमिनीया पूर्वमीमांसा, वैयासिक्युत्तरमीमांसा वेदान्तापरपर्यायेति षडिमानि दर्शनानीति । श्रुतिविरुद्धानि नास्तिकानां दर्शनानि त्वितः पृथग्भूतान्येवानुसन्धेयानि । औपासनिकानां च दर्शनान्युत्तरमीमांसायामेवान्तर्भवन्तीति न न्यूनता । तदेतत्प्रेक्षावद्भ्यो न रोचते । योगस्य न्यायस्य पूर्वमीमांसायाश्च पृथग् दर्शनत्वस्य विचारासहत्वात् । तथा हि-योगशास्त्रप्रवर्तकस्य भगवतः पतंजलेस्तावच्चित्तवृत्तिनिरोधोपायानुपदर्शयितुं विशिष्य प्रवृत्तिर्नत्वात्मादितत्त्वचिख्यापयिषया । 'अथ योगानुशासनम्' 'योगश्चित्तवृत्तिनिरोधः' इतिसूत्राभ्यां चित्तवृत्तिनिरोधस्यैव तत्र शास्त्रेऽधिकृतत्वबोधनात् । चित्तवृत्तिनिरोधश्चायं क्रियाविशेषरूप इति क्रियोपदेशार्थमिदं शास्त्रं स्यात्, न त्वेवात्मादितत्त्वनिरूपणमुद्देश्यतयोपादत्ते । उपपत्तिपुरःसरमात्मादितत्त्वनिरूपणप्रवणत्वमेव तु दर्शनत्वमित्यवोचाम । यदप्येतद्योगशास्त्रे दृश्यते क्वचन दार्शनिकतत्त्वनिरूपणं तदपि प्रसंगागतं प्रधानप्रतिपाद्योपयोगितयैवोपनिबद्धमिति न

तन्मात्रेण तत्प्रवणत्वमस्य सम स्थातुं सुशकम्। तदेतदाहुर्दार्शनिकमूर्धन्यास्तत्र-भवन्तो वाचस्पतिमिश्रा भामत्यामेतेन योगः प्रत्युक्त इति सूत्रं विवृण्वानाः—"नानेन योगशास्त्रस्य हैरण्यगर्भपातंजलादेः सर्वथा प्रामाण्यं निराक्रियते, किन्तु जगदुपादानस्वतन्त्रप्रधानतद्विकारमहदहंकारपंचतन्मात्रगोचरं प्रामाण्यं नास्तीत्युच्यते। न चैतावतैषामप्रामाण्यं भवितुमर्हति, यत्पराणि हि तानि तत्राप्रामाण्येऽप्रामाण्यमश्नुवीरन्। न चैतानि प्रधानादिसद्भावपराणि किन्तु योगस्वरूपतत्साधनतदवान्तरफलविभूतितत्परमफलकैवल्यव्युत्पादनपराणि। तच्च किञ्चिन्निमित्तीकृत्य व्युत्पाद्यमिति प्रधानं सविकारं निमित्तीकृतम्, न तु तद्विवक्षितम्' इत्यादिना। अनेन हि स्पष्टमेव योगस्य तत्वनिरूपणप्रवणत्वं निराकृतमेव। तथैव तत्र शंकरभगवत्पादैरपि किमिति सांख्यात्पृथग्योगनिराकरणं प्रस्तुतमित्याशङ्क्य योगाङ्गयमनियमासनादीनां श्रुतावप्युपलम्भाद्योगस्य शिष्टतमैरप्यंगीकृतत्वात्, तत्प्रतिपादितचित्तवृत्तिनिरोधोपायेषु कस्यापि विप्रतिपत्त्यभावाच्च तत्प्रामाण्ये सुदृढे तत्रैव शास्त्रे प्रसंगप्रतिपादितानां प्रधानकारणत्वादीनामपि स्थालीपुलाकन्यायेन प्रामाण्यं मा प्रसाङ्क्षीदिति भूयोऽपि तन्निराकरणोद्योग इत्येवं समाहितम्। तेन च स्फुटं योगस्यात्मादितत्वनिरूपणेऽप्राधान्यं ख्यापितमेव। तस्मात्सर्वदर्शनानामुत्तरागंभूतमिदं निदिध्यासनसाधनसमर्थकं योगशास्त्रं न त्वेव दर्शनेष्वन्तर्भूतमित्यवश्यमनुमन्तव्यम्। यद्यपि चोपपत्तेरिव निदिध्यासनस्याप्यस्ति दर्शनहेतुत्वमिति तत्प्रतिपादकेऽपि शास्त्रे दर्शनव्यपदेशो न्याय्यः, अथापि तु परस्परमुपपत्तिमवलम्ब्य विप्रतिपन्नानां षण्णां दर्शनानां प्रस्तावे न तस्य पृथक् परिगणनमुचितम्, तस्य विभिन्नविप्रतिपत्तिसमर्थकत्वानुपलब्धेः। यद्यपि भवेदपि योगस्य दर्शनत्वमभिप्रेतम्, अथापि सांख्योत्तरांगतैवास्य भवेन्न तु पृथग् दर्शनत्वम्। सोऽयमपि शिष्टसमादृतः पन्थाः। तथा हि सांख्यभाष्यकृद्विज्ञानभिक्षुरपि—

'सांख्ययोगौ पृथग् बालाः प्रवदन्ति न पण्डिताः'

इत्यादिवचनान्यवलम्ब्योपपत्त्या सांख्यप्रवचनत्वमेव योगस्य समर्थितवान्। नास्ति च पृथग्दर्शनत्वप्रयोजिका सांख्येन सह योगस्य पदार्थनिरूपणे कापि विप्रतिपत्तिः केवलन्तु सांख्येनोपेक्षितः पुरुषविशेष ईश्वरश्चेतःप्रणिधानार्थमुपयुक्तो योगेविशेष्याभ्युपगतः। तामिमां क्षुद्रामपि विप्रतिपत्तिं यदि गणयेम, अथापि शाखाभेद एव सोऽयं स्यान्न तु दर्शनभेद इति विविच्यतां सुधीभिः। तस्मात्सांख्यस्यैव योगस्य नास्ति पृथग् दर्शनत्वम्, अपि[1] त्वदर्शनत्वम्—

---

१. उपपत्तिपराणामेव शास्त्राणां दर्शनत्वे प्रथमः पक्षः, निदिध्यासनपरस्यापि तु दर्शनत्वे उत्तर इति विवेच्यम्।

साङ्ख्येन सहैकदर्शनत्वं वेति सिद्धमेतत् । अथ विनिगमना विरहाद्विपरीतमेव किं न स्यात्, अस्तु योगस्य दर्शनत्वम्, अस्तु च साङ्ख्यस्य तदनुवादकत्वेन तच्छाखात्वमिति यदि कश्चिदाक्षिपेत् तदेतदविचारात् । उपक्रमात्प्रभृत्या-समाप्तेः पदार्थनिरूपणपरस्य साङ्ख्यस्य दर्शनताया वज्रलेपायमानत्वात् । योगस्य त्वन्यपरस्य प्रसंगात्तदर्थानुवादकत्वमेव युक्तमिति स्फुटमुपक्रमोपसंहारविदा परिशीलितदर्शनानाम् ।

अथैवमेव गौतमोपज्ञस्य तर्कशास्त्रापरपर्यायस्य न्यायस्यापि नास्त्येव दर्श-नत्वं विचारसहम्, आन्वीक्षिक्यपरपर्यायायास्तर्कविद्याया एव तत्र प्राधान्येना-धिकृतत्वात् । स्फुटं ह्येतदुररीकृतं प्रथम एव सूत्रे भाष्यकृता भगवता वात्स्या-यनेन । अतएव च सूत्रकृतापि भगवता गौतमेनादिमे सूत्रे न किल दर्शनाना मुख्यप्रतिपाद्याः पदार्था निरूपणीयतया प्रतिज्ञाता अपि त्वान्वीक्षिक्या विद्याया प्राधान्यनोपयुक्ताः प्रमाणप्रमेय संशयादय एव पदार्थास्तत्राधिकृताः । प्रमाणा-दयोऽपि हि दर्शनेषु प्रसंगात्प्रतिपाद्यन्त इति सत्यम्, न तु तत्र ते भवन्ति प्राधान्येनाधिकृताः, यस्य कस्यचन प्रमेयस्यैकदेशानामप्येकदेशतामेव तत्र ते भजन्ते । न हि जगत्तत्वनिरूपणप्रस्तावे प्रथममेव प्रमाणसंशयदृष्टान्ततत्त्वादज-ल्पवितण्डादीन् कश्चिदनुन्मत्तः पदार्थेषु परिगणयेत् । एवं हि जागलाना पदार्थानामानन्त्यादानन्त्यप्रसंगात् ।

प्रमेयाण्येव हि गौतमपरिगणितान्यधिक्रियन्ते दर्शनान्तरेषु । अन्ये तु पदार्थास्तदंगतयैव भवन्ति प्रतिपाद्याः । तस्मात्तर्कविद्यायामेवोपयुज्यमाना इमे गौतमपरिगणिताः षोडश पदार्थाः । यद्यपि च दर्शनान्तरेषु प्रमाणसंशया-दय इवेहाप्यान्वीक्षिक्यां सपरिकरं भगवता गौतमेन निरूपितानि प्रमेयाणीति समान इवायं दर्शनान्तरैरस्य निरूपणक्रमस्तथापि खलु प्राधान्याप्राधान्यकृतः सुमहान् विशेषोऽनुसन्धेयः । दर्शनेषु तावत्प्रधानं प्रमेयनिरूपणम् —तन्निरूपणाग-भूतं तु क्वचित्संशयतर्कादिनिरूपणम् । इह तु किलान्वीक्षिक्यां प्रधानं प्रमाण-संशयतर्कादिनिरूपणमेव, तदिदं प्रमाणतर्कादिनिरूपणं नतरां निरालम्बं सुवि-ज्ञानाय कल्पत इत्यालम्बनतयात्र गृहीतानि प्रमेयाणि । तत्र यद्यपि यत्किंचिदेव प्रमेयमवलम्ब्य शक्यस्तर्कः प्रवर्तयितुम्, अथापि ननु मुनीनामध्यात्ममेवा-भिनिवेशादध्यात्मविद्योपयुक्तान्येव प्रमेयाण्यवलम्बितानि भगवता गौतमेन । तदेतदाह तत्रभवान् भाष्यकारः— 'तदिदं तत्त्वज्ञानं निःश्रेयसाधिगमार्थं यथा-विद्यं वेदितव्यम्-इह त्वध्यात्मविद्यायामात्मादितत्वज्ञानम्, निःश्रेयसाधिगमोऽ-पवर्गप्राप्तिः' इति । अयमत्राशयः—यदेव खल्वालम्ब्य तर्कः प्रवर्त्यंत, तस्यैव पदार्थस्य तत्वज्ञानान्निःश्रेयसस्य तज्जन्यपरमफलस्य प्राप्तिरवश्यं संपद्येत ।

इह त्वध्यात्मविद्यैव तर्कालम्बनभूतेति तत्तत्त्वज्ञानान्निःश्रेयसाधिगमो मोक्षप्राप्तिरेव विवक्षितेति। तस्मात्सत्यप्यात्मादितत्वनिरूपणे सपरिकरे तत्परत्वाभावान्नास्य तर्कशास्त्रस्य दर्शनत्वमपि तु तर्कप्रतिपादनपरतया तर्कविद्यात्वमेवेति कृतं प्रपंचेन। सात्वियं तर्कविद्या सर्वेषामपि दर्शनानां पूर्वाङ्गभूतेत्यन्यदेतत्।

अथ यद्येवमतत्परत्वेप्यात्मादितत्वनिरूपणमात्रेण दर्शनत्वं न्यायस्याभ्युपगम्येतापि, अथापि तु काणादेन वैशेषिकशास्त्रेणैकदर्शनत्वमेवास्य भवेन्नतु पार्थक्यम्। कणादाभ्युपगतानामेव तत्वानां गौतमेन विशिष्य तर्कपुरःसर समर्थितत्वात्। न ह्यात्मादितत्वेष्वालोक्यते कणादेन गौतमस्य मनागपि विप्रतिपत्तिर्यया पृथग्दर्शनत्वमनुमन्येमहि। यात्विमाः कणादगौतमयोः पदार्थसंख्याविप्रतिपत्तिः, प्रमाणसंख्याविप्रतिपत्तिः, पीलुपिठरपाकादिविप्रतिपत्तिश्चेति तिस्रो विप्रतिपत्तय आधुनिकैरुद्भाव्यन्ते ता अविचारितरमणीयाः। गौतमेन ह्यान्वीक्षिक्या विद्यायामुपयुक्ताः षोडश पदार्थाः सगृहीताः, कणादेन तु जागताः सर्वेपि पदार्थाः षट्सु संगृहीता इति विभिन्नविषयकत्वेन पदार्थसंख्याविप्रतिपत्तेः प्रागेव निरस्तत्वात्। समान एव हि विषये विप्रतिपत्तिः प्रसरेत्। न हि मनुष्याः पंच, पशवः सप्तेति विभिन्नसंख्याभिधायिनावपि पुरुषौ विप्रतिपन्नतया केनापि व्यवह्रियेते प्रज्ञाचक्षुषेण। समाहितश्चान्वीक्षिकीमेवाभ्युपगम्य षोडशपदार्थवादो भाष्यकारेणेति तदनालोचनविजृम्भितमेवेदं नव्यानाम्। अन्ततश्चार्वाचीना अपि नैयायिकाः षोडश पदार्थान् षट्सु पदार्थेष्वेव महताडम्बरेणान्तर्भाव्य विप्रतिपत्तिमभ्युपगम्यापि संप्रतिपत्तिमेव साधयन्तीति न ततोऽपि सिद्ध्यति दर्शनपार्थक्यम्। वस्तुतस्त्वालोचने त्वन्तर्भावकथापीयमबोधविजृम्भणमितिप्रकरणभेदाभ्युपगम एव न्याय्यः। इदन्तावदन्तर्भावमभ्युपयन्तः प्रष्टव्याः—यथा गौतमोक्ताः षोडश पदार्थाः षट्सु कणादोक्तेषु भवद्भिरन्तर्भाव्यन्ते—तथैव ननु कणादाभ्युपगताः सामान्यसमवायादयो गौतमीयेषु कुत्रान्तर्भाव्यन्ते? इति। न चैतावता गौतमीये तेषामनभ्युपगमसिद्धौ विप्रतिपत्तिरेव सुष्ठु साधितेति साम्प्रतं वक्तुम्—'न घटाभावसामान्यनित्यत्वात्' इत्यादिषु सूत्रेषु स्फुटं तत्तेषां पदार्थानामुल्लेखदर्शनेनानभ्युपगमासिद्धेः। वैशेषिकसाधारण्यां च निरूपणप्रक्रियायां तत्तत्पदार्थाभ्युपगमस्य बलाद्गलेपतितत्वात्। तत्त्वतस्त्विदमप्यत्यल्पमुक्तम्, पृथिव्यादिद्रव्याणां संख्यादि गुणानां कर्मणां चेत्यादिबहुतराणामेव पदार्थानां गौतमीयेषु षोडशपदार्थेष्वन्तर्भावासिद्धेः। 'आत्मशरीरेन्द्रि-

यार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्' इति तत्परिगणितेषु द्वादशसु प्रमेयेष्वर्थपदेन सर्वेऽपि पदार्थाः संगृहीता भविष्यन्तीति तु साहसमात्रम् । स्वयमर्थान् परिगणयता सूत्रकृतैव 'गन्धरसरूपस्पर्शशब्दाः-पृथिव्यादिगुणास्तदर्थाः' इति सूत्रेणार्थपदस्येन्द्रियार्थभूतगन्धादिमात्रपरत्वाभ्युपगमात् । यद्यपि त्वभियुक्ततमा अपि बहुशः पदार्थानत्रान्तर्भावयितुं बहुतरं क्लिश्यन्ति व्याचक्षते च सूत्रम् 'गन्धरसरूपस्पर्शशब्दाः, पृथिव्यादयः-पृथिव्यप्तेजांसि, गुणाश्च-संख्यासंयोगस्नेहादयः, आश्रितत्वेनोपचारात् कर्मसामान्यादयश्च तदर्थाः इन्द्रियार्थाः' इति तात्पर्यटीकायाम् तथापि त एते व्याख्याकार एवैतेन स्वीयमप्रतिहतं पाण्डित्यं प्रख्यापयन्तु नाम यथेष्टम् . न तु सूत्राक्षरस्वारस्येन नापि वार्थपरीक्षाप्रकरणैकवाक्यतया साऽयमर्थः सिध्यतीति स्फुटमेव तद्ग्रन्थपरिशीलिनाम् । एतावतापि चेन्द्रियार्थमात्रपर्यवसानपरिगणनस्याप्रत्याख्येयतयाऽतीन्द्रियाणामाकाशकालादिद्रव्याणां, गुरुत्वादिगुणानां, परमाणुकर्मणां, परमाणूनामेव चात्रान्तर्भावो नैव सर्वथा शक्यः समर्थयितुम्-तेषामिन्द्रियार्थत्वाभावात् । कथं चैतावत्पदार्थानभ्युपगमं दर्शनमिदं गौतमस्य वैकल्यदोषात्परिमोच्येत । तस्माज्जगत्तत्त्वनिरूपणोपयुक्ताः पदार्थाः साकल्येन नैव भगवता गौतमेन परिगणिताः, अपि तु कणादोक्तास्तानेव यथावस्थितमभ्युपगम्य तदवलम्बनमात्रेण न्यायः प्रवर्तितः, गौतमोक्तास्तु पदार्थास्तर्कविद्योपयुक्ता एवेत्यकामेनाप्यवश्यमभ्युपगन्तव्यम् । सपरिकरात्मतत्त्वविज्ञानस्यात्र सर्वानर्थप्रहाणहेतुतया तस्यैव सर्वोत्कर्षेण विशिष्टं प्रमेयत्वमभ्यनुज्ञाय प्रमेयत्वेनापि भगवता गौतमेनैकादशभिः परिकरैः सहात्मैवोद्दिष्टोऽन्ये तु पदार्था दर्शनेषु निरूप्यमाणा अप्युपेक्षिता एव । उक्तं चैतद्भगवता वात्स्यायनेन प्रमेयसूत्रं विवृण्वता-'अस्त्यन्यदपि द्रव्यगुणकर्मसामान्यविशेषसमवायाः प्रमेयम्, तद्भेदाच्चापरिसंख्येयम्-अस्य तु तत्त्वज्ञानान्निःश्रेयसाधिगम इतीदमेवोद्दिष्टं सूत्रकृता' इति । अनेन च स्फुटमेव द्रव्यादीनां सर्वेषामत्रानन्तर्भावः सूचितः, निःश्रेयससाधनज्ञानस्य प्रधानविषयतयैव चात्मप्रभृतीनामत्र प्राधान्येनोक्तत्वात् न त्वितरानभ्युपगमादिति विप्रतिपत्त्यभावोऽपि व्याख्यात एवेति कृतमतिविस्तरेण प्रसक्तानुप्रसक्त्या । तदित्थं पदार्थसंख्याविप्रतिपत्तिर्नास्त्येव गौतमकणाददर्शनयोरित्युपदर्शितमेतत् । पीलुपिठरपाकादिविप्रतिपत्तिस्तु सूत्राक्षरास्पृष्टेति उपेक्ष्यैव । यापि चेयं प्रमाणसंख्यायां दर्शनयोरनयोर्विप्रतिपत्तिरुद्भाव्यते-गौतमीये प्रमाणचतुष्टयस्य काणादे तु प्रमाणद्वयस्यैवाभ्युपगमदर्शनात्, सोऽयमपि नाममात्रे विवादो न तु वस्तुनि । न खलु भगवान् कणाद उपमानस्य शब्दस्य वा प्रामाण्यं नाभ्यनुजानाति, नापि तत्र प्रामाण्यस्वरूपे काचिदवान्तरीभूतापि विप्र-

तिपत्तिः केवलन्तु तयोरनुमानविशेषतैव कणादेनाभ्युपगम्यते-गौतमेन तु स्वातन्त्र्येण प्रमाणसंख्यायां ते प्रवेश्येते इति सैषा विप्रतिपत्तिरापाततः प्रतीतापि न पारमार्थिकी। विद्यमानापि चैषा एकदेशविप्रतिपत्तिः शाखाभेदमेव प्रयोजयेन्न तु दर्शनभेदम्। तस्मात्पृथग्दर्शनत्वप्रयोजिका न्यायवैशेषिकयोर्विप्रतिपत्तिर्न सिध्यतीति सिद्धमेतत्। तदित्थं गौतमीयस्य न्यायस्यापि नास्त्येव दर्शनत्वम्—सति वा वैशेषिकेणैकदर्शनत्वमेवेत्यतिरोहितमेतत्। अत एव वेदान्तदर्शने सकलदर्शननिराकरणप्रस्तावेऽपि नैव गौतमदर्शनं पृथङ् निराकृतं शंकरभगवत्पादैः। प्रमाणतयैव तु तत्र तत्र गौतमवचनमुपन्यस्तम्, तर्कविद्याप्रतिपादकगौतमशास्त्रनिराकरणस्याप्राप्तकालत्वात्। विद्यास्वपि च तर्कापरपर्यायस्यास्य न्यायस्य परिगणनं दर्शनत्वाभावादेव संगच्छत इति पूर्वोक्तं नैव विस्मर्तव्यम्।

अथ सपरिकरात्मतत्त्वनिरूपण प्रवणत्वे दर्शनलक्षणेऽभ्युपेते पूर्वमीमांसायास्तु नास्ति दर्शनत्वकथापि। कर्मकाण्डनिरूपणपराणि हि ब्राह्मणवाक्यानि सा व्यवस्थापयति, न त्वात्मादितत्त्वनिरूपणं स्पृशत्यपि। वाक्यार्थविवेचनमात्रपरस्य च मीमांसाशास्त्रस्यापि दर्शनत्वे पदविवेचनपराणां व्याकरणादीनामपि तद्दुर्निवारमेव प्रसज्जेतेति सर्वथा दर्शनव्यवहारसांकर्यप्रसंगः। प्रसंगागतयत्किंचित्तत्त्वनिरूपणमात्रेण तु नास्ति दर्शनत्वमित्यसकृदवोचाम। अथैवमुपनिषद्वाक्यार्थव्यवस्थापनार्थं प्रवृत्ताया उत्तरमीमांसाया अपि न स्यादेव दर्शनत्वम्, वाक्यार्थनिरूपकत्वाविशेषादिति चेन्नैवम्। उत्तरमीमांसा ह्युपनिषद्वाक्यार्थं व्यवस्थापयन्त्येवोपपत्त्याध्यात्मादितत्त्वनिरूपणं विषयीकरोति। आत्मादितत्त्वनिरूपणायैव तस्या उपनिषद्वाक्यार्थव्यवस्थापने प्रवृत्तिः, उपनिषन्मात्रसमधिगम्यमात्मादितत्त्वमिति तयाभिमननात्। उपनिषद्भिश्च यथा किलात्मसाक्षात्कार उपदिश्यते, नैवं कर्मनिरूपणपरेण ब्राह्मणेन धर्मस्य साक्षात्कारः, धर्मस्योत्पाद्यत्वेनासाक्षात्करणीयत्वादित्युक्तमधस्तात्। ततश्चोपनिषद्वाक्यार्थमीमांसायाः साक्षात्काराख्यदर्शनहेतुत्वाद्दर्शनत्वं संभवेदेव, पूर्वमीमांसायास्तु दर्शनाहेतुत्वादेव नैव संभवेदिति सुकरमेतत्प्रतिपत्तुम्। आस्तां वा उत्तरमीमांसाया दर्शनत्वं च मीमांसात्वं चेत्युभयमपि, उपनिषद्वाक्यार्थनिरूपणांशे मीमांसात्वम्, उपपत्त्यात्मादितत्त्वनिरूपणांशे च दर्शनत्वमित्यंशभेदेनोभयोरप्यविरोधात्। मीमांसांश एवं चानया पूर्वमीमांसा निराक्रियते न तु दर्शनांशे, पूर्वमीमांसायां दर्शनांशाप्रतिपादनादिति सर्वं समञ्जसम्। तस्मात्पूर्वमीमांसेयं विद्यैव भवितुमर्हति न तु दर्शनम्। उत्तरमीमांसा तु विद्या च दर्शनं चेत्युभयमपीत्याकलयन्तु सुधियः।

तदित्थं योगन्यायमीमांसानां त्रयाणां निराकृते दर्शनत्वे सांख्यवैशेषिक-वेदान्ताख्यानि त्रीण्येव वैदिकदर्शनानीति संसिद्धम्। दर्शनानां षट्संख्या पूरणन्तु लौकायतिक-वैनाशिक—स्याद्वादाख्यैस्त्रिभिः श्रुतिविप्रतिपन्नैर्दर्शनैरेव। न च श्रुतिविप्रतिपन्नानामात्मादितत्त्वनिरूपणमप्रामाणिकमिति नोचितं तथा दर्शनत्वमिति साम्प्रतं वक्तुम्। यतः श्रुत्यनुकूलेष्वपि दर्शनेषु कस्यचिदेकस्यैव मुख्यं प्रामाण्यं भवेन्न तु परस्परं विप्रतिपन्नानां सर्वेषामपि संभवितुमर्हति प्रामाण्यम्, वस्तुनि विकल्पासंभवादित्यन्येषामदर्शनत्वमेवापद्येत। तस्मादात्मादितत्त्वनिरूपणमात्रादेव दर्शनत्वं सर्वत्रैवाप्रतिहतमनुसन्धेयम्। सम्यग्दर्शनत्व तु कस्येति दुर्निर्धारमिदम्। सर्वेषामेव स्वस्वदर्शने सम्यग् दर्शनत्वाभिमानात्। तदित्थमात्मादितत्त्वनिरूपकाणि षडिमानि दर्शनानि संसिद्धानि क्रमेण लौकायतिकम्, वैनाशिकम्, स्याद्वादः, वैशेषिकम्, सांख्यम्, वेदान्तश्चेति। लौकायतिकं चार्वाकमित्यनर्थान्तरम्, वैनाशिकं सौगतं बौद्धमिति च, स्याद्वादो जैनमार्हतं च नातिरिच्येत, वैशेषिकं काणादमौलूक्यमिति समानोऽर्थः, प्राधानिकं प्राकृतिकं सांख्यं चैकमेव, शारीरकमुत्तरमीमांसा वेदान्ता ब्रह्मदर्शनमिति पर्यायशब्दाः। तेष्वेषु षट्सु दर्शनेष्वाद्यानि त्रीणि श्रुतेः प्रामाण्यं नाभ्युपगच्छन्तीति स्वस्वतीर्थंकरवचनानि युक्तिविशेषांश्चावलम्ब्य स्वं स्वमर्थमातिष्ठन्ते। उत्तराणि तु त्रीणि श्रुतेः प्रामाण्यमभ्युपयन्त्यपि युक्तिविशेषपुरःसरं श्रुतेरर्थमन्यथान्यथैव व्याचक्षाणा विवदन्ते। अन्यानि तु भवेयुर्यदि कानिचन दर्शनानि, तर्ह्यत्रैव तानि यथायथमन्तर्भाव्यानीति सर्वं सुस्थम्।

अथेदं तावद्विचार्यम्—सकलविज्ञानमौलिललामभूतं भारतस्य चिराय मुखमुज्ज्वलयद्दर्शनविज्ञानमिदं कदा केन वा क्रमेण जगत्याविर्भूतम्? तत्रापि भारतोपक्रममेव जगत्यस्याविर्भाव इति सर्वेषां शेमुषीजुषां सिद्धान्त इति भारत एव वर्ष प्रादुर्भावोऽस्य पुरतः पर्यालोचनमर्हति। द्विविधाश्चात्र पर्यालोचकाः, जगदीश्वरानुग्रहनिगृहीतनिःशेषनास्तिक्यभावाः श्रद्धालुस्वभावाः केचन महान्तः 'अपौरुषेयं वाक्यं वेदः' इति चिरन्तनवचसि चिरं विश्वसन्तोऽपि वेदप्रामाण्यादेव नैतासु कालनिर्णयजल्पनासु पदमप्यादधति। अनादिर्हि भगवान् वेदः—'ब्रह्माद्या ऋषिपर्यन्ताः स्मर्तारोऽस्य न कारकाः', स एव चायं निधिः सर्वविद्यानाम्-नास्ति भारते किमु भारते जगत्येव वा, किमपि तद् यन्न भवेच्छ्रुतिषु श्रुतम्। तदित्थमनाद्याः सर्वा अपि विद्या इति नैषां मते विचारणीयोऽयमर्थः। अन्ये त्वैतिहासिकेषु भावेषु परीक्षणीयेषु श्रद्धां सुदूरमुत्सृजन्तो भजन्तः केवलामुपपत्तिं, प्रत्यक्षमात्रपरायणाः सद्योजातबालनिदर्शनेन क्रम-

विकासमेव जगति विद्यानां सर्वासामुररीकुर्वते। न चैतिहासिकपद्धतिमवलम्बमाना मन्त्रब्राह्मणात्मकस्य वेदस्यान्यस्य वा कस्यापि शास्त्रस्यानादितामपौरुषेयतां वा स्वीकर्तुं सन्नह्यन्ति। तेषामेषां दृष्टौ सर्वमपि विचार्यम्, सर्वमपि दृढाभिरुपपत्तिभिः परीक्ष्यम्, सर्वत्रैव जनश्रुतिमात्रे दर्शनीयः सर्वथाऽनाश्वासः। तेनैव मार्गेण च तेऽवबोधनीयाः कस्याप्यनादितां सादितां वा न तु श्रद्धया केवलया। त इमे श्रद्धाधनैः किमु 'नास्तिका' इति समर्प्य विशिष्टमुपाधिमुपेक्ष्या एव। एषामपि दृष्टौ गौरवं प्राक्तनानां शास्त्राण्यारोपयितुं किमु नाश्रयणीय एव यत्नः? विश्रृंखलैषां विचारधारा दृढैरुपपत्तिखनित्रैः किमु न प्रवाहणीयास्मदभिमते मार्गे? अहन्तु पश्यामि—अवश्यं कालेऽस्मिन् यथापि संभवेत्तथा यतनीयमेव स्वसिद्धान्तानां गौरवमभिरक्षितुम्। अस्तु स्वकीया चिरमक्षतैव श्रद्धा—लोकसंग्राहार्थं तु स्वयमपि तटस्थेनैव भाव्यम् विचारकेण।

तद्वयमर्यादानीं विचारपद्धतौ पतन्त एतामेव पन्थानमनुसरन्तो न वाच्या भवेम धर्ममर्मस्पृशां श्रद्धाजुषामिति क्षमामभ्यर्थयामहे।

एष तावाद्विचारकाणावैदेशिकानांविदुषां केषांचित्तदनुयायिनां भारतीयानाच विषयेऽस्मिन् विवेचनासारः—यदत्यन्तप्राचीनेष्वार्येषु नासीदिदं दर्शनविज्ञानम्। ते हि केवलं जलवायुसूर्याग्न्यादिभिः प्राकृतिकैः पदार्थैरनुक्षण चमत्क्रियमाणचेतसस्तानेवोपासते स्म, तानेव मन्त्रैः पुनः पुनर्वर्णयन्ति स्म। तैरेव कर्माणि विदधति स्म। क्रमेण तु सर्वस्योत्पादके परमात्मनि नाम कस्मिश्चन वस्तुनि समाकृष्टा दृष्टिः, क्रमेणैव तु प्रादुरभूवन् पारलौकिका विचाराः। उपनिषदां काले च जजागार विज्ञानमिदं दार्शनिकम्, तदात्व एवाभवदान्दोलनमात्मेश्वरादिविषयाणां प्राधान्येन। सोऽयं विज्ञानमध्याह्नः।

वैदिकेषु सूक्तेषु अग्निवाय्वादित्यवरुणपृथिव्यादीनां प्राधान्येन स्तवोपलम्भः, विज्ञानस्य तत्र क्वचिदेव समुन्मेषः, उपनिषदां भाषावैचित्र्यम्, उपनिषत्सु विज्ञाननिरूपणप्राधान्यम्, क्वचिदुपनिषत्सु ऋग्वेदादीनामपरविद्यात्वेनोल्लेखश्च मतस्यास्य भवति मूलम्।

इदमपरमेषामुक्तिवैचित्र्यं यत्क्षत्रियैरेवाविष्कृतमिदमौपनिषदं दार्शनिक वा विज्ञानं न तु ब्राह्मणैः। ब्राह्मणग्रन्थेषु ब्राह्मणानामनुदिनं वर्द्धमानं कर्मकाण्डाडम्बरं सकलजगति कर्मपरायणतया विजृम्भमाणं च ब्राह्मणानामाधिपत्यमसहमाना एव क्षत्रिया विज्ञानमेतत् प्रकटयांचक्रुः। विव्यधुश्च क्रमेण कर्ममर्म। आसीच्च क्रमेण क्षत्रियोपज्ञस्य विज्ञानस्यैवास्य साम्राज्यम्—अस्त

मुपगतश्च ब्राह्मणानां कर्माडम्बरः। ब्राह्मणा अपि तदा विज्ञानपथमेवानुसस्रुरिति।

अस्यापिमतस्य मूलमुपनिषत्सु श्रूयमाणा केवलकर्मिणां क्वचन निन्दा। आख्यायिकाश्च काश्चन समुपलभ्यमाना उपनिषत्सु मतस्यास्य मूलत्वमुपयान्ति।

तथा हि—ताण्डिश्रुतौ छान्दोग्योपनिषदि पंचमप्रपाठके तृतीये खण्डे दृश्यते—गौतमः श्वेतकेतुरारुणेयो ब्राह्मणः पांचालानां परिषदि गतः प्रावाहणिना जैबलिना क्षत्रियेण पंच प्रश्नान् पृष्टः,

'वेत्थ यदितोऽधिप्रजाः प्रयन्तीति' ॥ १ ॥
'वेत्थ यथा पुनरावर्त्तन्ता इति' ॥ २ ॥
'वेत्थ पथोर्देवयानस्य पितृयाणस्य च व्यावर्त्तन्ता इति' ॥ ३ ॥
'वेत्थ यथाऽसौ लोको न संपूर्यत इति' ॥ ४ ॥
'वेत्थ यथा पंचम्यामाहुतावापः पुरुषवचसो भवन्तीति ॥ ५ ॥

विज्ञायेत विवेकशीलैर्यन्मृतस्य परलोकगतिसम्बन्धिनः पंचापि प्रश्ना। तानेतान् नोत्तरयितुं शशाक श्वेतकेतुः। स च स्वगुरोः पितुर्गौतमस्य समीपमेत्य तानेव पप्रच्छ प्रश्नान्। सोऽप्यविदन् प्रावाहणिमेवोपेयाय। चिरं प्रार्थितः प्रावाहणिरेतं शिक्षयन्नुवाच।

'यथेयं न प्राक् त्वतः पुरा विद्या ब्राह्मणान् गच्छति, तस्मादु सर्वेषु लोकेषु क्षत्रस्यैव प्रशासनमभूदिति'। अभिव्याहृताग्रे तेन पंचाग्निविद्या यत्र मृतस्य मनःप्राणेन्द्रियभूतसूक्ष्मादिसमष्टेः सूक्ष्मशरीरस्य पूर्वं चन्द्रमसि, तत्र भुक्तभोगस्य ततः पर्जन्ये, ततः पृथिव्यामन्नरूपेण, अनुमातरि गर्भरूपेणेति पंचभिराहुतिभिः पुनः पुरुषरूपता प्रतिपाद्यते। ये त्वर्चिमार्गमनुसृतास्तेषामर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङेति मासांस्तान्, मासेभ्यः संवत्सर संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषो मानवः स एतान् ब्रह्म गमयत्येष देवयानः पन्थाः' इति देवयानमार्गेणापुनरावृत्तिरुच्यते। समाधीयन्ते चान्येऽपि मध्ये मध्ये प्रश्नाः।

शतपथान्तर्भूतस्य बृहदारण्यकस्य षष्ठेऽध्याये द्वितीये ब्राह्मणेऽपीयमेवमेवोपलभ्यत आख्यायिका। उक्तं च तत्रापि।

'तथा नस्त्वं गौतममापराधास्तव च पितामहा यथेयं विद्येतः पूर्वं न कस्मिंश्चन ब्राह्मण उवास तां त्वहं तुभ्यं वक्ष्यामि' इति।

कौषीतक्युपनिषदि चायमेव वारुणेः पुत्रः श्वेतकेतुश्चित्रस्य गार्ग्यायणेर्याजनार्थं पित्रा प्रेषितस्तेन गौतमस्य पुत्र! अस्ति संवृतं लोके यस्मिन् मा

धास्यसि, अन्यतमो वाध्वा तस्य मा लोके धास्यसि' इति किंचिद्वैचित्र्येण परलोकगतविषय एव पृच्छ्यते । तथैव च पितुः सकाशमुपगतः, पिता चोपेत्य चित्रं गार्ग्यायणिं ब्रूते—'उपायानीति' स च ब्रवीति 'ब्रह्मार्थोऽसि गौतम ! यो न मानमुपागाः, एहि व्येव त्वा ज्ञपयिष्यामीति' अनन्तरं च मृतानां चन्द्रलोकगमनम्, ततः केषांचिद् वृष्ट्यादिक्रमेण पुनरावृत्तिः, अपरेषां च विज्ञानवतां वाय्वादित्यवरुणेन्द्रप्रजापतिलोकानुक्रमेण ब्रह्मलोकावाप्तिः, तत्र विरजानदीसंक्रमणादिकं च विस्तरेण प्रतिपाद्यते । 'ब्रह्मार्थोऽसि गौतम' इत्युक्तिभंग्या च आरुणेर्याजियत्वप्रसक्तया उपनिषदन्तरैकवाक्यतया चास्य गार्ग्यायणेश्चित्रस्यापि क्षत्रियत्वमेव बुद्धिमुपारोहतीति विदुषां विवेच्योऽयमर्थः । तदित्थं पारलौकिकं विज्ञानं क्षत्रियोपज्ञं स्पष्टं सिद्ध्यति ।

अन्यास्वपि विद्यासु क्वचिदालोक्यते प्रवक्तृत्वं क्षत्रियाणाम् । तथा हि छान्दोग्ये (१ अ० ८ ख०) शिलकः दाल्भ्यश्चेति द्वौ ब्राह्मणौ प्रवाहणो जैवलिः क्षत्रियश्चेति साम्नः प्रतिष्ठाविषये विवदन्ते । शिक्ष्यन्ते चान्ते प्रवाहणेनैव तत्वम् । ५ प्रपाठके एकादशादिखण्डेषु च कैकेयोऽश्वपतिर्ब्राह्मणान् वैश्वानरमात्मानमुपदिशति । पृथक् पृथक् लोकोपासना च तदीयां निन्दति । सिद्धान्तयति च प्रादेशप्राणोपासनं श्रेयः । बृहदारण्यकेऽपि द्वितीयेऽध्याये दृप्तबालाकिर्गार्ग्यो ब्राह्मणः काश्यपस्याजातशत्रोः सकाशं ब्रह्म प्रस्तोतुमुपगतस्तस्मात्पराजयते । पृच्छंश्च तमेव तत्वं प्रतिलोमं वै तद् यद् ब्राह्मणः क्षत्रियमुपेयात्, ब्रह्म वक्ष्यतीति, व्येव त्वा ज्ञपयिष्यामीति, इति स्वकीयं विनयमुपदर्शयता अजातशत्रुणा सुप्तं पुरुषमभिगम्यात्मनः शरीराद्यतिरेकं प्रबोध्यते । श्रूयन्ते च बहवो जनकाद्या राजर्षयऔपनिषदविज्ञानपारंगताः । तेन क्षत्रियाणामेव दार्शनिकविज्ञानाविष्कर्तृता स्फुटं सिद्ध्यति । उपनिषद्भिश्चात्मादितत्वं प्रतिपादयन्तीभिः—

'न कर्मणा न प्रजया धनेन
त्यागेनैकेनामृतत्वमानशुः ।'
'प्लवा ह्येते अदृढा यज्ञरूपाः'

इत्यादिना कर्मकाण्डं प्रतिक्षिप्यते ।

'द्वे विद्ये वेदितव्ये परा चैवापरा च,
तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वांगिरसः'

इत्यादिना मन्त्रभागश्च समाक्षिप्यत इव । तेन ब्राह्मणानां कर्माडम्बरखिन्नैरेव क्षत्रियैर्विज्ञानान्येतानि प्रचारयितुमुपक्रान्तानीति न दुर्बोधोऽयमर्थ इति ।

तदेतद् विज्ञानपारंगतानामितिहासतत्त्वविदामप्याधुनिकानां विदुषां मत नानुमोदयितुं पार्यते ।

आस्तां मनुष्यसमाजे ज्ञानस्य क्रमविकासः, आस्तां वा ईश्वरानुग्रहाधिगतवेदद्वारा सहसैव विज्ञानपारंगमत्वम्, नात्रेदानीं विवदितुमिच्छामि । मन्त्र-संहिताविर्भावकाले नासीदृषीणां विज्ञानतत्त्वावबोधः—क्रमेण तूपनिषत्काले स पल्लवित इति तु सर्वथा दुरुपपादं मतमिदम् । संहितास्वेव सर्वविधविज्ञानस्य सूत्ररूपेण समुपलभ्यमानत्वात् । सर्वविज्ञाननिधिरेवायं भगवान् वेदराशिरीश्वरेण महर्षीणां बुद्धावाविर्भावितः । विज्ञानस्य क्रमविकासवादेऽपि यदा पूर्णतया विकासमलभत सर्वविधं महर्षिषु विज्ञानं तदैवायमाविर्भूतो वेदराशिः । तत एवात्र सर्वविधस्यैव विज्ञानस्य न दुर्लभं सूत्रम् । वेदसमुद्रावगाहने कृतयत्नाः विपश्चित एवैतत्परिचिनुयुः दिङ्मात्रं तु महानुभावानां मनोऽनुरंजयितुमुदाहरिष्यामः ।

उक्तं प्राक्—आत्मादितत्त्वज्ञानमेव दर्शनानां मुख्यतमो विषयः । कथमस्य जगतः सृष्टिः, किमस्य मूलकारणम्, को जीवः, क ईश्वरः, कोऽनयोः सम्बन्धः कः परलोकः, कथं गतिः, कथमागतिः, कान्यात्मन उपकरणभूतानि मन-आदीनि, कानि जगदीश्वरस्याज्ञाविधेयानि जगच्चक्रनिर्वाहकाणीत्यादीनांदुरूहाणां मनुष्यचेतसि स्वभावतः आविर्भवतां प्रश्नाना सम्यगुत्तरणमेव प्रधानतमं विज्ञानम् । तदेव पल्लवितमुपनिषत्सु, पुष्पितं फलितंच दर्शनेषु—इति विस्तार-दृष्ट्या शक्यत एतद्वक्तुम् । परं बीजरूपेणतु सर्वमपीदं निहितं संहितास्वेव ।

तथा हि ऋग्वेदस्य दशमे मण्डले एकोनत्रिंशदुत्तरशततमे परमेष्ठिनः प्रजापतेरार्षे सूक्ते—

> नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमापरो यत् ।
> किमावरीवः कुहकस्य शर्म्मन्नम्भः किमासीद्गहनं गभीरम् ।
> न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेतः ।
> आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किंचनास ।

इत्युपक्रम्य सर्वापि सर्गविद्या सूत्ररूपेणाम्नाता । आनीदवातं स्वधयातदेवमिति प्राणनम्—अन्तर्निहितानां जगतां बहिर्निस्सारणंकुर्वत् स्वधया—शक्त्य सहैकमेवतत्त्वमासीदितिस्पष्टं निर्दिष्टम् । न चैतत् वायुरूपमिति अवातमिति पदेनाम्नातम् ।

अन्ते चास्य सूक्तस्य

को ऋग्वेद क इह प्रवोचत् कुत आ जाता कुत इयं विसृष्टिः
अर्वाग्देवा अस्य विसर्जने नाथा को वेद यत आबभूव।
इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न।
यो अस्याध्यक्षः परमेव्योमन् सो अंग वेद यदि वा न वेद।

इति सृष्टिविज्ञानस्यात्यन्तं गभीरता, अनिर्वचनीयता, देवैः सर्वथा कर्त्तुमशक्या सृष्टिरीश्वरकर्त्तृकैवेति च श्रूयत एव एकं मूलं जगतः।

सर्वश्चायं वेदः प्रायेण पारलौकिकान्येव फलानि प्राधान्येनोद्दिश्य कर्माणि विधातुं प्रवृत्तः, यो हि शरीराद्यतिरिक्तमात्मानं जीवापरपर्यायं न जानाति, स परलोकाय यत्नमुपदिशतीत्यप्रमत्तानां दूरापैतैव कथेयम्। स्पष्टमपि तु जीवस्य विज्ञानं श्रुतौ शृणुमः—

अनच्छये[1] तुरगातु[2] जीव[3]मेजद् ध्रुवं मध्य आ पस्त्या[4]नाम्।
जीवो मृतस्य चरति स्वधा[5]भिरमर्त्योमर्त्येना स योनि।

(ऋ० १ म० १६४ सू० ३० मन्त्रः, दीर्घतमा ऋषिः)

पूर्वार्द्धे—शरीरमेतज्जीवनवत् स्वापाराय तूर्णगमनं तिष्ठति, प्राणापगमे तु अविचालिगृहमध्ये शेते—इति शरीरसम्बन्धेनोक्तम्। उत्तरार्द्धे च स्वयममर्त्योऽपि मर्त्यशरीरसहचरो जीवः मृतस्य मरणानन्तरं स्वधाभिश्चरतीति जीवस्य पुनरवस्थितिद्वारा नित्यत्वमुपदिष्टम्।

अपाङ् प्राङेयत स्वधया गृभीतो मर्त्यो मर्त्येना स योनिः।
ता शश्वन्ता विषूचीना वियन्तान्यन्यं चिक्युर्न निचिक्युरन्यम्।

(तत्रैव सूक्ते ३८ म०)

अत्र च शारीरः पुरुषो भूतात्मा शरीरातिरिक्तः कर्तात्मा चेति परस्परमनुबद्धौ सहचरावाख्यातौ। तत्र शरीरं सर्वेऽप्यवबुध्यन्ते, आत्मानं तु न प्राकृता अवबुध्यन्ते—इति चात्मविज्ञानस्य दुरूहतोपदिष्टा।

यत्रा सुपर्णा अमृतस्य भागमनिमेषं विदथाभिस्वरन्ति।
इना विश्वस्य भुवनस्य गोपाः समाधीरः पाकमत्राविवेश॥

(तत्रैव सूक्ते २१ म०)

---

१. प्राणनं कुर्वत्, २. शेते, ३. स्वव्यापाराय तूर्णगमनं सदेजद्, ४. जीवनवद्, ५. मरणान्तरमितिशेषः, ६. गृहाणाम्, ७. श्राद्धदत्तै ८. अन्तोपलक्षिततद्भोगेन।

इह सुपर्णाः शोभनपतनानीन्द्रियाणि, अमृतं च विज्ञानं, विदथा वेदनेन—वृत्यात्मकेन ज्ञानेनेति इन्द्रियजन्यवृत्तिद्वारा आत्मन उपभोग आख्यात इति व्याचष्टे निरुक्तकृद् भगवान् यास्कः।

अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन् पूर्वमर्षत्।
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति।
तदेजति तन्नैजति तद्दूरे तद्वन्तिके।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः॥

(यजु : ४० अ०)

इति च यजुःसंहितायामेव स्पष्टं सर्वमात्मविज्ञानम्।

अथ—विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात्।
संबाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन् देव एकः।
किंस्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः।
मनीषिणो मनसा पृच्छतेदु तदध्यतिष्ठद् भुवनानि धारयन्।

(ऋ० १०।८१।३-४
विश्वकर्मा ऋषिः)

ब्रह्म तद्वनं ब्रह्म स वृक्ष आस यतो द्यावा पृथिवी निष्टतक्षुः।
मनीषिणो मनसा विब्रवीमि तद् ब्रह्माध्यतिष्ठद्भुवनानि धारयन्॥

(तैत्तरीयारण्यके)

मतं विदाथ य इमा जजानान् यद्यस्माकमन्तरं बभूव।
नीहारेण प्रावृता[1] जल्प्या[2] चासु तृप उक्थ शासश्चरन्ति।

(ऋ० १०।८२।७ यजुः १७।३१
विश्वकर्मा ऋषिः)

इत्यादिभिर्भूरिभूरिमन्त्रैर्भगवान् जगदीश्वरस्तत्र तत्र स्तुतः
द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति[3]।

इति चोपाधिपरिच्छिन्नेन जीवेनेश्वरस्य तारतम्यमप्याम्नातम्। सर्वं विज्ञानं यत्र परिसमाप्यते—'यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते' तदिदमीश्वराद्वैतविज्ञानमपि तत्र तत्र संहितास्वेव समाम्नातम्—

---

१. अज्ञानेनावृताः। २. अनृतजल्पनेन प्रवृत्ताः।
३. अथ० ९ का० ५ अनु० २०: ऋ० म० १।१६४ सू० २० दीर्घतमाः।

रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय ।
इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शतादश ।

(ऋ० म० ६।४७।१८: भरद्वाजो गर्ग ऋषि)

तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः ।
तदेव शुक्रं तद्ब्रह्म ता आपः स प्रजापतिः ।

(यजु० ३२ अ०)

पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ।

(पुरुष सूक्त)

अथ अम्भृणस्य महर्षेर्दुहिता वाङ्नाम्नी ब्रह्मविदुषी आविर्भूतब्रह्मभावा तदभेदेनात्मानं स्तौति—

अहं रुद्रेभिर्वसुभिश्चरामीत्यादि—

(ऋ० म० १० । १२५ सू०)

अहमेव वात इव प्रवाम्यारभमाणा भुवनानि विश्वा ।
परो दिवा पर एना पृथिव्यै तावती महिना संबभूव ।

: अन्यान्यपि सन्त्याध्यात्मिकानि सूक्तानि—

तेन चात्मब्रह्माद्वैतं स्फुटत्येव विदुषाम् ।
यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ।
यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ।

(यजुः ४० अ०)

इति चैकात्म्यविज्ञानं स्पष्टमेवोपदिष्टमाध्वर्यवश्रुतौ ।
ऋचो अक्षरे परमेव्योमन् यस्मिन् देवा अधिविश्वे निषेदुः ।
यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ।

(ऋ० १। १६४। ३६
दीर्घतमा ऋषिः)

[—सर्वासामृचां प्रतिपाद्ये अनश्वरे व्यापके परे ब्रह्मणि-यत्र सर्वे देवाः प्रतिष्ठिताः—तं यो न वेद स ऋचा मन्त्रेण किं करिष्यति, तद्विद्वांसस्तु सम्य-

गासते-अविचालिनस्तिष्ठन्तीति ईश्वरविज्ञानस्तुतिपरोऽर्थः । आत्मविज्ञानस्तुतिपरोऽपि यास्केनोक्तः—'शरीरमत्र ऋगुच्यते' यदेतेनार्चन्ति । प्रत्यृचः सर्वाणीन्द्रियाणि, तस्य यदविनाशि धर्म तदक्षरं भवति । इन्द्रियाण्यत्र देवा उच्यन्ते यान्यस्मिन्नधिनिषण्णानीत्यात्मप्रवादाः । इत्यादिना]

इति च ऋग्वेद एव ब्राह्मणेन दीर्घतमसा दृष्टे सूक्ते ईश्वरमात्मानं चाविद्वांसः केवले कर्मादौ निरताः कटाक्ष्यन्त इव ।

तद्वां नरा सनये दंस उग्रमाविष्कृणोमि तन्यतुर्न वृष्टिम् ।
दध्यङ् मन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा प्रयदीमुवाच ।

(ऋ० १। ११६। १२)

इति च या मधुविद्या संक्षेपेण सूचिता, सैव छान्दोग्ये बृहदारण्यके च विस्तृता सम्यगालोक्यते । आथर्वणेन दधीचा हि प्रकटितेयमिहाख्याता । इत्थं सर्वाण्यपि विज्ञानानि सर्वा अपि विद्या औपनिषदविद्यानां सूत्रभूताः संहितासु समाम्नायन्त एवेति दिङ्मात्रमेतत् । किमन्यत्-यदिदं पारलौकिकं विज्ञानं क्षत्रियोपज्ञमुपनिषत्काल एवाविर्भूतमिति दृढेन प्रमाणेनाऽभिनिविश्यते-तदप्यालोक्यतां विजृम्भमाणं संहितासु—तथाहि मृतं पुरुषमुद्दिश्य दाहकाले वदति संस्कर्ता—

'पूषा त्वेतश्च्यावयतु प्रविद्वाननष्टपशुर्भुवनस्य गोपाः ।
सत्वेतेभ्यः परिददत् पितृभ्यो अग्निर्देवेभ्यः सुविदत्रियेभ्यः ।

(ऋ० १०।१७।३
देवश्रवा ऋषिः)

यत्रासते सुकृतो यत्र ते ययुस्तत्र त्वा देवः सविता दधातु

(ऋ० १०।१७।४)

प्रेहि प्रेहि पथिभिः पूर्व्येभिर्यत्रा नः पूर्वे पितरः परेयुः ।
उभा राजाना स्वधया मदन्ता यमं पश्यासि वरुणं च देवम्

(अथ० १८ का० १ अ०)

इत्यादिषु पितृलोकगतिस्तत्र प्रापकत्वं च तत्तद्देवानां श्रूयते—

संगच्छस्व पितृभिः संयमनेष्टापूर्त्तेन परमे व्योमन् ।
हित्वा यावद्यं पुनरस्तमेहि संगच्छस्व तन्वा सुवर्चाः ।

(अथ० १८।१)

अवसृज पुनरग्ने पितृभ्यो यस्त आहुतश्चरति स्वधाभिः ।
आयुर्वसान उपवेतु शेषः संगच्छतां तन्वा जातवेदः ।

(ऋ० १०।१६।५)

इत्यादिषु मृतस्य पुनःशरीरग्रहणं स्फुटीभवति । अत्र कर्मानुसारं नानाविधा गतयः श्रूयन्ते ।

द्वे सृती अशृणवं पितृणामहं देवानामुत मर्त्यानाम् ।
ताभ्यामिदं विश्वमेजत् समेति यदन्तरा पितरं मातरं च ।

(ऋ० १०।८८।१५ आर्षंगरसो
वामदेव्यो वा मूर्धन्वानृषि)

इह तु स्फुटमेव देवयानपितृयाणौ पन्थानौ प्रतिपाद्येते ।

वन्दस्व मरुतां गणं त्वेषं पनस्युमर्किणम् ।
अस्मे वृद्धा असन्निह । (ऋ० म० १।३८।१५)

इत्यादौ चान्तरिक्षे मृतानामवस्थितिर्व्यज्यते ।

द्यौर्नः पिता जनिता नाभिरत्र बन्धुर्नो माता पृथिवी महीयम्
उत्तानयोश्चम्वोर्योनिरन्तरत्रा पिता दुहितुर्गर्भमाधात् ।

(ऋ० १।१६४।३३ (अथ० का० ९ अनु० ५ सू० १०।१२)

इत्यादिषु अन्तरिक्षक्रमेण पुनरागतिरभिव्यज्यत एव

पुंसि वै रेतो भवति तत् स्त्रियामनुषिच्यते ।
तद्वै पुत्रस्य वेदनं तत्प्रजापतिरब्रवीत् । (अथ० ६।११।१।२)

इत्यादिषु चतुर्थी पंचमी चाहुतिराम्नायत इति विवेच्यतां सुधीभिः सर्वापि पंचाग्निविद्या ।

'यज्जाग्रतो दूरमुदैति दैवम्'

इत्यादौ शिवसंकल्पसूक्ते च स्फुटमात्माधकरणस्य मनसो विज्ञानम् । ईश्वराज्ञाविधेयानामग्निवाय्वादित्यवरुणयमादीनान्तु विज्ञानं प्रतिपदं जागर्त्येवेति किमु तदुदाहरणेन । कियदुदाहरामः, सर्वाण्येवं विद्या सूत्ररूपेण स्फुटमुपलभ्येत संहितासु समीक्षादक्षैः । सर्वेऽपि चादोहृता मन्त्रा इमे प्रायेण ब्राह्मणैरेव दृष्टा इति ब्राह्मणेषु नासीत्पूर्वमिदं दार्शनिकं विज्ञानमित्युक्तिरभित्तिचित्रायितेव । यत्तूपनिषत्सु क्षत्रियेभ्यस्तत्तद्विद्याग्रहणं श्रूयते ब्राह्मणानाम्-तत्कस्मिंश्चित्कालविशेषे देशविशेषे वा बहुज्ञतां कस्याश्चित् क्षत्रियव्यक्तेराख्यास्यति, गृहीता हि बह्वयो

विद्यास्तेषु तेषु कालेषु तैस्तैर्ब्राह्मणैस्तत्तत्क्षत्रियेभ्य इति तद्ब्राह्मणापेक्षया तत्क्षत्रियस्य बहुज्ञता सिद्ध्यत्येवम्। न तु ब्राह्मणजातिरेवैतद्विज्ञानशून्यासीत्-क्षत्रिय जात्यैव वा आविष्कृतं दार्शनिकं विज्ञानमिति शक्यते केनापि वक्तुम्। साम-प्रतिष्ठाप्रकरणं पूर्वोक्तं व्याचक्षाणो ह्याह भगवान् शंकराचार्यः—

त्रयो होद्गीथे कुशला बभूवुः,-कस्मिश्चद्देशे काले च निमित्ते वा समेतानामित्यभिप्रायः। न हि सर्वस्मिन् जगति त्रयाणामेव कौशलमुद्गीथादिविज्ञाने। श्रूयन्ते ह्युषस्तिजानश्रुतिकैकेयप्रभृतयः सर्वज्ञकल्पाः। छा० १।८ इति।

सामप्रतिष्ठाविज्ञानं चेद् परमात्मन एव सर्वमूलतामवगत्य तदुपासनमेव, तच्च यथा सर्वासु संहितास्वेव जागर्ति तथोपादर्शयमधस्तात्।

'तान् होवाचाश्वपतिर्वै भगवन्तोऽयं कैकेयः संप्रतीममात्मानं वैश्वानरमध्येति, तं हन्ताभ्यागच्छामेति'

(छा० ५ अ० ११ ख०)

इति च वैश्वानरात्मविज्ञानोपदेशस्योपक्रमे संप्रतीतिश्रवणात्तत्काल एव प्राधान्यं तस्य क्षत्रियस्य सिद्ध्यति। वैश्वानरात्मोपदेशाश्च तस्मिन्प्रकरणे सर्वलोकसमष्ट्यात्मकस्य विराड्रूपस्य परमात्मन एवोपदेशः। स च 'सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्' इत्यादिषु पुरुषसूक्तमन्त्रेषु संहितायामेव केन न श्रुतः। प्राक्तनश्च संहिताविर्भावो ब्राह्मणाविर्भावादिति नात्र कस्यचिदपि सचेतसो विमतिरुदियात्। यद्यपि संहितास्वपि अस्ति वैदेशिकानां विदुषां विप्रतिपत्तिः। ऋक्संहितैव प्राक्तनी, अर्वाचीनास्त्वितराः संहिताः, ऋक्संहितायामपि मण्डलविशेषा अर्वाक्तना इति तथापि सर्वासां सर्वत्र नामोपलम्भादिभिर्दृढैः प्रमाणैः सेयं प्रतिक्षिप्ता बहुभिर्विद्वद्भिरिति न तत्प्रपंचयितुमुत्सहे। ब्राह्मणाविर्भावात्तु सर्वासां संहितानामाविर्भावः प्राचीन एवेत्यकामैरपि सर्वैरेवोपगन्तव्यं स्यात्। कर्मविधिरूपत्वाद्ब्राह्मणानाम्, यजुरादिसंहिताभिर्विना च कर्मणः सर्वथानुपपद्यमानत्वात्। संहितामूलाश्च विद्या ब्राह्मणेषूपनिषत्सु च। बृहदारण्यके हि [६ अ० २ ब्रा०] पंचाग्निविद्याया स्फुटं मूलत्वेनोपन्यस्तो मन्त्रः—'अपि हि न ऋषेर्वचः श्रुतम् द्वे सृती अशृणवं पितृणामित्यादि।

ततश्च संहिताकाले यासां विद्यानां पारदृश्वानो ब्राह्मणा अभूवंस्ता ब्राह्मणजात्यैव क्षत्रियजातेः सकाशाच्छिक्षिता इति क एतच्छ्रद्दध्यात्। यत्तु 'यथेय न प्राक्त्वत्तः पुरा विद्या ब्राह्मणान् गच्छति' इत्याद्याख्यातं पंचाग्निविद्यासम्बन्धे पूर्वम् तत्रेत्थमुक्तिसंभवः। अतिप्राचीने काले ब्राह्मणेषु क्षत्रियेषु च 'विजृम्भ-

माणमपि तत्तद्विज्ञानं कालक्रमयोगेन ब्राह्मणैः परित्यक्तं भवेत्, क्षत्रियैश्च सुरक्षितं भवेत्—ततो महता कालेन पुनरारुणिना गौतमेन जैबिलेस्तच्छिक्षितमिति क्षत्रियेभ्यो ब्राह्मणेषूपागाद्विद्येयम् विनश्यन्ति पुन प्रादुर्भवन्ति च कालक्रमेण विज्ञानानीति स्फुटं स्मर्यतेऽयमर्थस्तत्र तत्र—

'स कालेनेह महता योगो नष्टः परन्तप'। (भगवद्गीता भगवान् वासुदेव)

'एतन्मे जन्म लोकेऽस्मिन् मुमुक्षूणां दुराशयात्।
प्रसंख्यानाय तत्त्वानां संमतायात्मदर्शने।
एष आत्मपथोऽव्यक्तो नष्टः कालेन भूयसा।
तं प्रवर्त्तयितुं देहमिमं विद्धि मया भृतम्।'

(श्रीभा० ३ स्क० २४ अ० ३७ भगवान् कपिलः)

अस्तु वा विकाशवादरीतिमवलम्ब्य कश्चित्तद्विशेषः पारलौकिके विज्ञाने क्षत्रियैराविष्कृत इत्यभ्युपगमः। परं पारलौकिकस्य विज्ञानस्य सर्वस्यैवाध्यात्मविज्ञानस्य मूलमेव क्षत्रिया इति तु सर्वथोपपत्तिशून्यं वचः।

उपनिषत्कालेऽपि न खलु नाभूद् ब्राह्मणानां सर्वविज्ञानेषु प्राधान्यम्। श्रूयते हि संवर्गविद्याग्रहणाय जानश्रुतेः पौत्रायणस्य क्षत्रियस्य रैक्वाख्यब्राह्मणसमीपे गमनम्। (छा० ४ अ० १ ख०) श्वेतकेतुं चारुणेयं पितैव ब्राह्मणः प्राधान्येन ब्रह्म ग्राहयति (छा० ६, १ पा०) सनत्कुमारश्च भगवान् नारदं ब्रह्मोपदिशति। याज्ञवल्क्यस्य च भगवतोऽध्यात्मविद्यायां सर्वोत्कर्षः जनकाय राजर्षये ब्रह्मविद्योपदेशश्च श्रूयते बृहदारण्यक एव। जैबलिश्चैव स्वयं ब्रवीति शिलकं शालावत्यं चैकितायनं दाल्भ्यं च–भगवन्तावग्रे वदताम् ब्राह्मणयोर्वदतोर्वाचं श्रोष्यामीति' [छान्दो० १।८] अजातशत्रुश्च काश्यो दृप्तबालाकिं गार्ग्यं ब्रह्मोपदिशन्नपि ब्रवीति 'प्रतिलोम वै तद्यद् ब्राह्मणः क्षत्रियमुपेयाद् ब्रह्म मे वक्ष्यतीति व्येव त्वा ज्ञपयिष्यामीति' [बृह० २ अ० १ ब्रा०] तेन तेन ब्राह्मणेष्वेवाचार्यत्वं प्रतिष्ठितमासीदिति स्फुटमवगम्यते। 'आचार्याद्धैव विद्याविदिता साधिष्ठं प्रापयतीति' च स्पष्टं सत्यकामाख्यायिकायां कामलाख्यायिकायां च [छान्दो० ४ अ] तेन ब्राह्मणानां कर्माडम्बरात् खिन्नैः क्षत्रियैराविष्कृतमध्यात्मं विज्ञानमिति सर्वथा निःसारतरमिदं केषांचिद्वचः—

'इदं मे ब्रह्म च क्षत्र चोभे श्रियमश्नुताम्'

इति भगवतो वेदपुरुषस्यानुशासनात्तु सर्वथानुकूल्येन परस्परानुग्रहरूपा ब्राह्मणक्षत्रिययोरासीद्वृत्तिरित्येव साधीयः प्रतिपद्यामहे शास्त्रेभ्यः। राजर्षयो ब्रह्मर्षयश्च परस्परमुपदिशन्ति स्म, परस्परं साहायकमाचरन्ति स्मेत्येवं दृश्यते सर्वत्र पर्यालोचनया।

आस्ताम्—प्रकृतमनुसरामः। तदित्थं संहितासु सूत्ररूपेण दृश्यते दार्शनिकमिदं विज्ञानम्। उपनिषत्स्विव विस्तरेण यन्नाम्नायते विज्ञानमिदं संहितासु—तत्र हेतुस्तु प्रकरणभेद एव विस्तरेण समर्थितो वेदधर्मव्याख्याने श्रीगुरुपादैः। त्रिविधं भवति विज्ञानमाध्यात्मिकमाधिभौतिकमाधिदैविकं च। तत्र शिक्षमाणेन तावदाधिदैविकमाधिभौतिकं च तत्त्वमधिगन्तव्यमिति संहितासु तदेव प्राधान्येनाम्नायते। संक्षेपतस्तु क्वचिदाध्यात्मिकं प्रसंगात्। तयोर्विज्ञानयोः परिपक्वमतीनामनुग्रहायोपनिषत्सु चाध्यात्मतत्त्वं विस्तार्यते। किं च कर्मोपासनाज्ञानाख्यं काण्डत्रयमपि सूत्ररूपेणैव संहितासूपलभामहे—कर्मविषयाऽपि संक्षेपेणैव तत्र सूत्रिता ब्राह्मणेन प्रपंच्यन्ते, आरण्यकेनोपासनाः, उपनिषद्भिश्च तत्वज्ञानम्। अन्या अपि विद्याः संक्षिप्ता एव सूत्ररूपेण समुपलभ्येरन् संहितासु। तत्रापि नास्माकं सर्वथा प्राधान्येन विकासवाद एव पक्षपातः क्रमेणाविर्भूतः क्रमेणैव विस्तृतं प्रकटीभूतं विज्ञानमिति। अपि तु कदाचिद्विकासः कदाचित्संकोचस्तस्य तस्य विज्ञानस्य कालक्रमेणोपजायते। तथा च क्रमिकोपजायमानबुद्धिमान्द्यहेतुकोऽयं प्रागुक्तो विस्तारः समर्थित आचार्यैः यास्कादिभिर्निरुक्तादिषु। पूर्वं हि प्रखरतरबुद्धयः सक्षेपतः सकेतमात्रेण तानि तानि विज्ञानानि प्रतिपाद्यन्ते स्मेति मन्त्रा एवामूं स्तेषामुद्देशाय पर्याप्ताः। परतः क्रमेण बुद्धिमान्द्येऽधिकमधिक विस्तारोक्तिरपेक्षितेति ब्राह्मणानि वेदांगानि सूत्राणि भाष्याणि निबन्धाश्चोत्तरोत्तरं विस्तृता प्रादुरभूवंश्च भवन्ति च। यावन्निर्दिष्टं तावदेवासीद्विज्ञानं संहिताकाले—इति नैव समीक्षकैर्निष्पक्षपातिभिः शक्यमप्युपगन्तुम्। विज्ञानगाम्भीर्यमन्तरेण तावदर्थनिर्देशस्य सर्वथाऽसंभाव्यमानत्वात्। दृश्यते हि यो यदर्थस्यावारपारीणो भवति स एव समर्थं संक्षेपतः शक्नोति निर्देष्टुम्। अल्पज्ञानां तु निर्देशो विपर्यस्तः सन्दिग्धो मर्मास्पृग्वा भवेत्। न चैवं वेदे विद्यानां निर्देशः। तस्माधिकारिभेदाद्विनेयबुद्धिमनुरुध्यैव वा मन्त्रेषु संक्षिप्तोक्तस्य ब्राह्मणादिनिबन्धान्तरेषु विस्तरः क्रियत इति युक्तं वचः। तत्र ब्राह्मणानि मन्त्रवदेवापौरुषेयाणीत्यास्तिकानां श्रद्धावतां दृष्टिः। यथैव जगदीश्वरेण निर्व्याजकरुणावता लोकानुग्रहाय मन्त्रा महर्षीणां ब्राह्मणरूपेणापि तेनैवाविर्भावितास्ते तेऽर्थाः क्रमेण। अपरे तूभयात्मकस्यापि वेदस्यापौरुषेयतामेवावलम्बन्त इति नैषां दृष्टौ

नास्त्येव काचन क्षतिः। ब्राह्मणैकदेशभूतासु चोपनिषत्सु विजम्भत एव विस्तरेण दार्शनिकं विज्ञानम्।

यानि किलाद्यत्वे प्रचरन्ति दर्शनानि, तेषां सर्वेषामपि मूलसूत्रमुपनिषत्सूपलभामहे। अन्नमय-प्राणमय-मनोमय-विज्ञानमयानन्दमयाः पंचकोशास्तैत्तरीयोपनिषदादिषु व्याख्याता एव पंचभिश्चार्वाकबौद्धार्हत वैशेषिकसांख्यैरात्मत्वेनाभ्युपगम्य क्रमेण विनेयानां बुद्धावुपरोहाय प्रपंच्यन्ते-इति स्वीकृतं तत्र तत्राचार्यैः। तत्तद्दर्शनजीवानुभूतानि चोपनिषदां वाक्यानि वेदान्तनिबन्धेषु प्रायेणोद्धृतान्येव निबन्धृभिरिति विस्तरभीतैरस्माभिस्तत उपरम्यत एव। अत एव तु प्राचीनतमेष्वपि रामायणादिग्रन्थेषु बौद्धादिमतोपन्यासो नानुपपत्त्या ग्रस्यते, तत्तन्मूलभूतानां मतानामनादिप्रायत्वात्। तदित्थं संहिताप्रकाशकाल एव दार्शनिकविज्ञानस्याविर्भावकालः, उपनिषत्कालश्चास्मदृशां स एवास्तु-अन्येषा ततोऽर्वाचीनोऽस्तु वा-स एष दार्शनिकविज्ञानस्य विस्तारकालः। द्वयस्याप्यस्य कालस्येदमित्थंभावेन निर्णयो न केवलमिदानीन्तनाना दुष्करः, अपि त्वसम्भूतप्राय एव। न हि तात्कालिकं क्वचिदपि भाषाहत्त्रन्यत्साहित्यमुपलभ्यते, नापि वान्यानि साधनान्येवंविधानि येन निर्णीयेत स काल। पाश्चात्यैर्विद्वद्भिरत्र निर्णये प्रवृत्तैः कथं पदे पदे स्खलितम्, कथं च क्रमेण भूयोभूय उररीकृता भ्रान्तिरात्मीयेति नापरोक्षं तद्विदुषाम्। तस्यास्य निर्णयो यदि शक्येत कर्तुम्-तर्हि पुराणश्रद्धालुभिरेव युग-मन्वन्तर-कल्पादिप्रसंख्यानेन शक्यः, नान्यः पन्था विद्यते इति उपपत्तिरसिकानां कृते मौनावलम्बनमेव तत्र श्रेयः।

अथ क्रमेण बुद्धिमान्द्याद्दुरवगाहतामापन्ने वैदिके विज्ञाने परमकृपालुभिर्मुनिभिः सूत्रग्रन्थप्रणयने व्याक्रियत संनाहः तान्येतानीदानीं सूत्राणि संक्षिप्तार्थान्यपि तदात्वेऽर्थविस्तारायैवासन्-इति विचारयद्भिः सर्वैरेवाभ्युपगम्येत। इदन्त्वनुमीयते-यान्येतानि समयेऽस्मिन्नधिगम्यन्ते सूत्राणि दर्शनानाम्, तेभ्यः पूर्वमपि आसन्नन्यानि सूत्राणि। स्मरन्ति हि हिरण्यगर्भादाना योगाचार्यत्वं योगनिष्णाताः। यानि च हस्तगतानि नः सांख्यसूत्राणि नैतान्यादिविदुषा कपिलेन संप्रोक्तानि शक्नुवन्ति भवितुम्। कपिलो हि भगवानादिविद्वान्, नारायणावतारस्य यस्योद्भवः स्वायम्भुव एवान्तर आख्यातः श्रीभागवते। तदेतत्सांख्यं दर्शनमादिमं सर्वदर्शनानाम्। प्रचलिते तु सांख्यदर्शने 'न वयं षट्पदार्थवादिनो वैशेषिकादिवत्' इत्यादिना दर्शनान्तरीयमत स्पष्टमनूद्य खण्डितम्। अवोचाम यद्यपि अनाद्येव सर्वदर्शनानां मूलमिति; अथापि मूलमात्रमर्हति भवितुमनादि। षट्पदार्थवादो वैशेषिकाख्येत्यादयस्तु

कणादोपज्ञान्येव मन्तव्याः। यथा हि विज्ञानात्मवादोयमनादिः, विज्ञानात्मवादं क्षणिकवादं च यदि खण्डयन्ति दर्शनानि नैतावता तानि भगवतो बुद्धादर्वाक्तनानि शक्यानि प्रतिपत्तुम्। बौद्धाना पारिभाषिकाणि अपोहालयप्रवृत्त्यादिपदानि तल्लक्षणानि सौत्रान्तिकवैभाषिकादितदाख्याश्च येऽनुवदन्ति भाष्यकाराद्यास्ते कथं न भवेयुरर्वाक्तना बौद्धमतप्रचारात्। एवं ह्यनादितास्वीकारे असम्भव एवेतिहासनिर्णयो भवेत्। इह तु साख्यसूत्रेषु 'विजातीयद्वैतापत्तिरन्यधर्मत्वे' इत्यादिना भगवतः शंकराचार्यादर्वाक्प्रासप्रचाराणि सजातीयविजातीयद्वैतादीन्यप्यनूद्यन्ते। विस्तरेण च निराक्रियते मायावाद। न केवलं दार्शनिकानां मतान्येव, आख्यायिकाप्रकरणे अजादीनां राज्ञा नामादि तत्रोल्लिख्यत एव। तेऽपि प्रवाहरूपेणानादय इति तु श्रद्धामात्रमनैव सतीतिहासनिर्णयः कथमपि घटेत। न चाज्ञातमितिहासं दृष्टान्तत्वेनोपाददते परीक्षकाः 'लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यम्' स एव हि दृष्टान्तः। तस्मादर्वाक्तनान्येव सांख्यसूत्राण्येतानि। अत एव तु चूर्णपेष पिषन्नपि कापिलं मतं भगवान् शंकराचार्यो न क्वचिदपि सूत्राण्युदाहरति। कारिका एव तु तत्र तत्रोल्लिखति। सूत्रभाष्यकृद्विज्ञानभिक्षुर्विपरीत्येन कारिकास्तत्र तत्र प्रमाणयतीति कारिकाणामेव मुख्यं प्रामाण्यं प्राचामिष्टमनुमीयते। तेन सिद्धे प्रचलितानां सूत्राणामाधुनिकत्वे कपिलेनादिविदुषा प्रोक्तानि सूत्राणि लुप्तान्येवेति किमन्यदतदभ्युपगमाच्छरणम्। तत्वसमासाख्यानि संक्षिप्तानि सूत्राण्येव कपिलस्येत्यभ्युपगमेऽपि विस्तृतं भाष्यं पञ्चशिखाचार्यस्य सर्वथा दृश्यमानं लुप्तमेव यत्किल वाचस्पतिनाप्युदाहृतं क्वचित्प्रसंगे। इत्थमेव—

> पंचम कपिलो नाम सिद्धेशः कालविप्लुतम्।
> प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयम्॥
> षष्ठमत्रेरपत्यत्वं वृतः प्राप्तोऽनसूयया।
> आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान्॥

इति श्रीमद्भागवते अत्रेरपत्यस्य नारायणावतारस्य दत्तात्रेयस्य आन्वीक्षिकीप्रवर्त्तकत्वमाख्यातम्। न हि सान्वीक्षिकी क्वाप्युपलभ्यत इदानीम्—गौतमोपज्ञैव तु सेदानीं प्राप्यतेऽस्माभिः। न हि केवलं दर्शनेष्वेव—वेदांगेष्वपीयमेव दशा—न ह्यष्टौ व्याकरणानि, विविधानि ज्यौतिषाणि वा कस्यापि भाग्यशीलस्य दर्शनविषयतामद्यत्व उपयान्ति। यानि तु कानिचिच्छाकटायनादीन्युपलभ्यन्त इदानीं व्याकरणानि, न तानि पाणिनेः प्राक्तनानि कथमपि

भवितुमर्हन्ति, पाणिनिकात्यायनयोरुक्तिं संक्षिप्य तत्र सूत्रनिर्माणदर्शनात्। सूत्रनिर्माण शैल्याऽन्यथान्यथापि च सम्यक् साधयितुं शक्योऽयमर्थ इति नेह तदप्रक्रान्तं विस्तारयिष्यामि। तदित्थं मध्येप्ययमू द्विद्यानामासां विस्तारः न तु तन्निर्णयः कथमपि शक्यसाधनोऽस्माभिः, ग्रन्थानामेवानुपलब्धेस्तत्कालनिर्णयस्य दूरापेतत्वात्।

अथेदानीं प्रचलितानां सूत्राणामपि कालनिर्णय इदमित्थंभावेन सर्वथा दुःशक एव। तथापि यदत्र पराक्रान्तं बहुभिः कृतविद्यस्तदवलम्ब्य किंचिद्वक्ष्यामि। एष प्रायेणोपपत्तिदृढः सूत्रविषयभाषादिपर्यालोचनामूलो बहूना विदुषां सिद्धान्तः यत्प्राक्तनानि वैशेषिकाणि सूत्राणि, ततोऽर्वाक् तु तत्सिद्धान्तव्याख्यानाय प्रवृत्तानि गौतमीयानि न्यायसूत्राणि। योगसूत्राणि तु ततोऽसम्बद्धानि तद्विषयानुवादादिविरहात्सम्यङ् निश्चेतुमशक्यान्यपि प्रायेण ततो द्वयादपि प्राचीनान्येव स्युः। तथैव सांख्यकारिका अपि कदा आविर्भूता इति दुःशकमत्र किमपि वक्तुम्, किन्तु सूत्रकालादर्वागेवासां कालोऽनुमातुं शक्योऽनुमानकुशलैः। वर्त्तते यद्यपि सांख्यदर्शनस्यैव सर्वतः प्राथम्यम्-परमिदानीमुपलब्धिपथप्राप्तानि सर्वतोऽर्वाक्तनानि सांख्यसूत्राणीति पुर एव प्रत्यपीपदम्।

योगवैशेषिकन्यायसूत्रेभ्यश्चार्वाक्तनो वेदान्तसूत्राणां कालः। तत्र सर्वेषामनुवादपूर्वकं निराकरणदर्शनात्। तत्समकालिकी च पूर्वमीमांसापि, परस्पर पूर्वोत्तरमीमांसयोर्जैमिनिव्यासनामोल्लेखदर्शनात्।

अयं चैषां पूर्वापरभावो न बहुकालव्याप्तः, अपित्वारब्धे दर्शनान्दोलने प्रायेण युगपदेव सर्वाणि प्रादुरभवन् सूत्राणि। लौकिकोपपत्तिपुरःसरो विचार एवैषां नवीनः कल्पः। दर्शनशब्दश्च सूत्रेष्वेव गतो निरूढिम्। तथा चैतानि प्रायेण भगवता व्यासेन समानकालिकान्येवेति पंचसाहस्री व्यतीयाय वर्षाणामेतत्प्रादुर्भावस्य। पुराणादिषु च मतनिरूपणेन नाम ग्रहणेन परस्परविरोधपरिहारादिना च दृश्यत एषां दर्शनानामान्दोलनम्—महाभारते तावद्विद्यानिरूपणप्रस्तावे—[महा० शा० प० २१२ अ०]

> युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः।
> लेभिरे तपसा पूर्वमनुज्ञाताः स्वयम्भुवा॥ २१॥
> नियोगाद् ब्रह्मणो विप्रा लोकतन्त्रप्रवर्त्तकाः।
> वेदविद्भगवान् ब्रह्मा वेदांगानि बृहस्पतिः॥

भार्गवो नीतिशास्त्रन्तु जगाद जगतो हितम् ।
गान्धर्वं नारदो वेद भरद्वाजो धनुर्ग्रहम् ॥
देवर्षिचरितं गर्गो कृष्णात्रेयश्चिकित्सितम् ।
न्यायतन्त्रं हि कार्त्स्न्येन गौतमो वेद तत्त्वतः ।
वेदान्तकर्मयोगं च वेदविद् ब्रह्मविद्विभुः ।
द्वैपायनो निजग्राह शिल्पशास्त्रं भृगुः पुनः ॥
न्यायतन्त्राण्यनेकानि तैस्तैरुक्तानि वादिभिः ।
हेत्वागमसदाचारैर्यदुक्तं तदुपास्यते ॥

इति कतिचिद्दर्शनानामर्थपुरःसरं कृतो नामोल्लेखः, अन्यानि च न्यायतन्त्राण्यनेकानीति' सामान्येनोक्तानि ।

श्रीभागवते चोद्धवकृष्णसंवादे—[११ स्क० २२ अ०]

कति तत्त्वानि विश्वेश संख्यातान्यृषिभिः प्रभो ।
नवैकादश पंच त्रीण्यात्थ त्वमिह शुश्रुम ॥
केचित् षड्विंशतिं प्राहुरपरे पंचविंशतिम् ।
सप्तैके नव षट् केचिच्चत्वार्येकादशापरे ॥
केचित्सप्तदश प्राहुः षोडशैके त्रयोदश ।
एतावत्त्वं हि संख्यानामृषयो यद्विवक्षया ॥
गायन्ति पृथगायुष्मानिदं नो वक्तुमर्हसि ।

इह तत्त्वसंख्यानां विविधा भेदाः प्रदर्शिताः । यद्यपि तत्प्रतिपादने प्रतीयते नात्र सप्तपदार्थादिवादौ वैशेषिकादीनाम्–सांख्यस्यैव त्ववान्तराः प्रभेदा इमे । समाहितश्च तत्रैषां मतभेदः । अथापि विविधदर्शनप्रसक्त्या सप्ततत्त्वादिसंख्यया च वैशेषिकादयोऽपि स्मार्यन्त एव ।

सात्विकं तत्र वेदान्तं मीमांसा राजसं स्मृतम् ।
तामसं न्यायशास्त्रं च हेतुवादाभियन्त्रितम् ॥

[देवी भा० १।१।१४]

इत्यादावपि दृश्यते दर्शननामोल्लेखः । सर्वदर्शनेभ्योऽर्वाक्तनं च वेदान्तदर्शनमपि पुराणेषु तत्र २ वर्णितम् ।

'ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः'

(गीता)

जीवेश्वरब्रह्मभेदो निरस्तः सूत्रनिर्णये ।

(वायु० उत्त० ख० ४२ अ०

इत्यादौ, तर्हि कान्येषां दर्शनानां कथा। तानि तु सुतरां पुरातनानि पुराणेभ्यः।

अथ वायवीये महापुराणे (पू० ख० ३२ अ०) विलोक्यते स्फुटं व्यास-साहचर्यं गौतमकणादयोः (शिवस्येदं वाक्यम्)

सप्तविंशतिमे प्राप्ते परिवर्त्ते क्रमागते
जातूकर्ण्यो यदा व्यासो भविष्यति तपोधनः
तदाप्यहं भविष्यामि सोमशर्मा द्विजोत्तमः
प्रभासतीर्थमासाद्य योगात्मा लोकविश्रुतः
तत्रापि मम ते पुत्रा भविष्यन्ति तपोधनाः
अक्षपादः कणादश्च उलूको वत्स एव च।
[मत्स्यपुराणेऽप्यस्ति (४८ अ०) गौतमकथा]

सर्वैरेतैः प्रमाणैर्भगवता व्यासेन समानकालिकत्वमेव दर्शनसूत्रकृता सिद्ध्यति। तेन पंचसाहस्त्र्याः पूर्वमब्दानां दर्शनप्रादुर्भावोऽवगन्तव्यः।

अथ भाष्याणि तु भगवतो बुद्धादर्वाक्तनानीति मे बुद्धिः। महाभारता-दर्वाक् पुनरपि अवनतिं प्राप दर्शनविज्ञानम्। बुद्धस्य भगवतः काले तु पुनरस्याभवत्प्रवृत्तिः—तस्मिन्नेव काले जैनदर्शनस्य समुन्मेषः। तदैव बौद्ध मतं निराकर्तुं प्रवृत्तास्तत्तद्दर्शनभाष्यकाराः। तत्र लेखपरिपाट्या प्रायेणेद निश्चीयते—भाष्येषु वात्स्यायनीयं न्यायदर्शनभाष्यम् पुरातनं प्रतीयते। एतद्धि चन्द्रगुप्तमन्त्रिणा प्रसिद्धेन चाणाक्येनैव प्रणीतमिति केषाञ्चिद्बुद्धिः। पक्षि-लक्ष्माणक्यो विष्णुगुप्तो वात्स्यायन इत्येकस्यैव नामानि उक्तानि त्रिकाण्ड-मण्डनादौ। मन्मतावेतत्स्वीकारे न कापि क्षतिः। उद्योतकरस्तु तद्वार्त्तिककारो विक्रमार्कसमकालिकः। तदर्वागेव भवेच्छबरस्वामिकृतं मीमांसाभाष्यम्। योगभाष्यविषये न सम्यगवधारयितुं पार्यते, व्यासनाम्ना तत्प्रसिद्ध्यति, किन्तु सूत्रकाले भाष्यनिर्माणं प्रायेण नैव बुद्धावुपारोहति, इदन्तु स्पष्टं यदुप-लभ्यमानेषु दर्शनभाष्येषु सर्वतः पुरातनं योगभाष्यमेव। पुरातनतया संभाव्य मानेन वात्स्यायनभाष्येण विरुद्धहेत्वाभासोदाहरणे योगभाष्यमतम्—'सोऽयं विकारोव्यक्तेरपैति' इत्यादिना अनूद्याभाषितम्। तेन स्फुटं योगभाष्यस्य ततोऽपि प्राचीनता सिद्ध्यति। सांख्यभाष्यं तु विज्ञानभिक्षोर्भगवतः शंकरा-दर्वाक्तनमिति न तत्र कोऽपि संशयः। स हि महाभागः पूर्वमद्वैतवादपरायणः पण्डित एव आसीत्। केनचिद् द्वैतवादिना विदुषा सपणबन्धे शास्त्रार्थे निर्जितस्तत्प्रभृत्येव द्वैतवादं जग्राहेति प्रसिद्धिः। यद्भवतु, सांख्यशास्त्रस्य

ज्ञानन्त्वस्याल्पतरमिति तद्भाष्यादेव स्फुटं प्रतीयते । तेन हि सत्वादिगुणाना द्रव्यरूपता स्वीये भाष्ये स्पष्टमुक्ता । यदि द्रव्यरूपाण्येव सत्वादीनि लघूनि तेषांच समवायेनैव सर्वे पदार्था उत्पद्यन्ते, तर्हिवैशेषिकापेक्षयाऽस्माकं को विशेष इति शंकित्वा वैशेषिकाः परमाणुषु रूपरसादीन् गुणान् मन्यन्ते, वय तु सत्वादिषु रूपरसादीन् नाभ्युपगच्छामः इत्येव विशेषं व्याख्यातवान् । अहो सांख्यदर्शनभाष्यमपि कुर्वन् स आरम्भपरिणामवादयोर्भेदमपि न सुस्फुटं जानीतिस्मेति महदिदमाश्चर्यस्थानम् । लघुनोद्रव्यान्महदुत्पत्तिरित्यारम्भवादः, एकस्या अवस्थाया अवस्थान्तर प्राप्तिः परिणामवादः । तदिदमवस्थान्तरं क्वचित्स्थूलं क्वचित्सूक्ष्ममपि वा भवतीति सूक्ष्मादेवस्थूलोत्पत्तिरिति नायं नियमः परिणमवादे । सत्वादिगुणाश्चेमे न द्रव्यरूपा अपितु क्रियारूपाः, तस्या अपि पूर्वावस्था मूलशक्तिरूपा । बलं शक्तिः क्रियेत्येक एवार्थः । प्रसुप्तावस्थायां यद्बलमुच्यते तदेव कुर्वद्रूपता गृह्णच्छक्तिर्भवति तदेवच क्रियारूपतामासाद्य विलयं यातीति क्रम एव ब्रह्मसिद्धान्ते स्फुटं प्रतिपादितः । वस्तुतस्तु द्रव्यं गुणः कर्मेति पृथग्भूताः पदार्था वैशेषिकप्रक्रियायामेवाभ्युपगम्यन्ते । सांख्यादौ तु क्रियैव धारावाहिकतां गता गुणपदेन, गुणसमष्टिरेव च द्रव्यपदेन व्यवह्रियते इति नास्त्येषामत्यन्तो भेदः । स्फुटत्वसंयोगविभागपृथक्त्वादिषु क्रियाया एव धारावाहिकत्वमनुभूयते । सूक्ष्मविचारेण रूपरसादिषु तथैव प्रतीयते इति नात्र विस्तरभयाद्विवरीतुमिच्छामः ।

सांख्यदर्शने सत्वरजस्तमसां प्रकृतिरूपाणां गुणानां यद्विवरणं दृश्यते तदपि तेषां क्रियारूपतामेवाभिव्यनक्ति । गुणशब्दोऽत्र न वैशेषिकाभिमतपरिभाषितगुणबोधकः अपि तु लोके गुणशब्दस्याप्रधान इति रज्जुरिति चार्थद्वयं प्रसिध्यति, तदभिप्रायक एव । सत्वाद्या हि पुरुषस्यैव भोगापवर्गसाधकाः नतु स्वार्थे प्रवृत्ता इति पुरुषं प्रति गुणीभूतत्वाद् गुणा आख्याताः । यद्वा पुरुषस्य बन्धनार्थं रज्जुरूपाबुद्धिः, सेयमेभिर्गुणैरेव सृज्यत इति रज्जुरूपतयापि रूपकेण व्याख्यातुं शक्यत इति सर्वमेतत्तत्वकौमुद्यां श्रीवाचस्पति मिश्रैः स्पष्टीकृतम् । तत्र—

'प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः ।
अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः ॥
'सत्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः ।
गुरुवरणकमेव तमः प्रदीपवच्चार्थतोवृत्तिः ॥

इति हि गुणानां विवरणं सांख्यकारिकायामुपलभ्यते । प्रकाश रूपं सत्वम्, प्रवृत्तिरूपं रजः, आवरकं च तम इति । गुणस्वरूप निर्देशोऽत्र प्रकाशप्रवृत्तिनियमा अर्थः प्रयोजनं येषामिति व्युत्पत्तेः । प्रयोजनतां चैषां पुरुषस्य भोगापवर्गार्थतया वदन्तीति साख्याना परिभाषा । तत्र प्रवृत्तिरूपस्य रजसः क्रियारूपतानुक्तापि सिद्धैव, प्रवृत्ति-क्रियाशब्दयोरैकार्थ्यात् । प्रवर्त्यतेऽनेनेति व्युत्पत्त्या क्रियासाधनत्वमस्येति यदि कश्चिद् विवृणुयात्, तद्वारणाय 'चलं चरजः' इति चलनरूपता द्वितीय-कारिकायां तस्य स्फुटीकृता । उपष्टम्भकपदमपि श्रीवाचस्पति मिश्रैस्तत्व कौमुद्यामेवं व्याख्यातम्—सत्वतमसी स्वयमक्रियतया स्वकार्यप्रवृत्तिं प्रत्यव-सीदन्ती रजसावष्टभ्येते अवसादात् प्रच्याव्य स्वकार्ये उत्साहप्रयत्नं कार्येते इति । तस्यायमाशयः—क्रिया हि नाम परत्रैव संक्रान्तावभासते । तत् स्वय चलन रूपं रजः सत्वतमसोरप्युपसंक्रम्य ते अपि चालयति—परिणतया स्वकार्य प्रवर्तयतीति तदुपष्टम्भकमुच्यते । एवमेव सत्वस्य प्रकाशरूपता प्रकाशकता-चेत्युभयम्, तमस आवरणरूपता, आवरकताचेत्युभयं च व्याख्येयम् । स्वयं प्रकाशः अन्यत्रोपसंक्रान्तस्तु अन्यस्य प्रकाशक इति, स्वयमावरण परस्य-त्वावरकमित्युपपत्तिसम्भवात् । अतएव दीपःप्रकाशते, दीपः प्रकाशयति, सविता प्रकाशते, सविता प्रकाशयतीति द्वयमप्युपपद्यते । क्रियायाः पूर्वावस्था च शक्तिरूपैव, ततः प्रकाशत इति शक्तिरेव प्रतीयत इत्यालोच्यम् । ये तु प्रकाशते इति तिङर्थतया तत्रापि व्यापारः प्रतीयत एवेत्याग्रहृणीयुः तैरेवमालोच्यम्, परप्रकाशनं तु प्रकाशयतीति णिचाभिधीयते तर्हि दीपे सूर्ये वा स्वावस्थित्य-तिरिक्तः को नामास्ति स्वप्रकाशानुकूलो व्यापारो यः सविता प्रकाशत इत्या-दावभिधेयः स्यात् । अवस्थितिस्तु सत्तारूपा स्वरूपानतिरिक्ता शक्तिरेव । चक्षुर्विषयीभवनमितिचेच्चक्षुर्व्यापार एषः, न तु सूर्यस्य दीपस्य वा कोऽपि व्यापारः विषयीकरणंचक्षुषः विषयीभवनं तु दीपादेरित्यपिवाङ्मात्रम् । विषयी-करणातिरिक्तस्य विषयीभवनरूपस्य कस्यापि व्यापारस्य दर्शयितुमशक्यत्वात् । अवस्थितिरेवोपचारेण व्यापाररूपतया तिङर्थनिर्वाहाय कल्प्यत इति चेत् कामं कल्प्यताम् । वस्तुतस्तु शक्तिरेव तत्राभिधेयेति प्रकाशशक्तिरूपतैव सत्वस्य फलति । इदं च ईक्षत्यधिकरणे भाष्यकृद्भिराचार्यपादैरपि सूचितम् 'असत्यपि कर्मणि सविता प्रकाशते' इतिव्यपदेशदर्शनात्, सवितृ प्रकाशवत् ब्रह्मणो ज्ञानस्वरूपनित्यत्वे ज्ञानसाधनापेक्षानुपपत्तेः' इत्यादिना । अत्रहि दृष्टान्त-विधया सवितुः प्रकाशस्वरूपतोक्तेति स्वरूपभूतशक्तिरूपः प्रकाश इत्येवोक्त

भवतीति । प्रकाशक्रियावरणरूपतयैव गुणानां शुक्लरक्तकृष्णरूपताप्येषाम् 'अजामेकां लोहितशुक्लकृष्णाम्' इति श्रुतौ बहुत्र पुराणादिषु चोपचरिताप्युपपद्यते । सत्वरूपस्य प्रकाशस्य शुक्लतया, तमस आवरकस्य कृष्णतया मध्ये स्थितस्य संघर्ष रूपस्यच रजसो रक्ततया तदाकारस्याजस्येनोपपत्तेः । 'प्रकाश क्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम्' (योगसू० २।१८) इति योगसूत्रे तु क्रिया शब्द एव रजः स्वरूप बोधनाय स्पष्टमुपात्तः । क्रियास्थितिशीलमिति तु चैतन्यस्वभावः पुरुष इत्यादिवद्विकल्पज्ञानाश्रयो निर्देशः, क्रियादिकं शीलं स्वभावो यस्येत्युक्त्या क्रियास्वभावस्य क्रियात्वमुक्तं भवतीति । अस्तु वा क्रियास्वभावपदेन क्रियायाः पूर्वावस्थारूपा शक्तिः, तत्रापि नास्माकं विरोधः । बलशक्तिक्रियाणामेकरूपताया उपपादितत्वात् । सत्वमपि प्रकाशरूपतयाऽव्याख्याता क्रियैव । अभिव्यंजनरूपा क्रियैव हि प्रकाशशब्देनाख्यायते । तच्चाभिव्यंजनं स्वस्य परस्य वेत्युभयमप्यत्रान्तर्भवति । प्रकृतिस्वरूपान्तर्गतस्य प्रकाशस्य हीदं तत्वम् । ज्ञानापरपर्यायप्रकाशरूपः पुरुष एव प्रकृत्तौ स्वप्रतिबिम्बात् ज्ञानरूपो भवतीति । यावच्च क्रियानुल्वणा भवति तदीयाधारा नाधिकवेगवती भवति—तावत्सा ज्ञानरूपं मूलं तत्वं नावृणोतीति तत्र ज्ञानस्वरूपं प्रकाशते—मन्दमन्दक्रियावति सरसीव सूर्यादिप्रतिबिम्बम् । किञ्चिच्चाल्यमान आदर्श इव च मुखादिप्रतिबिम्बम् । उल्वणायान्तु क्रियाया वेगवत्यां तन्न प्रकाशत इति सत्त्वस्य लघुत्वं प्रकाशरूपता चोच्यते, पुरुष प्रतिबिम्बेन सत्त्वमपि प्रकाशरूपतां गतमिति । सत्वस्यैव परिणतिवृत्तिरूप ज्ञानमिति स्पष्टं वेदान्त ग्रन्थेषु । वेगाभावरूपमेव लघुत्वम् । गुरुत्वं हि नामाकर्षणक्रियाग्रहणयोग्यता । आकर्षणपरिणतिरेव पतनमिति स्पष्टमुक्त ज्योतिर्विदामग्रेसरैः श्रीभास्कराचार्यैः सिद्धान्तशिरोमणौ—

> आकृष्टिशक्तिश्च मही तया यत्
> खस्थं गुरु स्वाभिमुखं स्वशक्त्या
> आकृष्यते तत्पततीव भाति
> समे समन्तात् क्व पतत्वियं खे । इति

निराधारा पृथिवीयमनुक्षणं नीचैः पततीति बौद्धानां खण्डनमत्र श्रीभास्कराचार्यैः कृतम् । तत्रेयमुक्तिः प्रदर्शिता—यत्पतनं नाम न कस्यापि वस्तुनः स्वाभाविकी क्रिया अपितु आकर्षणजन्या । उपरि प्रक्षिप्तं लोष्टादि क्षेप्तुर्हस्तेनोत्पादितायाः क्रियायाः समाप्तौ पृथिवीगतया आकर्षणशक्त्या आकृष्यमाणं पतद् दृश्यते नतुस्वभावतः । इदं च पृथिव्या आकर्षणं स्वसजातीये गुरुणि

द्रव्ये लोष्टादावेव कार्यं करोति, नतु लघुनि तृणादौ सूर्यचन्द्रकिरणादिषु वा। तस्याकर्पणग्रहणयोग्यता नास्तीति। चन्द्रतारादयश्च न पृथिव्याः सजातीयाः अपि तु तेजोरूपा इति न तत्रापि पृथिव्या आकर्षणं प्रसरति। पृथिव्यास्त्वाकर्षक न किमपि सजातीयमिमां परितो विलोक्यते। इयं हि समन्तात् समे आकाशे स्थिता, आकाशे च नाकृष्टिशक्तिरिति क एनामाकर्षेत्, कुतश्च पतनमस्याः संभवेदिति तदभिप्रायः। शेषकूर्मादिकं तु पृथिव्या विधारक नैतऽभ्युपगच्छन्ति तद्धि कूर्मवराहादिकं वैज्ञानिकं तत्वमिति नात्र लघुनिबन्धे तद्विवरणस्थानमस्ति। अत्र त्वेतावदेव वक्तव्यम्—यदाकर्षणग्रहणयोग्यतैवोक्तरीत्या गुरुत्वम्। तद्विरोधी च शक्तिविशेष एव लघुत्वमिति तदपि क्रियाया एव पूर्वावस्थारूपम्।

श्रीवाचस्पतिमिश्रैरपि कार्योद्गमने हेतुर्धर्मो लाघवम् गौरवप्रतिद्वन्द्वि, यताऽग्नेरूर्ध्वगतिर्भवतीत्येव व्याख्यातम्। तमसो गुरुत्वमावरकत्वं च यदुक्तम्-तत्र गुरुत्वस्य क्रियारूपता व्याख्यातैव। आवरणमपि वैज्ञानिक दृष्ट्या क्रियारूपमेव। एकाहि प्रबला क्रिया यदा स्वसमानबलेन क्रियान्तरेण सबुध्यते, तदा द्वयोः क्रिययोर्विलोप इव दृश्यते। समबलेन पुरुषद्वयेन युगपद् विरुद्धयोर्दिशोः समाकृष्टा रज्जुर्नाणुमात्रमपि चलतीति प्रत्यक्षं दृश्यते। तत्र नेयं रज्जुरक्रियेति शक्यं वक्तुम् पुरुषद्वयेनासादिता हि क्रिया कथमेना न चालयेत्। श्रमश्चाधिकाधिकः क्रमेण पुरुषद्वयेनाप्यनुभूयते—यदि न ताभ्या क्रियोत्पादिता स्यात्, तर्हि कथं शक्तिक्षयरूपः श्रमस्ताभ्यामनुभूयेत। तस्मात् प्रतिक्षणं सा रज्जुः पूर्वदिगवस्थितेन पुरुषेणाकृष्टा पूर्वस्यामपि दिशि प्रसरति, तस्मिन्नेव क्षणे पश्चिमदिगवस्थितेन पुरुषान्तरेणाकृष्टा तावदेव पश्चिमस्यामपि दिशि प्रसरतीति युगपद् विरुद्धदिग्द्वयप्रसरणादेकत्रैव स्थिता दृश्यते, एवंविधस्थल एव प्रतिबध्यप्रतिबन्धकभावो लौकिकैर्नैयायिकैश्च व्यवह्रियते। वस्तुतो न तस्यां रज्जौ क्रियाया अभावः, अपितु विरुद्धदिग्गमनरूपा अत्युल्बणक्रिया। एवंविधमेव रजसोत्पादितायाः क्रियायाः क्रियान्तरेण तदुत्पादितेनैव नियमनं तम इत्युच्यते, अन्यथा 'सत्त्वतमसी अक्रिये' इत्यक्रियत्वेनोक्तस्य तमसः कथमावरकत्वं संभवेदिति सुसूक्ष्ममालोच्यतो सुधीभिः। तदित्थमत्युत्कटक्रियारूपं तमः, तच्चोक्तरीत्यैकदिग्गमनरूपं चलनमपि रजोरूपमावृणोति, अत्युत्कटक्रियायां प्रकाशोऽप्युक्तरीत्या न भासते तरंगमालाकुलिते समुद्रे चन्द्रतारादिप्रतिबिम्बमिवेति सत्वस्यावरकमिदमुभयोर्विरोधितया गण्यते। एवं चारम्भदशावच्छिन्ना क्रिया कुर्वद्रूपता-

न लम्बमानैव प्रथमक्षणावच्छिन्ना शक्तिवा सत्वम् मध्य दशामनुप्राप्ता अनुभवविषयतां गता सा रजः, अत्युत्कटतया परस्परोपघातेन विलीनेवानुभवपथादतिक्रान्ता आवृतेति व्यवह्रियमाणा तु तम इति एवमेता एव क्रियायास्तन्मूलभूतायाः शक्तेर्वा अवस्था विशेषा इमे सत्वादिगुणाः नत्वेकान्ततः पृथग्भूता इति सुनिपुणं भाव्यताम् ।

प्रकृतिपुरुषसंयोगे पुरुषप्रतिबिम्बभूतस्य प्रकाशस्य क्रमिकं ह्रासमभ्युपगत्येदं व्याख्यातम् । क्रमिकविकासरूपतां स्वभिलद्येत्थमपि व्याख्यातु शक्यते–यत् प्रलयकाले तमसा आवृते सत्वरजसी, सृष्ट्यारम्भे तयोः प्रकृतिक्षोभेण आवरणभंगो भवति । सोऽयं क्षोभः कुतो जायत इत्यत्र बहूनि मतानि, स्वभाव एवायं प्रकृतेर्गुणत्रयरूपायाः स्वरूपपरिणामाख्यः स्वापः, विरूपपरिणामाख्यं जागरणं च तदेतदुभयं गुणस्वाभाव्यादेव प्रवर्तते न तत्र कारणापेक्षेति सांख्यानामभ्युपगमः ।

परमपुरुषस्य भगवतः स्वातन्त्र्येणोद्भूता सिसृक्षा परिणतिं जनयतीति आगमिका मन्यन्ते संप्रदायाचार्याश्च । इयं सिसृक्षा न प्रकृतिपरिणतिरूपाया बुद्धेर्वृत्तिः, बुद्धेः प्रकृतिक्षोभात्परमुत्पत्स्यमानत्वात् । अपितु भगवत्यस्ति स्वातन्त्र्यरूपा शक्तिः, तस्यैव सा वृत्तिरिति । अतएव सिसृक्षारूपा भगवत इच्छा मूलशक्तेरिच्छायारूपतयैव निरूपिता आगमेषु न तु सा महामायाया मायायाः प्रकृतेर्वा परिणतिः यासां सर्वासामग्र उत्पत्स्यमानत्वात् । अपितु भगवति परमशिवे यत्स्वातन्त्र्यम्, सैव मुख्या शक्तिः, तस्या विकास इति इच्छायारूपैव इच्छाशक्तिः, तस्यां यः परमशिवस्य प्रतिबिम्बरूपेण प्रवेशः सैव ज्ञानशक्तिः । नित्यं ज्ञानं साक्षाद् भगवद्रूपम्–तस्यैवेच्छायां प्रतिबिम्बनम्, अर्थात् स्रष्टव्यपदार्थपर्यालोचनमिह प्रतिबिम्बरूपं ज्ञानम् । तज्ज्ञानशक्तिरूपेणेह व्याख्यायते–ज्ञाने इदमेतत् किमित्यादिविशेषणरूपेण प्रवेशः । अर्थात् तस्य ज्ञानस्य तत्तद्रूपेण स्फुरणन्तु क्रियाशक्तिरिति तिस्रोऽप्येता इच्छाज्ञानक्रियाशक्तयो मूलशक्तेरेव परिणतय आगमशास्त्रे व्याख्यायन्ते, महामायामायाद्यास्तुपरत उत्पद्यन्ते जगत्तत्वान्तर्गताः । इयमेव प्रक्रिया श्रीवल्लभाचार्यपादैः स्वीयशुद्धाद्वैतदर्शनेऽनुसृता । प्रकृतिक्षोभकारणेष्वियमेव बुद्धौ सम्यगुपारोहति, अन्ये तु वदन्ति–प्रकृतिपुरुषाविव कालोऽपि नित्यः, तत्प्रेरणया प्रकृतौ क्षोभ इति प्रपंचसारे इदमेवोक्तम् । विष्णुपुराणादावपि किंचित्प्रक्रियाभेदेनेत्थमेव विवृतम् । प्रलये सर्वेषां प्राणिनां पूर्वकर्मजनिताः संस्काराः, पूर्वज्ञानवासनाश्चापि प्रसुप्ता बीजरूपा अलब्धवृत्तिकास्तिष्ठन्ति, तेषामेव

परिपाकोन्मुखतायां–ईश्वरात्मभूताया मायाया वृत्तिः परमात्मनि सिसृक्षा भवति। स एव क्षोभ इति वेदान्तिनो विवृण्वते। कालमपिच केचन मन्वते इति। भवतु नाम यथाकथंचिद् विचारभेदमात्रमिदम्। सृष्ट्यारम्भे प्रकृतौ क्षोभ इति तु सर्वेषामप्यभिमतम्। जागरणरूपप्रकृतिक्षोभे तमसोऽपसारणे आवरणभंगे क्रिया प्रसरति इति तमसोऽनन्तरं रजः सा च क्रियास्वभावादेव उत्कटतां शान्ततां चालम्बते सर्वास्वपिप्रक्रियासु तथा दर्शनात्। यदा हि सा उपशान्तेव भवति तदा पूर्वोक्तरीत्या पुरुषबिम्बेन प्रकाशीभवतीति रजसोऽनन्तरं सत्वमिति उभयथापि संभवति। नैषां पूर्वापरीभावो नियतः। विकासह्रासावपि दृष्टिभेदमात्रम् सुसूक्ष्मं भावनीयम्।

तदित्थं वैज्ञानिकप्रक्रियया क्रियाशक्तिरूपता गुणानां व्याख्याता। अनयैव च प्रक्रियया कारिकोक्तेन साधर्म्यवैधर्म्ये अपि व्यक्ताव्यक्तयोरुपपद्येते इति विस्तरोऽस्मत्कृते पुराणपारिजाते द्रष्टव्यः। आस्ताम्–आरम्भपरिणामवादयोर्भेदस्य दिगियं प्रदर्शिता। इमामुपेक्ष्यैव सत्त्वादिगुणानां द्रव्यरूपता विज्ञानभिक्षुभिर्व्याख्याता तस्मात्तेषां सांख्यप्रक्रियायां नास्ति तादृशं पाटवमिति च स्पष्टीकृतम्।

अथ भगवतः शंकराचार्यस्य समयविषये महान् विचारः–तमुपेक्ष्य यदेवाधिकसम्मतं तदेव प्रतिपादयामः।

> निधिनागेभवह्न्यब्दे (३८८६) विभवे मासि माधवे।
> शुक्ले तिथौ दशम्यान्तु शंकरार्योदयः स्मृतः॥

एतानि कलेरेव हायनानि। तेनेतःपूर्वं द्वादश्यां शताब्द्यां श्रीशंकरोदयः सिद्ध्यति। विस्तारः खलु दर्शनानां निबन्धादिभिस्तत उत्तरमेव समपद्यत। महादार्शनिको वाचस्पतिरेवादिभूतो विस्तृतनिबन्धनिबन्धॄणामिति मे मतिः।

श्रीशंकराचार्यादुत्तरमभवत् पटपरिवर्त्तनमिव दार्शनिके विज्ञाने। तस्य प्रबलतरयुक्तिविच्छिन्नानि विहाय वस्तुविज्ञानं शब्दाडम्बरमात्रपराणि बभूवुर्दर्शनानि। इतः पूर्वं त्वासीत्पदार्थविषयकविज्ञानसमुन्मेषः। अनन्तर तु अवच्छेदकताभिराच्छादयन् कलेवरं तार्किकाः, भावनाविस्तारपरा अभवन् मीमांसकाः, विलीनं सांख्यम्, परिभाषादुर्गं आश्रीयत आर्हतैः, गताः पारेसमुद्रं बौद्धाः। श्रीशंकरार्यानुयायिनो वेदान्तिनोऽपि शब्दाडम्बरैरेवारंजयन् ग्रन्थान् स्वकीयान्। स एष विलुप्तः पदार्थविचारो दर्शनानाम्, यदि पुनर्यथावल्लभ्येत विदुषामुद्योगात्प्रचारं तर्हि अनुगतार्थेयं भवेद् भगवती गीर्वाणभारतीति शम्।

भवभूतिनाटकेषु वर्णितस्य भगवत कालप्रियनाथस्य स्वरूपस्थानयो र्नूतनः प्रकाशः

म० म० डॉ० वासुदेवविष्णुमिराशी

महाकविभवभूतेर्जीवनचरिते भगवतः कालप्रियनाथस्य स्वरूपस्थानयोर्निरतिशयं महत्वं वर्तत इति विदितमेव सर्वेषां गीर्वाणवाङ्मयाध्येतॄणाम्। तस्य महाकवेस्त्रीण्यपि महावीरचरित–मालतीमाधवोत्तररामचरिताख्यानि नाटकानि कालप्रियनाथस्य यात्रायामेव प्रथम रङ्गभूमौ प्रख्यापितानि। किन्तु तत्कालप्रियनाथस्य स्वरूपस्थानयोर्विषये विदुषां मतवैविध्यं वर्तते। स कालप्रियनाथो नामोज्जयिन्या महाकाल इति बहुभिस्तन्नाटकटीकाकृद्भिः, तथा चाधुनिकैष्टिप्पनीकृद्भिरुक्तपूर्वम्। तथा हि मालतीमाधवस्य टीकाकारस्त्रिपुरारिर्वदति–'कालप्रियनाथस्य महाकालास्पदस्य शम्भोः'। यद्यपि वीरराघवादिभिरन्यैः प्राचीनटीकाकारैरेवंविधं सुस्पष्टं नोक्तं तथापि कालप्रियनाथस्य शिवस्वरूपे तेषां सर्वेषामैकमत्यम्। तथाहि वीरराघवो मालतीमाधवटीकायां प्रथमं 'कालप्रियानाथस्य' इति पाठं गृहीत्वा वदति 'कालप्रियानाथस्य कालप्रियानामिकाम्बिकापतेः'। तदनन्तरं 'कालप्रियनाथस्य' इति पाठेऽपि स एवार्थो निष्पन्नो भवतीति प्रदर्शितं तेन। डॉ० बेलवलकर–डॉ० काणे–प्राध्यापकटोडरमल्लप्राध्यापककरमरकरादिभिराधुनिकैर्भवभूतिनाटकानां सम्पादकैरपि तदेव स्वीकृतम्। बेलवलकरकाणेमहोदयाभ्यां कालप्रियनाथो नामोज्जयिन्या महाकाल इति मतं प्रतिपादितम्। करमकरमहोदयेन तु स कालप्रियनाथो मालतीमाधवे निर्दिष्टः सुवर्णबिन्दुः स्यादित्युक्तम्। यद्यपि माधवव्यंकटेशतेलेमहोदयः कालप्रियनाथस्य देवालयः कालीनगर आसीद् इति मन्यते स्म तथापि स देवो भगवान् शिव एवेत्यस्मिन् विषये नासीत्तस्य कोऽपि संशयः।

कालप्रियनाथस्य निर्देशाः केषुचित् पुराणेषु तथोत्कीर्णलेखेषु वर्त्तन्ते। तेषां परामर्शे कृते स भगवान् आदित्यस्वरूप आसीत्, तस्य चातिविस्तीर्णो देवालय उत्तरभारते यमुनातीरेऽधुना कालीनाम्ना विख्याते नगरेऽवर्त्ततेति सुस्पष्टं भवतीति पूर्वमेवान्यत्र प्रदर्शितमस्माभिः, अद्यापि कालीनगरे 'कालादेव का टीला' इति तत्रस्थानां विदितो वप्रो विद्यते, तदेव पुरातनं

स्थान मवितुमहत त्यनुमितमस्माभि उत्खननेनैवास्य निर्णयो भविष्यति । अतस्तदर्थं भारतीयपुरातत्त्वविभागसंचालका अभ्यर्थिता अस्माभिः । अचिरादेव तस्य उत्खननं भविष्यतीत्याशास्यते ।

एतद्विषयनिर्णायकं किञ्चित्प्रमाणमधुनैवावगतमस्माभिस्तदत्रोपन्यस्यते ।

वर्षद्वयात् प्राक् पुण्यपत्तनस्य भाण्डारकरप्राच्यविद्यासंशोधनमण्डलस्य कृते मालतीमाधवस्य रामकृष्णगोपालभाण्डारकरकृतावृत्तेर्नूतनसंस्करणमङ्गीकृतमस्माभिः । तदा भाण्डारकरमहोदयेन तदावृत्तेः पादटिप्पन्यां तन्नाटकस्य कस्माच्चिद्धस्तलिखितात् पुस्तकाद् उद्धृत एकः सन्दर्भो दृग्गोचरोऽभवत्[1] । तत्र प्रस्तावनायां भवभूतेः पितृपितामहादिविषयकं तद्विद्वत्तादिविषयकं च निवेदनं कृत्वा सूत्रधारो वदति—

'अतो यदस्माकमर्पितं प्रियसुहृदा तत्रभवता काश्यपेन भवभूतिनाम्ना ब्राह्मणेन प्रकरणं स्वकृतं मालतीमाधव नाम, तदेव भगवतः कालप्रियनाथस्य सकलजगदेकचक्षुषो, विश्वात्मनः सूर्यस्य पुरतो यथाप्रयोगेण प्रख्यापयितुमहमुद्यतः' ।

भवभूतेस्त्रिष्वपि नाटकेषु कालप्रियस्य निर्देशो विद्यते, किन्तु, तत्स्वरूपं न कुत्रापि वर्णितम् । अतः सर्वैष्टीकाकृद्भिष्टिप्पनीकृद्भिश्च कालप्रियो नाम भगवान् शङ्कर इत्यभ्युपगतम् । किन्तु अत्रोद्धृते प्राचीनहस्तलिखितपुस्तकसन्दर्भे स सूर्य इति सुस्पष्टं निर्दिष्टः, तस्य च वर्णनं 'सकलजगदेकचक्षु' विश्वात्मा इति कृतम् । तस्माद्धस्तलिखितपुस्तककाले तावत्कालप्रियनाथनाम्ना भगवान् सूर्य एव निर्दिष्टोऽभवदित्यत्र नास्ति सन्देहलवोऽपि ।

एतद्धस्तलिखितपुस्तकं मुम्बईपुर्यां सुप्रथितगवेषक डॉ० भाऊदाजीमहोदयस्य संग्रह आसीत् । तदधुना मुम्बई–एशियाटिक सोसायटी'–संस्थायाः संग्रहालये सुरक्षितं वर्तते । तस्य लेखनकालस्तत्र सम्वत् १७६५ नभस्यामावास्यायां पूरितः' इति निर्दिष्टः । अतस्तत्पुस्तकं सार्धशतद्वयवर्षेभ्योऽपि प्राक्तनमिति स्पष्टीभवति । तस्मादुपरितनः सन्दर्भः केनाप्याधुनिकेन तत्र

---

१. मालतीमाधवम् (संपा० रा० गो० भाण्डारकरः) तृतीयावृत्तिः (१९७०) पृ० १६ पादटिप्पण्या ५०–५२.

प्रक्षिप्त इति न शक्यं वक्तुम् । न च स सन्दर्भः सम्वत् १७२५ इति वर्षेऽपि केनचित्तत्र प्रक्षिप्त इत्यपि शक्यमभिधातुम्, यतोऽनीतवर्षसहस्रे काले 'कालप्रिय' इति भगवतः सूर्यस्य नामेति विस्मृतं सर्वैरपि भारतीयैः ।

न केवलमुपरिलिन एव हस्तलिखितपुस्तके वर्ततेऽयं सन्दर्भः, भाण्डारकर-प्राच्यविद्यासंशोधनमण्डलस्य ग्रन्थसंग्रहे विद्यमानेऽन्यहस्तलिखितपुस्तकेऽपि स वर्तते इत्यस्मभ्यं निवेदितं तद्ग्रन्थसंग्रहरक्षकेण श्रीपुसालकरमहोदयेन । एतद्द्वितीयं हस्तलिखितपुस्तकं राजस्थानीयोदयपुरात् प्राप्तमासीत् । तस्य च कालस्तत्र '(विक्रम) संवत् १७०३ आषाढ़-कृष्ण-द्वादशी रविवारः' इति निर्दिष्टः । तत्समानखिस्तकालदिनाङ्कः २७ जून १६४६ वर्तते । तस्मिन् दिने रविवासर आसीदित्ययं कालोल्लेखः प्रामाणिक इति सुस्पष्टं भवति । एतद्धस्तलिखितपुस्तकं पूर्वोक्तात् डॉ० भाऊदाजीमहोदयग्रन्थसंग्रह-स्थपुस्तकादपि प्राचीनतरम् ।

वराहपुराणभविष्यपुराणादिग्रन्थेभ्यः कालप्रिय—(आधुनिककाल्पी) नगरे भगवतः सूर्यस्य सुप्रसिद्धो देवालयोऽभवत्, तत्र च तद्देवस्य मध्याह्ने सान्निध्यं वर्तते इति भारतीयानां श्रद्धासीदिति प्रदर्शितमस्माभिरन्यत्र[१] । पूर्वोक्तपुराणानां कालः सहस्रवर्षेभ्योऽपि प्राक्तनः । भवभूतिः ख्रैस्ताष्टम-शताब्द्याः प्रथमपादेऽभवदिति सुनिश्चितमधुना । तत्काले कालप्रियनाथस्य स्थानं सुप्रसिद्धमासीदिति तन्नाटकेभ्यो दरीदृश्यते । तत्पश्चात् कालप्रियनाथ-देवालयस्य विस्तीर्णप्राङ्गणस्योल्लेखो राष्ट्रकूटवंशीयतृतीयेन्द्रनृपतेः कान्य-कुब्जनगराक्रमणस्य वर्णने वर्त्तते । तदाक्रमणमार्गे वर्त्तमानस्य कालप्रिय-देवालयस्य विशाले प्राङ्गणे इन्द्रनृपतेश्चतुरङ्गसेना निविष्टासीत्, तत्सैन्य-स्थमत्तगजेन्द्राणां दन्ताघातैस्तत् प्राङ्गणं विषममभवदिति वर्णनं तत्कालो-त्कीर्णलेखेषु वर्त्तते[२] । तस्याक्रमणस्य कालः सम्भवतः खैस्तसम्वत्सरः ६१८

---

१. V. V. Mirashi Series In indology. Vol. I (Second ed, 1968) pp 37

२. यन्माद्यद्-द्विरदन्तघातविषमं कालप्रियप्राङ्गणं
तीर्णा यत्तुरगैरगाधयमुना सिन्धुप्रतिस्पर्धिनी ।
येनेदं च महोदयारिनगरं निर्मूलमुन्मूलितं
नाम्नाद्यापि जनैः कुशस्थलमिति ख्यातिं परां नीयते ॥
Epi. Indica Vol. Vii p. 38

इत्यनुमातुं शक्यते। तत्पश्चात् कालप्रियनगरस्योल्लेखाः ख्रैस्तदशमशताब्द्याः प्रथमार्धे भूतस्य राजशेखरकवेः काव्यमीमांसायामुपलभ्यन्ते[१]। कालप्रियनगरं कान्यकुब्जनगराद् दक्षिणदिशि वर्त्तते इति निर्दिष्टं राजशेखरेण। ख्रैस्त-दशमशताब्द्याः पश्चात् कालप्रियनगरस्योल्लेखा न कुत्राप्यवलोकिता अ-स्माभिः।

किं बहुना, पूर्वोक्तहस्तलिखितपुस्तकद्वयस्थं भगवतः कालप्रियनाथस्य सूर्यरूपेण वर्णनं भवभूतिना स्वयमेव कृतमित्यपि वक्तुं शक्यते। रामकृष्ण-गोपालभाण्डारकरेण मालतीमाधवनाटकस्य स्वीयसंस्करणे सप्रमाणं प्रदर्शितं यद् भवभूतिः स्वयमेव स्वीयनाटकानां पाठान् कालान्तरे परिवर्तयति स्मेति तन्नाटकस्थविविधपाठानां विमर्शे सुस्पष्टं भवति। महावीरचरितस्य सम्पादकेन तोडरमल्लमहोदयेनैतदेव स्वीयं मतं प्रतिपादितम्। अतो यद्यपि पूर्वोक्तं कालप्रियनाथस्य सूर्यरूपेण वर्णनं मालतीमाधवस्य सर्वेषु हस्तलिखितपुस्तकेषु न दृश्यते, तथापि तद् भवभूतिना स्वयमेवासीद् विरचितमित्यत्र संशयो भवितुं नार्हति।

प्रस्तुतविवेचनाद् भवभूतिनाटकेषु वर्णितः कालप्रियनाथो नोज्जयिनी-स्थमहाकालनामा भगवान् शङ्करः, किन्तु कालप्रिय—(विद्यमान काल्पी) नगरस्थो भगवान् सूर्यदेव इति सुस्पष्टं भवेदित्याशास्यते।

—: o :—

[१]. अनिश्चितत्वाद् दिशामनिश्चितो दिग्विभाग इत्येके। तथाहि यो गाधिपुरस्य दक्षिणः स कालप्रियस्योत्तरः। काव्यमीमांसा (सं० दलाल.) पृ० ९४

मध्यप्रदेशीयसंस्कृतसाहित्यसंवर्धनम्

डा० श्रीमती वनमाला भवालकरः

यशःशरीरेणाजरामरा जाताः पुरातनसरस्वतीपुत्रा देशकालसीमातिगा वर्तन्ते। परिवर्तिषु ज्ञानोपासकेषु विद्वत्सु विदग्धेषु रसिकेषु च स्वग्रन्थरूपेण चिरं विचरन्त एते निजजन्मस्थानस्य कालस्य जीवनवृत्तान्तस्य च विषये मौनं भजन्ते। विशेषतः संस्कृतग्रन्थकाराः स्वरचनास्वात्मपरिचयप्रदाने स्वल्पवादिन एव। अतोऽसंभाव्यकिंवदन्तीभिर्विनिर्मितेन प्रभामण्डलेन निगीर्णं तेषां जीवनचरित्रं प्राचीनग्रन्थानामालोडनेन यथाकथंचित् परिकल्प्य मतमतान्तराणां खण्डनमण्डन आधुनिका संशोधका व्यस्ता सन्ति। प्रायो विद्वल्ललामभूतानां पुरातनविभूतीनां स्वस्वप्रान्ते संस्थापनेन तत्तत् प्रदेशस्य गौरवाभिवृद्धिकामना स्वाभाविकी एव।

प्राचीनभारते राजाश्रितैर्विद्वद्भी राजसभाः समलंकृता आसन्। अतः प्रायः समृद्धिशालिन्यो राजधान्यो विदुषां कर्मभूमिर्बभूवुः। अनेके भूपालाः स्वयमेवाधीतशास्त्रा ज्ञानोपासनायां ग्रन्थरचनां कृतवन्तः। एते ऽन्ये च रसिका राजानः स्वराजसभासु विद्वद्गोष्ठीः समायुयुजुः।

मध्यप्रदेशे ऽप्यनेकाः सरस्वतीक्रीडास्थलीभूता राजधान्यः ख्यातिं गताः। यथा—उज्जयिनी, धारा, माहिष्मती, विदिशा, त्रिपुरी, दशपुरं, तथैव खजुराहो-एरण-रीवा-पन्ना-ग्वालियरादिनगराणि सकलविद्यानां संवर्धनभूमिरेव जातानि। सर्वेषामेतेषां मूर्ध्नि तिष्ठत्युज्जयिनी यस्या नाम विश्वविख्यातकविकुलगुरुकालिदासेन सहातिप्राचीनकालादद्यावधि दृढमेकीभूतम्। भोजप्रबन्धादिपरवर्तिग्रन्थानुसारं शकारिविक्रमादित्यस्य राजसभायां सम्मानितेषु नवरत्नेषु कालिदासो ऽग्रगण्य आसीत्। वैदर्भीरीतिशोधकः प्रसादमधुरान् वाक्सुधातुषारान् विकिरन्नेषोऽनुपमकविसम्राड् गेटेमहोदयसदृशैः पाश्चात्त्यरसिकैरपि भूरि प्रशंसितः। तस्य वाग्विस्तारे शाकुन्तलमालविकाग्निमित्र–विक्रमोर्वशीय नाटकानि, रघुवंशकुमारसंभवमहाकाव्ये, मेघदूतर्तुसंहारखण्डकाव्ये विश्वसाहित्ये मौलीभूतानि। अन्या अपि काश्चिद् कृतयः कालिदासस्यैव सन्तीति कतिचिद् विद्वद्भिः प्रस्तूयते किन्तु नैतदसन्दिग्धम्। नवरत्नेष्वन्य आसन् वररुचिर्धन्वन्तरिः क्षपणकोऽमरसिंहः शङ्कुर्वेतालभट्टो घटकर्परो वराहमिहिरश्चेति परम्परितो लोकवादः। एतेषु केचित्तु नाममात्रेणैव ज्ञातास्तेषां कृतयो विलुप्ताश्च।

अन्येषा काल विषयक विवेषणेन ते न मिथ समकालिका इत्येव प्रमाणितम् । तेनैषा किंवदन्त्येवाविश्वासभ सञ्जायत तथापि नवरत्नविषये सत्स्वपि वितर्केषु ख्रिस्ताब्दपूर्वं ५८ तमे संवत्सरे विक्रमसंवतरसंस्थापकस्य राजसभा कालिदासेनोज्जयिन्यां विभूषितेति प्रायो विदुषामैकमत्यमस्ति । अद्यापि कालिदासोत्सवस्य कालिदासमधिकृत्य संशोधनस्य चाखिलभारतीयकेन्द्रमुज्जयिनी वर्तते । मध्यप्रदेशं मण्डयमाना राजान उज्जयिनीत्यलं पल्लवितेन ।

मध्यप्रदेशे विचरितं काव्यसाहित्यम्

महाकवि-सार्वभौमकालिदासेन रघुवंश-कुमारसंभव-मेघदूत-ऋतुसंहारादि-काव्यानि विरचय्य काव्यसाहित्यं गौरवशिखरे दृढं संस्थापितमुज्जयिन्याम् । सम्यगुक्तं—

> अस्पृष्टदोषा नलिनीव दृष्टा हारावलीव ग्रथिता गुणौघैः ।
> प्रियाङ्कपालीव विमर्दहृद्या न कालिदासाद-परस्य वाणी ॥

विक्रमादित्यस्य तथाकथितनवरत्नेष्वन्यतमो वररुचिरासीद् राक्षसकाव्यं, वररुचिकाव्यं नीतिरत्नं चेति काव्यत्रयस्य रचयिता । अपरः कविर्घटकर्परो घटकर्पराख्यं दूतकाव्यं निर्मितवान् । लोकविलक्षणमेतन्नाम काव्यस्यान्तिमे श्लोके सूच्यते यत्र कविर्यमकाद्यलङ्कारेषु स्वनैपुण्यस्य गर्वमुद्वहन् ब्रूते—

> भावानुरक्तकवितासुरतैः शपेय-
> मालम्ब्य चाम्बु तृषितः करकोशपेयम् ।
> जीयेय येन कविता यमकैः परेण
> तस्मै वहेयमुदकं घटकर्परेण ॥

मेघदूतसदृशेऽस्मिन् दूतकाव्ये विरहपीडिता नायिका मेघदूतं परिकल्प्य नायकं प्रति संदेशं प्रेषयति । द्वाविंशतिश्लोकात्मकस्यास्य लघुकाव्यस्य विषये ऽभिनवगुप्तेन लिखितं 'अत्र कर्ता कालिदास इति श्रुतमस्माभि' रिति । एष तु विकल्पस्य विषयः ।

शतकत्रयकर्ता भर्तृहरिः, हयग्रीववधकाव्यकारो भर्तृमेण्ठः, मयूरशतकप्रणेता मयूरकविः, जातकमालाया रचयिताऽऽर्यशूरः, महाकविर्भारविः, अमरुकः, रूपः, भट्टारकहरिश्चन्द्रः, शूद्रकः, बाणः, दण्डी, इत्यादय उज्जयिनीनिवासिन एवेति किंवदन्ती राजशेखरस्य ग्रन्थेषु, मेरुतुङ्गाचार्यस्य प्रबन्धचिन्तामणौ, ज्योतिर्विदाभरणे तथैवान्येषु परवर्ति-ग्रन्थेषु सूच्यते । प्रमाणैः त्वसिद्धत ईदृशोऽसदाग्रहस्तु हास्यास्पदमेव । तथापि कवीन्द्राणां कार्यक्षेत्रमित्युज्जयिन्या गौरवं परवर्तिकवीनां हृदि कियदासीत् सुदृढमित्येतद् दन्तकथाभिः प्रतीयते ।

मध्यप्रदेशीय-संस्कृतसाहित्य-संवर्धनस्य प्रगतिः प्रायशः षष्ठशतकात् प्रभृति

नवमशतक यावत् मुख्यतस्तात्कालिकोत्कीर्णलेखमालाभिरेव सुप्रमाणिता वर्तते, यतो हि नामैतस्य युगस्य संस्कृतसाहित्यमद्यावध्यपर्याप्तमेवोपलब्धम् ।

खिस्तदशमशतकादारभ्य परमारवंशीयनृपाणामाश्रये विद्वद्जनैर्धारानगर्या यशः प्रकाशितम् । धाराधीशयोर्मुञ्जसिन्धुराजयोः सभामलंकुर्वन् परिमल-कालिदास इत्यपरनामा कविः पद्मगुप्तो नवसाहसाङ्कचरिताख्य ऐतिहासिक अष्टादशसर्गात्मके महाकाव्ये स्वस्याश्रयदातृ राज्ञश्चरित्रं वर्णितवान् । इतिहासा-दप्यधिकतरः कवेः कल्पनाविलासोऽत्र वर्तते तथापि काव्यदृष्ट्या सरसा रोचका चास्य शैली ।

कवि शोभनो धारायां मुञ्जस्य सभापण्डित आसीत् । जैनधर्मानुयायिनानेन कविना चतुर्दशजैनतीर्थंकरस्तुतिपरमेकं चतुर्विंशतिकान म चित्रकाव्य विरचितं यस्मिन् प्रत्येकश्लोके यमकबद्धयोर्द्वितीयचतुर्थपादयोः समानाक्षराणि भिन्नर्थानि सन्ति । शोभनस्यानुजेन धनपालेनास्य काव्यस्य टीका लिखिता ।

अपरो धारानिवासी राजाश्रितो जैनमुनिरमितगतिः सुभाषितरत्नसन्दोह-काव्यं रचितवान् ।

सिंधुराजानन्तरं खिस्तैकादशशतकस्योत्तरार्धे भोजो धारायां राजपदे प्रतिष्ठितः । स स्वयमेवानेकशास्त्रेषु पारङ्गतो ग्रन्थकारः कविश्चासीत् ।

तेन प्रणीतेषु त्रयोविंशतिग्रन्थेषु 'विद्याविनोदिनी', 'स्तोत्रशिवदत्त', 'सुभाषितं', चेति त्रीणि काव्यानि सन्ति । गुणज्ञस्यास्य सभा माघमयूरादि-चतुश्शताधिकसहस्रपण्डितैर्मण्डितेति भोजप्रबन्धे प्रस्तुतम् । अप्रामाणिक्यप्येषा किंवदन्ती विक्रमस्येव भोजस्यापि गौरवं विद्वद्भिः परां कोटिं नीतमित्येतावत्तु प्रमाणयति ।

परवर्ति परमारभूपतीनां समाश्रयेऽपि धारायां जैनमुनयः सम्मानं प्रापुः । जैनमुनि-दामोदरेण देवपालस्य शासनकाले १२०८ खिस्ताब्दे 'जिनचरित' काव्यं ग्रथितम् ।

चालुक्यनृपतेश्चतुर्थविक्रमादित्यस्य चरित्रमधिकृत्य विरचितस्य 'विक्रमाङ्क-देवचरित' काव्यस्य कर्ता ख्यातनामा काश्मीरजः कविर्विल्हण एकादशशतकान्ते यशसे चार्थकृते च परिभ्रमन् त्रिपुरीं प्राप्य तत्र डाहलमण्डलाधीशेन कल-चुरिवंशजेन कर्णदेवेन सम्मानितस्तत् सभायां निवसन् रामकथाविषयकं काव्यमेकं तत्र निर्मितवान् ।

त्रिपुर्यामेव राज्ञो युवराजस्याश्रमे राजशेखरेण 'हरविलासं', 'उज्वलदत्तं' चेति काव्यद्वयं विरचितम् । अनयोः काव्ययोरुद्धरणानि परवर्तिग्रन्थेषू-पलभ्यन्ते ।

द्वादशशतकानन्तरं रीवाराज्ये बान्धवकुलनरेशानामाश्रये भक्तिकाव्यस्य प्रशस्तीनां च प्रणयनं प्रचुरं समभवत् । पञ्चदशशतके वीर-देवसिंहस्य राजधान्यां गहोरायां रामचन्द्रभट्टेन 'राधाचरित'-मन्यं च द्वे काव्ये रचितानि । एतानि नाममात्रेणैवोपलभ्यन्ते । वीरभानुनृपाश्रितस्योरव्यमाधवस्य (४३२-४२ ई०) वीरभानूदयकाव्ये वीरभानुपर्यन्तं बान्धवनरेशानां वंशविस्ताररश्चरित्राणि च निरूपितानि । प्रसादहृद्यशैल्या रचिते द्वादशसर्गात्मकेऽस्मिन् काव्ये प्रस्तुतं राजधानीगहोराया वर्णनमत्रोदाह्रियते—

> "स राजयामास युवा गहोरां चतुर्दिशा राजितराजमार्गाम् ।
> प्रासादजातैर्जनितप्रसादैर्जेतुं पुरीं भोगवतीमिवेच्छुम् ॥
> गायन्ति यस्यां सुदृशः समन्तान्मञ्जु द्युलोकादिव देवनार्यः ।
> समागताः श्रीवदना गहोरासुखानि भोक्तुं दिवि दुर्लभानि ॥"

अस्मिन्नेव राजाश्रये कविभानुकरो 'गीतगौरीपति'-मिति काव्यमन्याश्च प्रशस्तीः प्रणीतवान् । उद्धरणेषूपलब्धेभ्यः श्लोकेभ्यो ज्ञायते यत् कविनाऽनेन यवनशासकनिजामशाहोऽपि प्रशंसितः । समीपस्थयवननृपैः सह बान्धवनरेशानां मैत्रीभाव आसीत् ।

वीरभानुपुत्रो रामचन्द्रोऽपि (१५५२-९७ ई०) विदुषां सम्भावयितासीत् । तस्य प्रशस्तौ 'रामचन्द्रयशः प्रबन्धस्य कर्त्ता गोविन्दभट्टो यवनाधीश्वरादिल्लीपतिनाकबरेणापि सम्भावितोऽकबरीकालिदासेति विरुदप्रदानेन ।

नाट्य-काव्य-धर्म-दर्शन-टीकात्मकायामष्टादशग्रन्थानां प्रणेता रीवानरेशो विश्वनाथसिंहः (१७८९-१८५४ ई०) संस्कृतपण्डितः प्रख्यातः कविविदुषामाश्रयश्चासीत् । जयदेवकृतगीतगोविन्दस्य सरणीमनुकृत्याऽनन्यरामभक्तेनानेन भक्तिपरं गेयं च 'गीतरघुनन्दनं' नाम शृङ्गार रसमयं मधुरं गीतिकाव्यं विरचितम् । अस्या मृदुपदशय्याया वैशिष्ट्यं शोभते तद्यथा—

> 'ललितालीगणमण्डित - रसपण्डित हे ।
> चपलचटुलमणिभाल, जय जय राम हरे ॥
> क्षितिनृपमण्डलमण्डन, खलखण्डन हे ।
> सभुद्दण्डकोदण्ड, जय जय राम हरे ॥
> विहरति रघुपतिरिह ऋतु-राजे ।
> किसलय-कुसुम समाकुल तरुकुल-कोकिलकीर समाजे ॥

विश्वनाथसिंहस्य तनयो रघुराजसिंहोऽपि (१८५३-८० ई०) 'सुधर्मविलास'-'शम्भुशतक'-'जगदीशशतक'-'नर्मदाष्टक'-'रघुराजमङ्गल चन्द्रावली

यादीनि भक्तिकाव्यानि संस्कृतभाषया रचितवान् । 'सुधर्माविलासे' श्रीकृष्णसभा, मोक्षोपायाः, वैकुण्ठलोकः, गोलोकः, दशावतारादयो वर्णिताः । अस्य स्तुतयो जयदेवस्येव क्वचित्, क्वचित् श्रीशङ्कराचार्यस्य स्तोत्रशैलीं स्मारयन्ति । यथा चरणरोगान्मुक्तये प्रणीतेऽस्य शम्भुशतके—

वक्रेण नक्रेण यथा हरिर्गजं ग्रस्तं हि चक्रेण तमुज्जहार ।
तथैव मा पादरुजा गृहीतं त्वमुद्धरस्वाशु शशाङ्कशेखर ॥

(शम्भुशतकम् ७३)

यथा वा—महात्मनां सदात्मनां सुधर्मकर्मवर्तिनां
तपस्विनां यशस्विनां मनस्विनां मनःप्रिये ।
मनोहरे सरिद्वरे सुसंकरे भियां हरे
धराधरे जवोद्धटे नमामि देवि नर्मदे ॥

(नर्मदाष्टकम् ८)

अस्मिन्नेव शतकत्रये मध्यप्रदेशस्यान्यान्यभागेष्वपि संस्कृतकाव्यस्याभिवृद्धिर्दृष्टिगोचरी भवति । १६५८ तमे खिस्ताब्दे मण्डलानिवासिना लक्ष्मीनारायणदीक्षितेन 'गजेन्द्रमोक्षं' नाम काव्यं विरच्य्य मण्डलाधीशनिजामशाहाय समर्पितम् । अस्य नवसर्गेषु प्रथम-द्वितीय-नवमसर्गा एवोपलब्धाः । प्रारम्भिकसर्गद्वये त्रिकूट-विन्ध्य-मण्डलाविहारि पशुपक्षिवनस्पतीनां चित्रणं विद्यते । नवमे च प्रेमशाहादारभ्य निजामशाहपर्यन्तं मण्डलानरेशानां प्रशस्तिरस्ति ।

मण्डलास्थोऽन्यो मैथिलकवी रूपनाथझा रामविजय नामैतिहासिकं काव्य प्रायः १७६९ संवत्सरे रचितवान् । अस्यैव 'गढेशनृपवर्णन'मिति लघुकाव्ये गढामण्डलाया गोंडनृपाणामन्तिमशासकसुमेदशाहपर्यन्तं वर्णनं विद्यते ।

ऊनविंश-विंशशतकयोरप्यखण्डितेयं काव्यस्य परम्परा । आधुनिककवयस्तु संस्कृतानुरागेणैव न पुना राजाश्रयादिना प्रेरिताः काव्यकलायै प्रावर्तन्त । विंशशतकस्य प्रारम्भेऽपि संस्कृतभाषासीत् परम्परानुसारिणी नाति दुर्बोधा न वा सरला । कालान्तरेण तु भाषायाः सरलतां प्रतिलेखकानां प्रवृत्तिः परिलक्ष्यते । प्रायशो लेखका लघुरचनोन्मुखा प्रतिभान्ति । भक्तिपराश्चरित्मकाः कृतयः प्रशस्तयश्च बहुशः प्रणीताः । अन्यभाषासु प्रसिद्धानां काव्यानां संस्कृतानुवादाः, संगीतमय गीतिकाव्यानि, राष्ट्रियभावनया प्रेरितानि काव्यानि चास्य युगे प्रवर्तन्ते ।

लघुकाव्यस्य युगेऽस्मिन् महाकाव्यनिर्मितिरपि क्वचिज्जायते। मध्यप्रदेशे निर्मितमुल्लेखनीयमभिनवतमं महाकाव्यं १९६८ संवत्सरे सनातनेन डा० रेवा प्रसाद द्विवेदिना प्रणीतं सागरिकायां च प्रकाशितं "सीताचरितं" कवेरसामान्य-प्रतिभा काव्यरचनानैपुण्यं च व्यनक्ति। काव्यस्यास्य संकेतनाम्नी विद्वत्ता-प्रचुरा व्याख्यापि कविना स्वयमेव रचिता। मध्यप्रदेशे नर्मदातटे नानदेरनाम्नि ग्रामे जातः, काशीहिन्दूविश्वविद्यालयात् साहित्याचार्य-एम०ए०परीक्षे सर्व-प्राथम्येनोत्तीर्य मध्यप्रदेशे शासकीयमहाविद्यालयव्याख्यातृत्वेन नियुक्तः, पीएच०डी० पदवीभूषित इदानीं। काशीहिन्दूविश्वविद्यालये साहित्यविभागा-ध्यक्षपदमलङ्करोति। साहित्यशास्त्रे पारङ्गतः कालिदासवाङ्मये कृतपरिश्रमः 'शिष्यः कश्चित् कविकुलगुरोरेष सनातनः कालिदासस्येव काव्यकलामनुहरन् स गुरुमेवातिशेते। कालिदासीयां सरसकान्त-प्रसाद-गुणसंपन्नां वैदर्भीशैलीमङ्गी-कुर्वन् कालिदासस्येवोदात्तविचारवैभवं प्रकटयंश्चैष कालिदासस्य नूत्नावतारः परम्पराया अन्धानुकरणं न करोति। भारतस्य राष्ट्रियप्रज्ञा समुद्भावयतः कवेरस्य सीताचरिते सीता न करुणैकपात्रं, किन्तु तपःपावनौजोज्योतिरुदात्तचेता जगन्माता राष्ट्रदेवी। डा० सी० डी०देशमुखमहोदयेन युक्तमेवोक्तं "सीता-चरितस्य सीता कालिदासस्य सीताया अधिकं प्राणवती" ति। भाषायाः सौष्ठवं, विचाराणां गाम्भीर्यम्, छन्दसां वैविध्यं, अलंकाराणामभिनवप्रयोगः, रुचिरता सुभगं वस्तुपरिबृंहणमित्येवमादिभिर्विश्वबन्धुत्वविधृतां राष्ट्रियतां संस्कृतवाण्या साफल्येन समुल्लासयन् कविरेषोऽभिनवभारतस्य राष्ट्रियकविष्वग्रगण्यः। वाल्मीकेराश्रमस्थायाः सीताया हृद्यं प्रभावि चित्रणमस्य काव्यसौरभस्य निदर्शनं—

निजपरिसर—तीर्थजातमेषा
मुनिसहिता पदयात्रया ददर्श।
अयि बत कथमन्यथा ममत्वं
निजभुवि कोऽपि भजेन्न तां स्पृशेच्चेत्॥

किसलयशिशुसोदरेण सीता
कलमभुवः स्वकरेण मृद्नती सा।
कठिनकरकृतां स्वभूमिसेवां
कृषकजनस्य सुदूरमत्यशेत॥

(सीताचरिते ६ सर्गे-३४-३५)

यथा वा—

कविमतिरिव साध्वी दर्शने सत्पदस्य
नियतिरिव च धीरा कर्मयोगेषु साऽपि ।
अलभत सति चित्ते स्वेऽक्षरं ज्योतिरेकं
प्रियविरहपतङ्गो यत्र शान्तिं जगाम ॥

(सर्ग १०-६०)

सीताया योगबलेन समाधिमाङ्गल्यस्य हृदयस्पर्शि वर्णनं यथा—

सा सर्वेभ्यो विनयमधुरामञ्जलिं मूर्ध्नि धृत्वा
न्यस्ताशीर्भिः करकिसलयं चन्द्रकेतोश्च शीर्षे ।
स्मेरं धृत्वा मुखसरसिजं शान्तभावा पुनश्च
भेजेऽभ्यासात् स्थिरसुखसमां पद्ममुद्रां सुभद्राम् ॥

(सर्ग १०-६६)

प्राणायामः स्वयमथ तदा प्राणरोधस्वरूपः
प्रादुर्भूतः सहजसुभगो ध्यानदार्ढ्यं दधानः ॥
इत्थं सैषा जनकतनया स्वात्मदेवस्वरूपं
ज्योतिष्कामं कमपि मुदिता राममासाद्य जाता ।
का भीरस्मिन् विरहजनिता का च लोकप्रसूता
सत्त्वासत्त्वप्रतिथिरबला का च कालव्यपेक्षा ॥

(सर्ग १०-६८,७०)

मध्यप्रदेशेऽन्ये द्वे महाकाव्ये–'एडवर्डमहाकाव्यं' (१९०५ ई०), सुलतानजहां विनोदमहाकाव्यं' (अप्रकाशितं) च भोपालवासिनोर्शीदत्तशास्त्रिणा प्रणीते ।

ग्वालियरनृपस्य पौराणिको भट्टश्रीनिवासशास्त्री चक्रवर्ती (१८८३-१९४८ ई०) श्रीनिवाससहस्रनामाख्यं तिरुपतिवेंकटेशस्य स्तोत्रं सहस्रश्लोकेषु निबद्धवान् (१९२८ ई०) । भगवद्विंशतिः, श्रीषोडषी, गङ्गाष्टकं, यमुनाष्टकं, श्रीरङ्गराजनक्षत्रमाला चेति भक्तिस्तोत्राणि, राजविवाहवर्णनं, श्रीमन्माधवरावप्रसस्तिः, होलोत्सवविनोदश्चेति कवेरस्यान्या लघुरचनाः ।

रत्नत्रयीति सहस्रद्वयश्लोकात्मकं जैनधर्मदर्शनप्रतिपादकं काव्यमन्यानि च स्तोत्राणि सागरे पन्नालालजैनेन निर्मितानि । त्रिपाठिरुद्रदेवविरचिता

१०८ श्लोकेषु गायत्रीलहरी, राजारामशास्त्रिगाडगीलस्य जगद्गुरुशङ्कराचार्य प्रशस्तौ श्लोकशतं कच्छीप्रीतमलालस्य शान्तिशतकं आराधनाशतकम्–उन्नति-शतकं–ब्रह्मचर्यशतकं च लोकनाथशास्त्रिणश्चत्वारिंशत्–श्लोकमयी नर्मदातरङ्गिणी, राम–सीता–शिव–गणेश–कृष्णादीन् अधिकृत्याष्टकानि, विहारिलाल-शास्त्रिणो लाङ्गलीविलासकाव्यं द्वे चान्ये लघुनी भक्तिपद्ये, सदाशिव-सीताराम-मुसलगांवकरकृतानि श्रीनारायणस्तवः, शिंदे वंशवर्णनम् इत्यादीनि, करमलकरशास्त्रिणो यदुपतिकरुणाष्टकं, रघुपतिकरुणाष्टकं श्रीशान्तादुर्गाष्टकमम्बाष्टकमित्यादिरुचिराण्यष्टककाव्यानि रुद्रदेवत्रिपाठिनश्चित्रबन्धे गुरुस्तुतिः, श्रीकृष्णानन्दाष्टकम् शतकेऽस्मिन् विरचितानां मध्यप्रदेशीयभक्तिकाव्यानां प्रशस्तीनां च प्रतिनिधित्वं कुर्वन्ति । एतेष्वाराध्यं प्रति भावमाधुर्यं करमलकरशास्त्रिकृत् श्रीरघुपतिकरुणाष्टकादुदाह्रियते यथा—

त्वदंघ्रिकमले सदा निहितसन्मनोभृंगया
सदीनकुलदीनया ललनया शबर्या तया ।
न दत्तफलभक्षणे हृदि कृता तदुच्छिष्टता
ममैव करुणा कथं रघुपते न ते जायते ॥

राष्ट्रियभावनया प्रेरितानि कतिचित् खण्डकाव्यान्यप्यस्मिन् युगे प्रकाशितानि । वडवानीतो गणपतिशङ्करशुक्ल इन्दौरमहाविद्यालये व्याख्याता भूदान-यज्ञगाथानाम्नि स्वकाव्ये भूदानस्यादर्शकार्यारम्भ-विकासाः पदयात्रा, विघ्नोपशमनार्थमहिंसामार्गावलम्बनम्—इत्यादीनां सरलसंस्कृतभाषया श्लोकबद्धं निरूपणं प्रस्तौति । इन्दौरनगर एवाध्यापकपदस्थस्य कच्छीप्रीतमलालस्य मातृभूमिकथायां सुगमसंस्कृतश्लोकेषु बालच्छात्रोपयुक्तो भारतभूमेरितिहासो निबद्धः । सत्याग्रहनीतिपाठः त्रिपाठिरुद्रदेवस्य कृतिः करमलकरशास्त्री 'चीनाक्रमणं' इति वीररसप्रधाने काव्ये एकपञ्चाशत् पद्यैः चीनजनाधिक्षेपपूर्वकं स्वदेशीयानां देशभक्तिभावनामोजस्विशब्दैर्जागरयति । यथा—

पादप्रहारैः खलु यस्य तुष्टिः
स आर्जवैस्तुष्यति नैव मूर्खः ।
'शुनः कपाले लगुडप्रहारः'
कार्येति नीतिः कुटिले स्वशत्रौ ॥

गतं न शोच्यं ह्यधुना युवानो वैमानिकानां च सुनाविकानां ।
सैन्यस्य मध्ये पदचारिणां च प्रावेश्य युद्धे कुशला विधेयाः ॥
सर्वस्य नाशस्य प्रधानमूलं भेदं विहायाद्य रिपुर्यथा नः ।
पुनः स्वराष्ट्रस्य पवित्रसीमां नोल्लंघयेदाशु तथा विधेयम् ॥

'मन्त्रिषु दृष्टिक्षेपः' इति पञ्चविंशतिपद्यात्मके काव्ये कविः मन्त्रिणः कर्तव्यशून्यतां विहाय जनहिताय प्रेरयति । जनजागरणाय शतप्रायाणि बहुविध विषयानवलम्ब्य स्फुट-लघु-नीतिकाव्यान्यप्यनेन ग्रथितानि । समस्यापूर्तिषु चित्रकाव्यबन्धेष्वपि कवेरस्याभिनिवेशो दृश्यते ।

१९६३ खिस्ताब्दे प्रकाशितं डा०शिवशरणशास्त्रिणा प्रणीतं 'जागरणं' नवीन-गेय-शैल्या चरितगीतिकाव्यानां संग्रहोऽस्ति । दतियापुरे शासकीय-महाविद्यालये प्राध्यापकोऽयं कविर्देशवासिनां जागरणार्थं राष्ट्रियकविता अन्याश्च वैराग्यभावपूर्णाः कविता आधुनिकच्छन्दःसु विरच्य्य २९ गीतानां संकलनं कृतवान् । पद्यं गेयं यथा—

जयतु जयतु भरतमही पुण्यशालिनी ।
शौर्यतपस्त्यागमयी, शान्तिरता कान्तिमयी
जननीयं क्षेमसयी स्नेहमयी स्नेहरूपिणी ॥

पाश्चात्यदेशेष्वप्यादृतः पद्मभूषणपदवीविभूषितो विक्रमविश्वविद्यालयेन डि० लिट् उपाधिना समानित उज्जयिनीयः सप्ततिवर्षदेशीयः प्रकाण्डसंस्कृत-पण्डितो ज्योतिषज्ञः सूर्यनारायणव्यासो 'भव्यविभूतयः' इति षट्पञ्चाशत् श्लोकात्मकसुगमपद्यैः सामाजिक-धार्मिक-वैज्ञानिक-राजकीय-क्षेत्रेषु प्रथितय-शसां भारतीयविभूतीनामल्पपरिचयं विवृणोति । यथा—

वीतरागभयं देवं दयया समलङ्कृतम् ।
महावीरं महावीरं वन्दे जिनवर वरम् ॥

संस्कृतभाषाया दुर्बोधतां निराकृत्य तां साधारणजनोपयोगिनीं विधातुमे-तादृशाः प्रयत्नाः पण्डितैरप्यङ्गीकृताः ।

डा०रुद्रदेवत्रिपाठी १९२४ खिस्ताब्दे स्वजन्मना पुरा दशपुर-नाम्ना प्रसिद्धं मन्दसोरनगरमलङ्कृतवान् । तत्रैव शिक्षकपदे स्थितो मालवमयूरमासिकस्य संपादनमकरोत् । कतिचिदुपरिनिर्दिष्टरचनाव्यतिरिक्त तस्य पत्रदूतं नाम दूतकाव्यमपि रोचकं प्रतिभाति । मेघदूतपद्धत्या काव्येऽस्मिन् मुम्बापुरीं प्राप्तः कविर्मन्दसोरस्थं स्वगुरुं प्रति सन्देशप्रेषणे मार्गस्थानि दृश्यानि पत्ररूपिणं दूतं कथयति । अस्मिन् खण्डकाव्ये १४७ पद्यानि मन्दाक्रान्तायामेव ग्रथितानि । तस्य प्रसादरम्या ललितपदावली निर्दिश्यतेऽत्र—

एकं मित्रं विलसति यतो भूतले निर्धनानां
दूतं चैकं प्रकृतिमधुरं सौख्यदं पत्रमेव ।

एतच्चाल्पव्ययमनुचरं स्वष्टवाद्यप्रमादि
प्रीतेः पात्रं चरणरहितं शीघ्रगं दूरयायि ॥

(पत्रदूतं १६)

दिष्ट्या दृष्टिं चटुलयति यच्चाकचक्येन चञ्चो-
र्नदीयस्तत् किमिति शिखरस्थं न जाने मनोज्ञम् ।
इत्थं चित्ते त्वयि विमृशति प्रत्यभिज्ञानपट्टो
विश्रामस्थो भृगुपुरमिति व्यंक्षति स्वाभिधानम् ॥

(७०)

इदानीं प्राचीनपरम्परागतसंस्कृत–छन्दांसि विहाय भाषाछन्दःसु मुक्तच्छन्दसि च काव्यग्रथनस्याभिनवा प्रवृत्तिः परिलक्ष्यते । श्री भि. वेलणकरो १९१५ खिस्ताब्दे महाराष्ट्रे जाते मुम्बई-विश्वविद्यालये संस्कृताध्ययने पुरस्कारविजेता शासनाधिकारपदे प्रतिष्ठितोऽपि संस्कृतानुरागं संवर्धयन् संस्कृतलेखनेन विद्याव्यासङ्गमद्याप्याविष्करोति । पत्रालयाधीशपदे भारतस्य विविधप्रान्तेषु कार्यं कुर्वतोऽस्य पोस्टमास्टरजनरलपदे भोपाले कंचित्कालं नियुक्तिरासीत् । भोपालस्थेन तेन 'जवाहरचिन्तनम्' 'विरहलहरी' चेति संगीतात्मक-गीतिकाव्यद्वयस्य सर्जनं कृतम् । जवाहरचिन्तने न केवलं जीवन-चरित्रं वर्णितमपि तु जवाहरस्य मृत्युना स्मृतिपथमानीताना तज्जीवनस्य विविधपक्षाणां चित्रणं तत्कार्यकलापेषु च वक्तव्येषु च कृतं तत् तत् चिन्तनं कविना स्वकल्पनयोत्प्रेक्ष्य कालक्रमानुसारं चित्रितम् । यथा नेहरुणा संयुक्त-राष्ट्रकुलसभायां यद् भाषितं (३-११-१९४८) प्रथमोपस्थितौ तद्—

समुदितो निर्ममः सङ्गमः
सर्वेभ्यो विनतस्य मे नमः
जनस्य नान्नं नापि च वसनं
न सुखस्पृष्टं तस्य जीवनं
कस्मादत्र तु नीतेः पठनं
न तेन दुःखशमः
सर्वेभ्यो विनतस्य मे नमः ।

(३८–पृ० ९५-९६)

गेयशैल्यां विरचिते 'विरहलहरी' काव्ये विरहगीतानि भावानुकूलमसृण-पदचयनेन प्रस्तुतानि । यथा—

विधातुरपि जयिनी । प्रणयिनी ।
कण्ठः कमलं, सुधाधिधवलं
कोकिलकण्ठी कलाकामिनी ॥

एते गीतिकाव्ये विविधरागेषु स्वरबद्धे आकाशवाणीतः प्रसारिते । विष्णु-वर्धापनं, गुरुवर्धापनं, जीवनसागर इति लघुकाव्यानि गुरुजनप्रशस्तौ संस्कृत-छन्दःसु विरचितानि जयमङ्गला नाम मराठीकाव्यस्यानुवादोऽस्या कवेः काव्यविस्तारं प्रकटयन्ति ।

रावलेश्यामलालस्य वटवल्लरी-मुग्धा-पावनं चेति संस्कृत आधुनिकगीति-काव्यत्रयम् त्रिपाठिरुद्रदेवस्य 'प्रेरणायां' चलश्चित्रपटसंगीतानुकरणेन गेयाना संस्कृतगीतानां संग्रहो विद्यते । 'विनोदिनी' 'डिण्डिम'श्चेति द्वे हास्यरसात्मके-अपि गीतिकाव्ये कविनानेन विरचिते ।

करमलकरशास्त्रिणो "लोकमान्यालङ्कार:" इत्यस्मिन् काव्येन सहालङ्कार-शास्त्रस्य समन्वयोऽस्ति । राष्ट्रभक्तिपरः कविरलङ्काराणामुदाहरणार्थं लोकमान्य-तिलकस्य जीवनविषयकाः प्रेरणाप्रदान् शतश्लोकान् प्राचीनछन्दःसु विरचित-वान् । महामना विद्वान् एष इन्दोरसंस्कृतमहाविद्यालये सांख्ययोगप्रधाना-ध्यापको बहूनां प्रकाशिताप्रकाशित ग्रन्थानां कर्ता । पद्यपद्माकर-श्लोकमञ्जू-षादयः तस्य कृतयः प्रथिताः ।

अपरो संस्कृतकाव्यस्य विकासोऽन्यभाषासु ग्रथितानां काव्यानां संस्कृता-नुवादे परिस्फुटति । यथा—गान्धीमहात्मनः शतसूक्तीनां बडवानीस्थ गणपतिशङ्करशुक्लकृतः पद्यानुवादः, श्रीरामदेवलीलामृतं तेनैव नाम्ना हिंदी-भाषया डिंगलकविना लिखितस्य काव्यस्य शास्त्रिकृष्णशर्मणा कृतः संस्कृता-नुवादः, त्रिपाठिरुद्रदेवेन संस्कृतश्लोकबद्धौ 'कालिदासप्रेरितः शिल्पसंग्रह.' 'अजन्तादर्शनं' चेति पुरातत्त्वविषयकग्रन्थयोरनुवादौ, रामदासस्वामिकृत-मराठी पद्ययो रावलेश्यामलालेन विहितोऽनुवादः 'मनसः श्लोकाः' 'करुणा-ष्टक' चेति, द्विवेदिप्रेमनारायणस्य बिहारीकविकृतहिंदीसप्तशत्याः 'सौन्दर्य-लहरी'ति संस्कृतानुवादस्तथाऽन्ये हिंदीसन्तकवीनां पद्यानां सूक्तीना चानुवाद इत्यादयः । नारायणदत्तत्रिपाठिनः सत्येशगीतं सत्यनारायण-कथायाश्छन्दो भयपद्यरूपमस्ति । सेवानिवृत्तवाक्लीलखरेलक्ष्मणशर्मणा सागरवास्तव्ये पञ्चत्रिंशद् विख्याताङ्गलकवितानां हृद्यसंस्कृतभाषया विहितोऽ-नुवादोऽभिनवप्रयोगो वर्तते । अस्मिन् काव्यसंग्रहे वर्ड्सवर्थ कवेः' वी आर सेव्हन्' लागफेलो' इत्याख्यस्य 'साम ऑफ लाइफ' आदि सुप्रसिद्ध कविताना

समावेशोऽस्ति । संस्कृतानुवादेषु विविधप्राचीनच्छंदांसि प्रयुक्तानि । इत्थं गीर्वाणवाण्या नवनवाशयाभिव्यञ्जनक्षमत्वं नूतनसरणीषु स्पष्टमाविर्भवति ।

अर्चना–स्तुति–प्रशस्ति–विवाहसमारोह–वर्धापनदिवस–रजतहीरकादिमहोत्सव–अभिनन्दनामंत्रणस्वस्तिवाचन–समस्यापूर्ति–काव्यस्पर्धा–कविसम्मेलनादौ संस्कृतकाव्यनिर्झरिणी नित्यं संप्रवर्तते । भक्तिभावनयेव राष्ट्रियभावनया स्नेहवशाद् वाऽऽशुकवित्वं प्रकटयद्भिर्देववाण्याः सेवा मध्यप्रदेशेऽपि सश्रद्धं विहिता । यदाकदाचिदेवंविधकवितानां प्रकाशनं पत्रिकासु भवति । रावले श्यामलालः, रामदत्तशास्त्री, पद्मनारायणशास्त्री, गोस्वामिधनगिरिः, भगवतीप्रसादः, मथुराप्रसादः, रघुपतिशास्त्री, बदरीप्रपन्नाचार्यशास्त्री, मुसलगांवकरः, हसूरकरशास्त्री, करमलकरशास्त्री, डा० तारानाथव्यास, डॉ० श्रीमतीभवालकर वनमाला, पन्नालालजैनः, राधावल्लभत्रिपाठी–इत्यादयोऽनेके मध्यप्रदेशीयाः संस्कृतकाव्यपरम्परा प्रवर्तयन्ति ।

गद्यं चम्पूश्च

मध्यप्रदेशे दशमशतकस्य धनपालः सर्वप्रथमः श्रेष्ठो गद्यकारः । स तु धाराधीशस्य मुञ्जस्य सभाश्रितः । तेन बाणस्य कादम्बरीशैलीमनुकृत्य तिलकमञ्जरी प्रणीता यस्यां परमारवंशस्य प्रशस्तेरारभ्य तिलकमञ्जरीसमरकेतुनामकयोः काल्पनिकनायिकानायकयोः प्रणयकथा चित्रिता । धाराधीशो भोजः स्वयमेव शृङ्गारमञ्जरीनाम्नीमाख्यायिकां चम्पूरामायणं च विरचितवान् ।

अष्टादशशतके बुन्देलखण्डशासकस्य सभासिंहस्य सभापंडितः शङ्करदीक्षितो गङ्गावतरण-चम्पूं पुरातन-चम्पूशैलीं समासबहुलामनुसृत्य प्रणीतवान् । वाराणसेयमहाराज चेतसिंहस्य च प्रशस्तौ शङ्करचेतोविलासाख्या द्वितीयापि चम्पूस्तेन विरचिता ।

ओरछायां वीरदेवसिंहस्याश्रये (१६०५–२७ ई०) मित्रमिश्रेण श्रीकृष्णभगवतो बालजीवनमवलम्ब्याऽऽनन्दकन्दचम्पू ग्रन्थस्य रचना कृता ।

रीवायां वान्धवनरेशवीरभानोः शासनकाले (१५१५–५४ ई०) भानुकर कविः कुमारभार्गवीयचम्पूं प्रणिनाय । एष ग्रन्थस्तु निर्देशमात्रेण ज्ञातोऽधुनाऽनुपलब्धः । वीरभानुतनयो राजा वीरभद्रदेवः (१५५४–५६) स्वयं दशकुमारपूर्वकथासारस्य लेखक आसीत् । तस्याश्रये पद्मनाभमिश्रभट्टाचार्यः स्वस्वामिनो वीरभद्रदेवस्य चरित्रविषयक–वीरभद्रदेवचम्पूं व्यरचयत् ।

एतदपि चम्पूकाव्यं प्राचीनचम्पूशैलीमेवोद्धरति । रीवाधीशो विश्वनाथसिंहस्तु (१८३३–५४ ई०) रामचन्द्राह्निकाख्यायां भक्तिप्रवणायां स्वरचनायां चम्पूसरणिमङ्गीकृतवान् किंतु तत्र पदलालित्यं रमणीयं मधुरं च विद्यते । यथा भगवतो दैनिक-कार्यकलापचित्रणे स्नानं वर्णयति—

सख्यः समागत्य···कलिन्दकन्यका इव कमलिनीदलपुटैः···सरस्वत्य इव दरदलितकोकनदकोरकैः काश्चित् कलशहस्ताः···विविधरूपधरा गङ्गा इव प्रभातपुण्डरीकैः रघुनन्दनं स्नपयामासुः ।

विंशशतके मध्यप्रदेशे चम्पूरचनापवादात्मकैव । यथा शतकारम्भे सदाशिव-सीताराम-मुसलगांवकरस्य ग्वालियर-शासकप्रशस्तिरूपा शिंदेविजय-चम्पूः । ग्वालियरनगरे पद्मावती–परिणयचम्पूर्नामान्या चम्पूर्विरचिता । उज्जयिनीय-गोपीकृष्णशास्त्रिणा पण्डितसूर्यनारायण-व्यास-पितुश्चरित्रं श्रीमन्नारायण-व्यासचरित-नाम्नि लघुपुस्तके चम्पूशैल्या लिखितम् । सामासिक-पदावलीं क्लिष्टशैलीं प्रति च पराङ्मुखा विंशशतकीयाः संस्कृतलेखकाः चम्पूशैलीं विहाय प्राञ्जलसरल-सुबोध-गद्यसरणिं प्रति विशेषाकृष्टाः प्रतिभान्ति । तेषां रचना अप्यल्पकाया जाताः । उपन्यास–लघुकथादयोऽभिनवलेखनविधा प्रचलिताः ।

इन्दोरसंस्कृतमहाविद्यालये भूतपूर्वप्राध्यापकः ख्यातिंगतः संस्कृतपण्डित-श्रीपादशास्त्री हसूरकरः 'संस्कृतभारत–नररत्नानि' शीर्षके ग्रन्थसमुच्चये पञ्चदशचरित्रग्रन्थान् गुम्फितवान् । सुगमपरिमार्जित संस्कृतेन प्रस्तुतानि राणा-प्रताप–शिवाजी–रामदास–वल्लभाचार्य–गुरुनानक–राजस्थानसतीत्यादीनां भारतीय–विभूतीनां चरित्राणि । उपर्युक्तेषु पञ्चदशसु षड़ेव पुस्तकानि प्रकाशितानि । शेषाणि हस्तलिखितरूपेणैवोपलभ्यन्ते ।

अन्यतम इन्दोरस्थशिक्षकः सोमनाथशास्त्री वृत्तदशकुमारचरिते दशकुमार चरितस्य सारं प्रस्तौति । १९३४ खिस्ताब्दे सागरे पन्नालालजैनेन श्रीपाल-चरितं गद्ये विरचितम् । राष्ट्रियभावनया धार्मिकश्रद्धया वा बालबोधाय वा चरित्रग्रन्थानां प्रणयनं यथा पद्ये तथा गद्येऽपि सुगमसंस्कृतभाषया प्रस्फुटितम् ।

मध्यप्रदेशे संस्कृतोपन्यासस्य प्रवर्तकोऽस्ति डॉ० रामजी-उपाध्यायः सागर-विश्वविद्यालये संस्कृत विभागाध्यक्षः । श्रीकृष्णसुदाम्नोश्चरितमधिकृत्य विरचिते 'द्वा सुपर्णा' नामक उपन्यासे नवीनपात्राणि परिकल्प्य मूलकथाया काल्पनिक–घटनाः संयोज्य चाधुनिक युगोपयोगिनो भारतस्य भव्यसंस्कृते-

रुद्रास्ततत्त्वानां महत्त्वं प्रदर्शितम्। आदर्शविश्वविद्यालयस्य, गुरुशिष्ययोः सौहार्दस्य, स्वस्थग्रामीणजीवनस्य, जीवनोपयोगिस्त्रीशिक्षायाः, ब्राह्मणानां त्यागमयतपोनिष्ठाध्यात्मवृत्तेः, सर्वोदयार्थमनासक्तकर्मणश्चोज्ज्वलं निदर्शनं रोचकेऽस्मिन् लघूपन्यासे पुरस्कृतम्। भाषापि प्राञ्जला परिष्कृता सरसा च सन्धीनां परिहारेण बालानामपि सुगम्या प्रेरणाप्रदा च। यथा—

'यथा सुदाम्नः परिश्रमेण नद्याः तटे आश्रमवसतिः समभवत् तथैव कौमुद्याः कल्पनया सुदाम्नो ग्रामे स्त्रीणां संस्थाः संवर्धिताः। अचिरमेव तत्र महत् परिवर्तनं समजनि। तथा हि—कन्यकानां कृते पाठशाला प्रवर्तिता।··· ग्रामवधूनां कृते प्रौढा शाला उद्घाटिता।···स्वाभाविको भवति संवादः जनस्य विविध-प्रवृत्तीनाम्।···सुशिक्षिताः नार्यः ग्रामस्य स्वच्छीकरणे व्यापृता बभूवुः। तस्मै प्रयोजनाय स्त्रीणामेका सभा समायोजिता।'

यथावसरं स्थाने-स्थाने वैदिकमन्त्राणां सूक्तीनां च सम्यक् समावेशोऽस्योपन्यासस्यान्यद् हृद्यं वैशिष्ट्यम्। मन्त्राणां सुरुचिपूर्णा व्याख्यापि प्रेरणाप्रदा यथा—

ब्राह्ममुहूर्ते—विद्यार्थिनः गुरोः सविधे सन्ध्याविधिं सम्पादितवन्तः। तथा हि—ओऽम् भूः, भुवः, स्वः। तत् सवितुर्वरेण्यं भर्गो देवस्य······'। यथा काले महर्षिणाऽस्य मन्त्रस्य व्याख्या कृता।—"न केवलं स्वग्रामः, जनपदः देशो वा स्वकीयः इति मन्तव्यम्, अपि तु सर्वोऽयं भूलोकः युष्माकं···वर्तते। तद्यथा पूर्वैः अनूचानैः समर्थितं—"वसुधैव कुटुम्बकमिति······।

त्रिपाठिभागीरथीप्रसादस्य मङ्गलमयूखनामोपन्यासोऽप्रकाशित एव। सागर विश्वविद्यालयात् पदवीधरेण युवलेखकेन राधावल्लभत्रिपाठिनेदानीमेव व्यङ्ग्यप्रधानाधुनिकाख्यायिका महार्कविकंटकः रचिता प्रकाशिता च। अद्यतने जीवने पदे पदे प्रयुक्तानां हिन्दीकृताङ्ग्लशब्दानां यथेच्छं संस्कृतीकरणेनास्मिन् संवादप्रवाहोऽकृत्रिमो रोचकश्च जातः। यथा—बाष्पयन्त्री (रेल), यात्रापत्रं (टिकट), कागलमुद्रा (करेन्सी नोट) बेसनभर्जिका (बेसन की पकौड़ी) आदि। "थर्ड येन डिवीजनं ह्यधिगतं शास्त्रिपरीक्षार्णवे" एवमादिषु मूलशब्दप्रयोगो हास्यरसं तनोति। दैनंदिनवार्तालापयोग्या प्रवाहपूर्णा भाषा सभ्यविनोदश्चास्य नवलेखकस्योज्ज्वलभविष्यं सूचयतः।

भागीरथीप्रसादत्रिपाठिनः 'कथासंवर्तिका' 'टालस्टायकथाः' च, गणपतिशङ्करशुक्लस्य 'लोककथाः, अन्याश्च पत्रिकासु प्रकाशिता लघुकथा अद्यत्वेऽत्र प्रचलित लघुकथासाहित्यस्य परिचायिकाः सन्ति।

उपन्यास कथा-चरित्राद्यतिरिक्त ज्ञानविज्ञानविषयेष्वपि संस्कृतलेखकाना लेखनी न विरता । भारतीयसंस्कृतेः परिचायको ५१२ पृष्ठात्मको 'भारतस्य सांस्कृतिकनिधि'र्नाम विद्वताप्रचुरो ग्रंथः प्रोफेसर रामजी उपाध्यायेन सपरिश्रमं प्रणीतः पुस्तकेऽस्मिन् प्राचीनसंस्कृतिधाराया विविधाङ्गोपाङ्गानां सम्यक् पर्यालोचनं सविस्तरं वैज्ञानिकप्रणालीमवलम्ब्य कृतम् । संस्कृतेः प्रवृत्तीना परिज्ञानाय विशिष्टानुसंधानपद्धतिरनुसृता । एतादृशस्य ग्रन्थस्य संस्कृतभाषायामपूर्वं स्थानं विद्यते । भाषा विषयानुरूपा प्रौढाऽपि सरला । लघुवाक्यप्रयोगः सर्वेषां सुबोधाय भवति ।

प्राध्यापकपदात् शासकीय शिक्षाविभागाधिकारपदं गतो भोपालस्थो डा० प्रभुदयाल-अग्निहोत्री १९५७ खिस्ताब्दे संस्कृतभाषयाऽभिनवमनोविज्ञानं नाम ग्रंथ प्रणीतवान् ।

महेशचन्द्रचूडामणेर्विशिष्टाध्ययनं नाम पी.एच.डी. उपाधिकृते सागर विश्वविद्यालये स्वीकृतः शोधप्रबन्धः जगदीशचन्द्रमिश्रेण १९६४ खिस्ताब्दे संस्कृतभाषया प्रस्तुतः ।

साहित्यदर्शनकाव्यशास्त्रव्याकरणादि बहुविधविषयेषु लेखाः संस्कृतपत्रिकासु निरन्तरं प्रकाश्यन्ते । सागरविश्वविद्यालयस्य संस्कृतपरिषदः सागरिका त्रैमासिकीऽनुसन्धानपत्रिका प्रवर्तते । तत्र विगतदशवर्षेभ्योऽखिलभारतीयसंस्कृत-विद्वत्तल्लजानां शोधनिबन्धाः प्रकाश्यमानाः सन्ति ।

इत्थं संस्कृतभाषाद्यापि विविधक्षेत्रेषु प्रयोगयोग्येति सुस्पष्टमेव ।

नाटकसाहित्यम्

नाटककारेष्वद्यावधि सर्वश्रेष्ठः शाकुन्तलकारः कालिदास मध्यप्रदेशीय एव उज्जयिनी च तस्य कर्मभूमिरित्याधिकतरविदुषां मतम् । तस्यैवान्ये द्वे नाटके मालविकाग्निमित्रं विक्रमोर्वशीयं च सुप्रसिद्धे । यत्र तत्राभिनीयन्ते नाटकान्येतानि सोत्साहं च दर्शकैरभिनन्द्यन्ते । मृच्छकटिकस्य प्रणेता शूद्रकोऽपि प्राचीनवाङ्मये प्रथित उज्जयिन्या राजा शूद्रक एवेति यत् कैश्चित् प्रतिपाद्यते तत् तु प्रमाणाभावात् संदेहास्पदमेव । चतुर्भाणीति प्रसिद्धे नाटकचतुष्टये 'पद्मप्राभृतक'मित्येकं भाणमस्य शूद्रकस्यैव कृतिः, अपरो भाण 'उभयाभिसारिका' इति वररुचे रचना, स च वररुचिरप्युज्जयिन्यां विक्रमादित्यस्य राजसभाया नवरत्नेष्वन्यतम आसीत् इत्यपि समर्थ्यते । कालिदास इव समादृत उत्तररामचरित-महावीरचरित-मालतीमाधवादीनां प्रणेता भवभूतिः काले काले उज्जयिन्यामुवासेति सम्मतम् ।

मायुराजो नवशतकात् प्रागेव चेदिमण्डले कलचुरिवंशजः शासक आसीत् । तेन विरचित-मुदात्तराघवमिति नाटकं बहुकालानन्तरं प्राप्तमेव । मायुराजस्य राजधानी मध्यप्रदेशे माहिष्मत्यासीदिति तर्कस्तु विकल्पस्य-विषयः ।

नवमदशमयोः शतकयोः सन्धिकाले माहिष्मत्यां कलचुरिनृपाश्रये मुरारि-कविनाऽनर्घ्यराघवस्य प्रणयनं कृतम् ।

राजशेखरस्य चत्वारि रूपकाणि प्रसिद्धानि सन्ति । दशाङ्कात्मकं प्रदीर्घं बालरामायणं, अपूर्णं बालभारतं, नाटिका विद्धशालभञ्जिका, प्राकृतसट्टकं कर्पूरमञ्जरी चेति । अनेन कविना कलचुरिनृपतेः सभायां दशमशतके त्रिपुर्यां विद्धशालभञ्जिकानाटिकां प्रणीय तस्या नाट्यप्रयोगोऽपि कारितः ।

दशमशतके धारायां मुञ्जस्य सिन्धुराजस्य चाश्रये जैनाचार्येण महासेनेन प्रद्युम्नचरितं नाटकं प्रणीतम् । एकादशशतके धाराधीशभोजेन नष्टप्रायस्य हनुमन्नाटकस्य सम्पादनं कारितम् । छायानाटकं महानाटकं चेत्यपरनामेदं नाटकमितरेभ्यो वैशिष्ट्यं भजते । भिन्नेव नाटकविधाऽस्मिन्नवलम्बिता । महाकाव्यसरण्या रचितमिदं सुदीर्घं नाटकं भाषामाधुर्येण भावसौंदर्येण च विशिष्यते । अस्य नूतनविधायास्तु प्रचारो विकासो वा परवर्तिनाटककारैर्न कृतः ।

परमारनृपार्जुनवर्मणो राजगुरुणा मदनेन धारायां १२१३ ख्रिस्तसंवत्सरे श्रीहर्षस्य रत्नावली-नाटिकामुपजीव्य पारिजातमञ्जरीनाटिका विरचिता ।

रायपुरस्थकलचुरिवंशीयराजयोर्हरिवर्मरमणमल्लदेवयोः सभापण्डितस्य राम-देवव्यासस्य त्रीणि छायानाटकानि 'रामाभ्युदय–पाण्डवाभ्युदय–सुभद्रापरिण-येत्याख्यानि सन्ति (१४०२-१४१५ ई०) ।

बुन्देलखण्डशासकसभासुन्दरस्य राजसभायां शङ्करदीक्षितेन प्रद्युम्न-विजय इति नाटकं विरचय्याष्टादशखिस्तशतके छात्रसालपौत्रस्यास्य सभा-सुन्दरस्य राज्यारोहणोत्सवे पन्नायामभिनीतम् ।

रीवायां बान्धवनरेशो विश्वनाथसिंहः (१८३३-६५ ई०) आनन्द-रघुनन्दनं नाटकं प्रणीतवान् । रामभक्तिपर-मेतत् सप्ताङ्कं नाटकं परम्परागत-नाट्यविधामवलम्ब्य विरचितम् । दीर्घक्लिष्टसंवादैः सह पद्यानामपि समा-यशोऽत्र वर्तते । रामाणीयकथापात्राणां नामपरिवर्तनं विधाय रामोऽत्र हितकारी, सीता महिजा, लक्ष्मणो धराधरः, रावणो दिक्शिराः, हनुमान् त्रेतामल इति नामभिः प्रस्तुताः ।

ऊनविंशतिशतकस्यान्तिमे चरणे ग्वालियरनगरे रघुनाथविष्णुवेलंकर विरचितो जगन्मोहनं नाम भाणः प्रकाशितः। ततो विंशशतकारम्भे इन्दोर-संस्कृतविद्यालये भूतपूर्वप्राध्यापक-जगन्नाथटिल्लू-अभिधस्य 'उदयप्रेमलीयं कीर्तिमन्दिरं, साम्राज्यप्रदर्शनं'चेति नाटकत्रयं श्रूयते, न तु प्राप्यते।

अमरकण्टके शिक्षकपदस्थो विष्णुदत्तत्रिपाठी (जन्म १६०८) द्वे नाटके विरचितवान्। दन्तकथानुसारिकालिदासजीवनमधिकृत्य विद्योत्तमा इति नाटके वैदुष्यगर्विताया कालिदासपत्न्या विद्योत्तमाया चरित्रं प्रधानतया चित्रितम्। भाषा चातिसरला। अनसूयात्रिचरितचित्रणे शान्तरसपरम् 'अनसूया चरितम्' इति सप्ताङ्कमपरमस्य नाटकम्। अस्मिन् प्रासङ्गिककथावस्तुरूपेण भारतीयसंस्कृतिं चित्रितुं नूतनसंयोजनानि, सुपरिचित-सूक्तीनां प्रयोगश्च, भाषायाश्च सारल्यं वर्तन्ते।

कल्याणपुरवासिना रामजीवनमिश्रेण सारस्वत-मित्याख्ये स्वनाटक अद्यतनेऽपि युगे संस्कृतभाषाया उपादेयता प्रतिपादिता।

गताब्ददशके नाट्यलेखनविधायां नूतनप्रवृत्तीनामाविर्भावेण महत्परिवर्तनं परिलक्ष्यते। आधुनिकरङ्गमञ्च अभिनयार्थं पाश्चात्यनाट्यविधानुसारिणा भारतीयभाषासु लोकप्रियतां गतानां नाटकानां सरणिः संस्कृतनाट्यलेखनेऽप्यङ्गीकृता। रूपकाणामेतेषां कलेवरं परिमितं येन द्वित्रिहोरा-वधिरेवैपामभिनयकालः। तथैव-एकाङ्क- नभोनाट्य-गीतनाट्य-संगीतिकादीनामपि प्रचलनं प्रावर्तत। नाट्यसंस्थाः, नाट्यस्पर्धाः, विद्यालयेषु संस्कृतनाट्याभिनयः, नाट्यमहोत्सवाः, आकाशवाणीतः संस्कृतकार्यक्रमप्रसारणं, सभासम्मेलनेषु सांस्कृतिककार्यक्रमाणामायोजनं, संस्कृतग्रन्थेभ्यः पारितोषिकवितरणमेतदादि सर्वं संस्कृतनाट्यसाहित्यसंवर्धनाय संजातम्।

महाराष्ट्रीयोऽपि भोपाले शासकीयकार्ये रतः श्री० भी० वेलणकरो नवशैलीनाटक विरचने प्रसारणे चाग्रेसरः। भोपालस्थेन तेन 'रणश्रीरङ्गः' इति शीर्षकेणैका रणेनापि स्वातन्त्र्यरक्षणं नाहिंसाव्रतविरुद्धमिति प्रतिपादयन्ती नाटकत्रयी विरचिता। अस्यां कालिन्दीति गद्यपद्यमये नाटके गङ्गा-यमुना-सूर्य-हिमालयादीनां मानवीकरणेन प्रतीकात्मक काल्पनिकपात्राणि प्राचीन-राजपरिवाररूपेण निर्माय हिंसाऽहिंसयोः, कर्मसंन्यासयोश्च संघर्षश्चित्रितः। त्रयोऽङ्का अस्मिन् नाटके। द्वितीयं नाटकं कैलासकम्प इति गेयं गीतनाट्यम् (ओपेरा)। अङ्कत्रयात्मकेऽस्मिन् भारतोपरिकृतं चीनानामाक्रमणं, द्रुतं निवर्तनं शान्तेरुपायाश्च नाट्यस्य वस्तु, कैलासः शची देवेन्द्रः शङ्करो गणेशः

सरस्वाती स्वर्गङ्गादीनि कैलासनिवासि पात्राणि, प्राचीनच्छन्दःसु विरचितानि विभिन्नरागेषु स्वरबद्धानि च पद्यानि । क्वचिन्नूतनच्छन्दः प्रयोगोऽपि विद्यते । 'स्वातन्त्रलक्ष्मी' झासीरानीलक्ष्मीबाई जीवनमधिकृत्य त्र्यङ्कं गद्यपद्यमय नाटकम् । 'प्राणाहुती' नामापरोऽपि नाट्यद्वयसंग्रहो भोपालकार्यकाले तेन प्रणीतः 'हुतात्मा' नाम दधीचे ऋषेरात्मबलिदानकथामवलम्ब्य गीतनाट्य नभोनाट्यरूपं कविप्राचीनच्छन्दःसु तथैवाव्याख्यातमात्राबद्धवृत्तेषु ६४ पद्येषु चैकाङ्के विरचितमन्याच राज्ञी दुर्गावतीति गद्यपद्यमयैकाङ्कनभोनाट्य गोंडराज्ञीदुर्गावत्या जीवनाद् कतिचिद् बिन्दून् संगृह्य प्रणीतमस्मिन् सग्रहे प्रकाशितं । मेघदूतोत्तरनामान्यद् गीतनाट्यं (ओपेरा) कवेरस्यैव कृतिः । महाकविकालिदासस्य मेघदूतमवलम्ब्य यक्षशापहेतुं व्रतसमाप्तौ यक्षपत्न्यायोजितपूजनस्वीकारे परिकल्प्य शापावसाने कुबेरप्रसादेन प्रेमिविरहिणोः पुनर्मिलनं च दर्शयित्वाऽपूर्णकथानकस्य पूर्तिरस्मिन् नाट्ये कृता । प्रसङ्गानुसारं स्थाने स्थाने कालिदासीयश्लोकान् संयोज्य नूतनच्छन्दःसु गेयगीतानां रचनां कृत्वा विविधशास्त्रीयरागेषु स्वरबद्धानि च विधाय कविना स्वकाव्यप्रतिभा प्रस्फुटिता । संस्कृतवाण्या अभिनवविलासभूतानि गीतनाट्यानि नभोनाट्यानि नाटकानि चास्य सर्वाण्या काशवाण्या ध्वनिक्षेपितानि, नैकवारं च रङ्गमञ्चेऽभिनीतानि रसिकहृदयावर्जकानि च जातानि । सरला सुमधुरा प्रसादपूर्णा चास्य शैली निदर्श्यते—

यक्षपत्नी —(सकरुणं, सारिकां प्रति)

> स्मरसि त्वं रसिके, सारिके
> ननु तस्यासीः प्रिया दारिके ।
> सुमधुरवचना पञ्जरनिलया
> मम विरहिण्याः कालयापिका ॥

मेघदूतोत्तरीयम् पृ० २१

यत्रा वा—

राज्ञी— परकीयनिष्कासनमेव । किमन्यत् ।

> स्वराज्यं हि श्रेयः शतगुणितमात्मजनहितं
> सुराज्यं न प्रेमः परविहितमप्युत्तममपि ।
> शिशुः पादाभ्यां स स्खलितगतिरप्यत्र चलितः
> स्वपङ्गुत्वं जह्यात्, न तु परभुजासीनमनुजः ॥

स्वातंत्र्यलक्ष्मी पृ० १०६

मराठातोऽनू दत सगीतसौभद्र, कालिदासचरित इति नाटके, स्वातन्त्र्य चिन्ता, स्वातन्त्र्यमणिः, मध्यमपाण्डवः इति नभोनाट्यानि जन्म रामाणस्येति संगीतबालनाट्यं चानेन कविना विरचितानि । सुरभारतीति नाट्यसंस्था भोपालनगरे सस्थाप्य संस्कृतनाट्य-प्रकाशनाभिनयप्रचारादिकार्यं महज्जागरण च लेखकेन विहितम् । अस्य मतेन जनसाधारणेषु संस्कृतानुरागाभिवृद्ध्यर्थं मनोरंजकविधया सुबोधसंस्कृतभाषायाः पुरस्करणमेवैतेषां नाटकानामुद्दिष्टमस्ति ।

अनेनैवोद्देश्येन सागरविश्वविद्यालये रीडरपदस्थ-श्रीमत्य भवालकरवनमालया संगीत-नाट्य-संस्कृतानां सामञ्जस्येन त्रीण्यपि प्रति संस्कृत-संगीतिका-द्वारा जनाभिरुचिं विवर्धयितुं द्वे संगीतिके (ओपेरा) उपनिबध्याभिनीते । 'रामवनगमनं' नाम दृश्यत्रयात्मिका रामकथाश्रिता सङ्गीतिका सर्वजनसुखबोधाय वर्तते । सरलसंस्कृतेन विविधप्राचीनवृत्तेषु रचितानि पद्यानि भावानुकूलरागतालयुत संगीतेन संयोज्य नेपथ्याभिनयादिभी रङ्गमञ्चे प्रस्तुतमिदं नाट्यं सकलरसिक मनोहारि जातम् । पद्यमेकमुदाह्रियते यथा—

रामः—(शिखरिणी—राग—भीमपलास, ताल तीव्रा)

अलं वैक्लव्येन त्वमसि हृदयं जानकि मम
त्वमेव प्राणा मे गतिरपि विना त्वां मम कुतः ।
त्वया सार्धं लोकत्रितयमपि कल्पान्तमरतो
दिवीव स्वर्भोगे क्षणमिव च यास्यन्ति दिवसाः ॥

रामवनगमनम् पृ० १३

द्वितीया सङ्गीतिका कुमारसंभवाश्रिता 'पार्वतीपरमेश्वरीयं नाम । कालिदासस्य कल्पनायामनुसरणेऽपि नाट्यानुकूलं चरित्रचित्रणार्थमभिनयदृष्ट्या च नवीन कल्पनानामुद्भावनमत्र वर्तते । तथैव मदनदहनं, विविधर्तुषु पञ्चाग्निमध्ये वर्षायां हिमपाते च स्थितायाः पार्वत्यास्तपो, ब्रह्मचारिणः शङ्कररूपेण प्रकटनादि रङ्गमञ्चे प्रदर्श्य नाट्यस्यास्य सौष्ठवं परिवर्धितम् । संगीते-स्वर-योजना-भावानुरूपा वर्तते । अस्यानेके नाट्यप्रयोगा अभिनन्दिताः सर्वत्र । अनेन रसिकतोपरोन संगीतिकाया अभिनेयत्वे साफल्यं प्रमाणितम् । अनयोः सङ्गीतं नाट्यप्रयोगेप्सूनां मार्गदर्शनाय लेखिकया ध्व नमुद्रितम् । गीतस्योदाहरणं यथा—मेना (पृथ्वी, राग-कीरवाणी, एकतालः)

श्रुतं पशुपतिस्तपश्चरति केनाचिद्धेतुना
तथापि तनुजां नु यौवनगतामुपेक्ष्येत कः ।

वराञ्स्त्रिभुवने न सन्ति किमुतान्यदेवोत्तमा
उदासितमना पितेति तु विमोऽस्मि चिन्तातुरा ॥
(पार्वतीपरमेश्वरीयम् पृ. ६)

अनयैव लेखिकया गद्ये सामाजिक एकाङ्कः पाददण्डश्चीनाक्रमणस्य पार्श्वभूमिं परिकल्प्य मानवप्रेम्णि हृदयसौन्दर्यस्यैव साफल्यप्रतिपादक आधुनिकसुशिक्षितयुवयुवतीनां त्यागभावनायाः प्रकाशकः प्रणीतः। आशाकवाणीतो ध्वनिक्षेपितोऽयम्। गीतनाट्याभिनयार्थं (बेले) रागेषु गेयं पार्श्वसंगीतं 'सीताहरणं', शालेयछात्राभिनययोग्यानि 'अन्नदेवता' 'भक्तध्रुवमि'त्यादि लघुरूपकाण्यपि लेखिकया विरचितानि।

सागरविश्वविद्यालयस्य भूतपूर्व छात्र उदयपुरे विश्वविद्यालये व्याख्याता राधावल्लभत्रिपाठी 'प्रेमपीयूषम्' इति भवभूतेः प्रणयकथां परिकल्प्य नाट्यमेकं रचितवान्। सहजसरलसंवादै रोचकमभिनेयमिदं विद्यते। भागीरथीप्रसादत्रिपाठिनः 'कृषकाणां नागपाश' इति नभोनाट्यं ग्रामीणकृषकाणां विपदा चित्रणं प्रस्तौति। गोस्वामिघनगिर्यादीनामन्येषामपि लघुरूपकाणि पत्रिकासु प्रकाशितानि सन्ति।

उत्कीर्णलेखाः

मध्यप्रदेशीयसंस्कृतस्यान्यदप्येकं स्रोत उत्कीर्णलेखेषूपलभ्यते। समस्तमध्यप्रदेशे विविधराज्येषु नृपाश्रितप्रशस्तिकारैः सरसकाव्यशैलीमाश्रित्यैनेकेषु शतकेषु रचिताः प्रशस्तयो यत्र तत्र शिलालेखेषु ताम्रपटेषूत्कीर्णा उपलब्धाः। तत्तद्युगेषु प्रतिभाशालिकवीनामास्तित्वं राज्ञां गुणग्राहित्वं च प्रमाणयन्ति। एरण–उदयगिरि–विदिशास्थिता गुप्तकालिकाभिलेखाः, यशोधर्मणोऽन्याश्च दशपुरप्रशस्तयः, प्रतीहारवंशीयभोजनृपस्य ग्वालियरप्रशस्तिः, परमारनृपतिभोजस्य (इन्दोरनिकटे) बेतमाभिलेखः, धङ्गनृपतेः खजुराहोऽभिलेखश्चास्य निदर्शनं सन्ति। एतेषां काव्यगरिमोदाह्रियते। यथा—दशपुरे कुमारगुप्तस्य शासनकाले पट्टवायश्रेण्या विशीर्णैकदेशं सूर्यमन्दिरं ४७३ खिस्तसंवत्सरे संस्कारितम्। तदा तत्रोत्कीर्णः शिलालेखो वत्सभट्टिना विविधच्छन्दःसु चतुश्चत्वारिंशच्छ्लोकेषु निबद्धः। तत्र दशपुरं वर्णयति कविः—

स्वपुष्पभारावनतैर्नगेन्द्रैर्मदप्रगल्भालिकुलस्वनैश्च।
अजस्रगाभिश्च पुराङ्गनाभिर्वनानि यस्मिन् समलङ्कृतानि ॥
चलत्पताकान्यबलासनाथा–न्यत्यर्थशुक्लान्यधिकोन्नतानि।
तडिल्लताचित्रसिताभ्रकूटतुल्योपमानानि गृहाणि यत्र ॥

यथा वा नवमशतके बालादित्यविरचितग्वालियरप्रशस्तौ प्रशस्तशैल्या कविकुलगुरोः शाश्वतादर्श एवाभिव्यज्यते । तद्यथा—

अर्थिभिर्विनियुक्तानां सम्पदां जन्म केवलम् ।
यस्याभूत् कृतिनः प्रीत्यै नात्मेच्छाविनियोगता ॥

कालिदासादीन् स्मारयन्त एते कविवरा दीर्घकालावधौ काव्यपरम्परामनुबध्नन्ति ।

शास्त्रं तन्त्रञ्च

उज्जयिन्यां विक्रमादित्यस्य तथाकथितनवरत्नेषु पञ्च विविधशास्त्रपारङ्गता विद्वद्वरा ग्रन्थकारा आसन् । तथा हि—क्षपणको यदि जैनपण्डितः सिद्धसेनदिवाकर एव भवेत् तर्हि स ज्योतिषे तन्त्रे च विशेषज्ञ आसीत् । अमरसिंहो 'नामलिङ्गानुशासन'-कोषकर्ता, 'वाररुचनिरुक्तसमुच्चय'-कर्ता वररुचिः, आयुर्विद्याया अनेकग्रन्थाणां प्रणेता धन्वन्तरिः, गणितज्योतिषविद् बृहत्संहिता-बृहज्जातकादिग्रन्थानां कर्ता वराहमिहिरश्च । एतेषां देशकालविषये तु विवादो वर्तते । एवं मध्यप्रदेशीयसाहित्यसंवर्धन एतेषां योगदानमपि संदेहानास्पदमेव । अतो दशमशतकीयमुञ्जपरमारादारभ्य मध्यप्रदेशीयशास्त्रग्रन्थानां यथार्थः परिचयः प्राप्यते ।

काव्यशास्त्रम्

धारायां मुञ्जस्य सभाश्रितो धनञ्जयो दशरूपकस्य निर्माणेन काव्यशास्त्रकारेषूच्चैः स्थानं प्राप्तवान् । अस्य ग्रन्थस्य 'अवलोक'-टीका धनञ्जयस्य भ्रात्रा धनिकेन विरचिता । अनयोः समसामयिको हलायुधः पिङ्गलकृतछन्दःसूत्राणां भाष्यकर्ता धारानिवास्यासीत् । सरस्वतीविलासमण्डितो धाराधीशो भोजः सरस्वतीकण्ठाभरणस्य शृङ्गारप्रकाशस्य च रचयितासीत् । द्वे अपि ग्रन्थरत्ने काव्यशास्त्रे महत्त्वपूर्णे प्रसिद्धे च । त्रयोदशशतके धारानृपाश्रये जैनभाष्यकाराशाधरेण रुद्रटकाव्यालङ्कारभाष्यमन्ये च चतुर्दशग्रन्थाः प्रणीतानि ।

बान्धवनरेश वीरभानोराश्रये भानुकरेण चतुर्णां काव्यशास्त्रग्रन्थाणा—रसमञ्जरी-रसतरङ्गिणी-शृङ्गारदीपिका-ऽलङ्कारतिलकाना रचना कृता । तत्र रीवायामेव नरेशविश्वनाथसिंहस्याश्रितो (१७८९-१८५४ ई०) दामोदरशास्त्री वाणीभूषण-नाम्नश्छन्दसां लक्षणग्रन्थस्य कर्ताऽभूत् । विश्वनाथसिंहस्यानुजेन राघवेन्द्रबलभद्रसिंहेन वृत्तिबोधः नाम लक्षणग्रन्थः श्रुतिबोधसरण्या प्रस्तुतः ।

विंशशतके इन्दोरमहाविद्यालये भूतपूर्वाध्यापको (१९२०–२७ ई०) गजाननरामचन्द्रकरमलकरशास्त्री लोकमान्यालङ्कार इत्यभिनवग्रन्थे अलङ्कार-शतस्य सोदाहरणं परिभाषां कृतवान् । शतद्वयश्लोकात्मकेऽस्मिन्नलङ्कारग्रन्थे उदाहरणेषु लोकमान्यतिलकस्य जीवनविषयकाः श्लोकास्तेन सुगमसंस्कृत-भाषया निबद्धा येषु शृङ्गाररसस्य लेशोऽपि परिहृतः । अतश्छात्राणां कृतेऽत्य-तीवोपयुक्त एव ग्रन्थः ।

दार्शनिकं धार्मिकं च साहित्यम्

धारायां ९३३ खिस्ताब्दे जैनमुनिदेवसेनेन 'दर्शनसार' नामको ग्रन्थो विरचितः । धारासभापण्डितेषु जैनधर्मीयैरनेकधार्मिकदार्शनिकग्रन्थानां रचना कृता यथा माणिक्यचन्द्रेण 'परीक्षामुखस्य' न्यायग्रन्थस्य चामितगतिना धर्मप्रकाशस्य ।

धारापतिमुञ्जस्याश्रये मम्मटभ्रात्रा 'उव्वटेन' यजुर्वेदभाष्यस्य प्रणयनं कृतम् । भोजः स्वयं योगसूत्रभाष्यग्रन्थस्य कर्ता आसीत् । रींवायां पद्मनाभ-मिश्रस्य राद्धान्तमुक्ताहारो नव च दर्शनग्रन्थटीकाः, प्रियादासस्य वैष्णव-सिद्धान्तः, वेदान्ततत्त्वादिदशग्रन्थाः (१८०३–१६ ई०) रींवाराजगुरु राम-सखेन्द्रस्य "द्वैतभूषणम्", रीवानरेश-विश्वनाथसिंहस्य तस्य गुरोः सभा-पण्डितानां च राधावल्लभीयमतप्रवर्तकब्रह्मसूत्रभाष्यं तत्त्वमस्यर्थसिद्धान्तभाष्या-दिविंशतिकल्पा संस्कृतवाण्या धर्म-दर्शनग्रन्थाश्च विगतशतकेषूपलब्धमध्य-प्रदेशीयधार्मिक-रचनानां परिचायकाः सन्ति ।

विंशशतकीयदार्शनिकरचनासु टीकानामेवाधिक्यं वर्तते । इन्दोरनिवासि-श्रीपादशास्त्रिहसूरकर-विरचिता मोक्षमन्दिरस्य द्वादशसोपानावलीति मौलिको दर्शनग्रन्थस्तथा वेदान्तपरिभाषाटीका, कुसुमाञ्जलिटीका च; शिवपुरीस्थ-रामगोपालाचार्यकृता (१९३२ ई०) प्रमाणनवतत्त्वावलोकटीका ; लोकनाथ-शास्त्रिणः कारिकावलीटीका, माथुरीपञ्चलक्षणीटीका च; दतियास्थितपीता-म्बरपीठस्वामिनः पञ्चोपनिषद्-शिवसूत्र-भक्तिसूत्र-ताराकर्पूरराजस्तोत्रादीनां संस्कृतभाष्याणि; पाण्डेयगौरीशङ्करस्य मनोरञ्जनी नाम सौन्दर्यलहरीटीका; स्वर्गीयनारायणत्रिपाठिनो मुमुक्षुसर्वस्वसारसंग्रहः, स्वरूपप्रकाशः, चिदम्बर-रहस्यं च, भाऊशास्त्रिणोऽध्यात्मविद्या; रघुनाथविष्णुवेलंकरस्य व्युत्पत्ति-मण्डनमुपदेशमञ्जूषा च; हरिप्रसादद्विवेदिनो गीतार्थबिन्दुः कर्मयोगश्च; रींवातो बदरीप्रपन्नाचार्यस्वामिनो विशिष्टाद्वैतदर्पणं चान्यद् ग्रन्थत्रयं, अव-धशरणस्य सख्यसिन्धुचन्द्रोदयः; विरूपाक्षवडियारस्वामिनः शास्त्रबोधो

लिङ्गाङ्गिधर्मप्रकाशश्च, पन्नालालजैनस्य धर्मकुसुमोद्यानं रत्नत्रयी द्वौ चान्यौ ग्रन्थौ, हिमांशुविजयस्य जैनसप्तपदार्थीत्यादयो मध्यप्रदेशेऽद्यतनेऽपि दर्शनादिगहनविषयेषु संस्कृतानुरागिणां रुचिं प्रमाणयन्ति ।

धाराधीशस्य भोजस्य पूर्तमार्तण्ड-दण्डनीतिव्यवहारसमुच्चय-चारुचर्येति ग्रन्थत्रयस्य ग्रन्थसूच्यां निर्देशो वर्तते । सप्तदशशतके ओरछाराजसभापण्डितस्य मित्रमिश्रस्य वीरमित्रोदयः, रींवायां (१६८० ई०) औपगविकृत मन्त्रकल्पद्रुमः, बान्धवनरेशविश्वनाथसिंहस्य धर्मशास्त्रत्रिंशत्-श्लोकी, इत्येते संक्षेपेण मध्यप्रदेशीया धर्मशास्त्रविषयका ग्रन्थाः सन्ति । जानकीवल्लभव्यासस्य शब्दकल्पद्रुमाख्यायी कृतौ (१८८१) श्राद्धाय निमन्त्रितस्यातिथये भोजनपानादिसत्कारविधानं सविस्तारं निरूपितमस्ति ।

व्याकरणं कोषश्च

धाराधीशभोजस्य नाममालानुशासनं सिद्धान्तसंग्रहश्च आउफ्रेक्ट-ग्रन्थसूच्यामुपलभ्येते । ततो विश्वनाथशास्त्रिणः परिभाषेन्दुटीका, विज्जलदेवस्य विज्जलवाटिका च धारानगरे ऊनविंशशतके विरचिते । १९९४ खिस्तसंवत्सरे गोपीनाथशास्त्रिणा वैयाकरणभूषणसारं प्रणीतम् । भागीरथीप्रसादत्रिपाठिनो बीजवृक्षो बालबोधाय संस्कृतभाषया व्याकरणमस्ति । व्याकरणादिविषयेषु निर्मितानां ग्रन्थानां प्रचलनप्रसाराभावात् बहुशो लोपो वा अज्ञानं वा सम्भाव्यते ।

ज्योतिषम्

धाराधिपभोजो ज्योतिषशास्त्रज्ञ आसीत् । राजमृगाङ्कः, राजमार्तण्डश्चेति ज्योतिषग्रन्थं द्वयं तेन विरचितम् । अन्येऽपि तस्य त्रीणि ज्योतिषग्रन्था आउफ्रेक्टग्रन्थसूच्यां निर्दिष्टाः सन्ति । बान्धवनरेशकर्णदेवेनापि प्रायः १२०० खिस्ताब्दे सारावली नामक ज्योतिषग्रन्थस्य रचना कृता । ब्रह्मगुप्तस्य ब्रह्मस्फुटसिद्धान्तोऽपि १२०० संवत्सरे रचितः । उज्जयिनीयदीनानाथस्य सारसंग्रहः (१८७४ ई०), श्रीपतिभट्टस्य सिद्धान्तशेखरः, ज्योतिषरत्नमाला च, जबलपुरनिवासि लक्ष्मीप्रसादपाठकस्य ज्योतिर्विवेकरत्नाकरः (१६२९), उज्जयिनीस्थ-आपटे-गोविन्दस्य सर्वानन्दकरणं (१९३१) इत्येते मध्यप्रदेशे निर्मिताः केचिद् ज्योतिषग्रन्थाः ।

अन्यशास्त्राणि

धारायां मुञ्जस्य सभाश्रितेन भट्टहलायुधेन व्यवहारमयूखाख्यस्य राजनीतिग्रन्थस्य प्रणयनं कृतम् । आउफ्रेक्ट ग्रन्थसूच्या निर्दिष्टेषु धाराधीशभोजस्य २३ ग्रन्थेषु कल्पतरुः समराङ्गणसूत्रमिति द्वे ग्रन्थे शिल्पशास्त्रविषयके स्त । समराङ्गणसूत्रं बडोदातः प्रकाशितं वर्तते । अस्मिन् ग्रन्थे यन्त्रविधाननामकेऽध्याये जलयान-वायुयान-स्वयंचलितयान जलोद्धरणयन्त्र-यन्त्रचलितशय्या-यन्त्रचलितपुत्तलिकादीनां विधानं वर्णितमस्ति । अद्भुतो रोचकश्चापूर्वोऽयं ग्रन्थः संस्कृतभाषायां महत्त्वपूर्णः प्रतिभाति । युक्तिकल्पतरुग्रन्थे जलयाननिर्माणस्य विवरणं प्रस्तुतमस्ति । भारतीयविज्ञानपरिचायकौ द्वावपि ग्रन्थौ एतौ । पशुचिचिकित्साविषयकः शालिहोत्रनामको ग्रन्थोऽपि भोजराजस्यैवेति निर्दिष्टम् । आयुर्विद्यासम्बन्धि—विश्रान्तविद्याविनोदः, आयुर्वेदसर्वस्वमिति ग्रन्थद्वयं भोजेन प्रणीतम् । विंशशतकेऽपि नारायणदत्तत्रिपाठिना आयुर्वेददर्शनमिति संस्कृतग्रन्थस्य, उज्जयिनीयशंकररामचन्द्रपलसीकरेण निघण्टुरत्नं नामायुर्वेदोऽधीना कोषस्य, मुंगावलीनिवासिना जगदीशप्रसादेन च आयुर्वेदशब्दकोष इति सस्कृतभाषया कोशग्रन्थस्य (१९२३ ई) मध्यप्रदेशे प्रणयनं कृतम् । 'धनुर्विद्या' रींवाधीशविश्वनाथस्य कृतिरस्ति । राजरञ्जनमिति मृगयाविषयकरचना रींवाधीशरघुनाथसिंहस्यैव विंशशतकीया । रींवानरेशवीरभद्रदेवस्य कन्दर्पचूडामणिः, नारायणशास्त्रिणः पञ्चसायकम् इति कामशास्त्रग्रन्थेऽपि मध्यप्रदेशे प्रणीते । तोमरवंशीयग्वालियरनृपमानसिंहस्य (१४८६—१५१६ ई०) मानकुतूहलम्, रागमाला संगीतसारेति संगीतविषयकसंस्कृतग्रन्थत्रयमनुपलब्धमनुवादरूपेणैव ज्ञातम् । पन्नाधीशछत्रसालतनयो हृदयशाहो (१७३६ ई०) हृदयकौतुकम्, उदयप्रकाशनं चेति संस्कृतभाषया संगीतग्रन्थद्वयस्य प्रणेताऽसीत् । बुरहानपुरे पुण्डरीकविट्ठलेन सद्रागचन्द्रोदय-रागमञ्जरी-रागमाला-नृत्यनिर्णयेति ग्रन्थानां रचना कृता । रायगढ़निवासिना चक्रधरसिंहेन नर्तनसर्वस्व, रागरत्नाकरः, तालतोयनिधिश्चेति संगीतनृत्यग्रन्था विरचिताः । भोपालशासकया 'शाहजहां'बेगमाख्यया १८८९ खिस्तसंवत्सरे षड्भाषीयकोषः पण्डितैः कारितो यस्मिन् संस्कृत-तुर्की-अरबी फारसी उर्दू-आङ्ग्लभाषातः पर्यायवाचिशब्दाः संगृहीताः । अस्मिन् प्रेमनारायणशास्त्रिणा संस्कृतपदाना चयनं कृतम् ।

पत्रिकाः

संस्कृतपत्रिकायाः प्रथमोऽवतारो वाराणस्यां १८६६ खिस्ताब्दे जातः । तदनु मध्यप्रदेशेऽपि १८६६ संवत्सर एव ग्वालियरनगरे रघुपतिशास्त्रिणो-

ऽध्यक्षतायां संस्थापितायाः संस्कृतसभायाः काव्यकादम्बिनीति मासिक पत्रिकाऽजनि । अस्यां प्रायः समासपूर्तीनां स्फुटश्लोकानां च प्रकाशन प्रा र्तत । अस्याः पत्रिकाया अवसानानन्तरं १९०० ई० वर्षतो विद्वत्कला पत्रिकाऽनया सभया प्रकाशिता । एषाऽपि पत्रिकाऽचिरमेवास्तं गता । अभि नवयुगे निम्नलिखितपत्रिका मध्यप्रदेशे प्रकाशिताः ।

(१) **मालवमयूरः**— मन्दसोरनगरे रुद्रदेवत्रिपाठिना सम्पादितः कथा-कविता-नाटक-निबन्धादीनां क्वचिच्च लघुग्रन्थानां प्रकाशनेन नवोदितलेख-कानपि प्रोत्साहयति ।

(२) **सागरिका**—१९६२ ख्रिस्तवर्षे सागरविश्वविद्यालये त्रैमासिकीय-मनुसन्धानपत्रिका प्रो. रामजी उपाध्यायेन सम्पादिता साम्प्रतमेकादशवर्षे पद न्यिाहतवती । अखिलभारतीयविदुषामुच्चैःस्तरीयाः शोधलेखा एवास्या प्रकाश्यन्ते । साहित्यिक-दार्शनिक-वैज्ञानिक शास्त्रीय विषयाणां तथैवार्वाचीन-संस्कृतसाहित्यस्य परिचायका लेखा अन्यान्यप्रान्तीयविद्वद्भिः शोधछात्रैश्च प्रणाता. सागरिकां परिपोषयन्ति । अत्रापि मध्यप्रदेशीयलेखकानां प्रशंसनीयं योगदानं वर्तते । लेखानामतिरिक्तं सागरिकायां काले-काले ग्रन्था अपि प्रकाशिताः । यथा—डॉ. रामजी उपाध्याय विरचितो 'भारतस्य सांस्कृतिक-निदोनूतना परिवर्धितावृत्तिः', डॉ. रेवाप्रसाद द्विवेदिप्रणीतं 'सीताचरितं' महाकाव्यं तेनैव च सम्पादितो रसार्णवसुधाकरः, पुल्लेलु रामचन्द्रस्य 'सुसंहत-भारतम् नाटकं, डॉ. श्रीमती वनमालाभवालकरविरचितः 'पाददण्ड एकाङ्कः, यादवेश्वरतर्करत्नस्य काव्यं 'अश्रुविसर्जनम्', डॉ. फतेहसिंहस्य व्याख्यानानि 'सिन्धु सभ्यता', परिसंवादे प्रस्तुतानां लेखानां संकलनम्—'आधुनिकसंस्कृतसाहित्यानुशीलनम्' इति । सागरिका विकासेन प्रचारेण च मध्यप्रदेशीयसंस्कृतवाङ्मयपरिवर्धने विशिष्यते ।

(३) **मेधा**—रायपुरसंस्कृतमहाविद्यालयतः प्रकाशिता ।

इत्थं संगीयमानावदानस्य कविललामभूतस्य कालिदासस्य शाश्वतनेतृत्व समानीकृत्य मध्यप्रदेशे साहित्यकारा नित्यमेव भारत-भारती प्रणयनपरा आसन् सन्ति भविष्यन्ति च ।

—×—

आचार्य-रामचन्द्रशुक्लानां रस-विमर्श-विवेकः

डॉ० बच्चूलालः अवस्थी

आचार्याः श्रीरामचन्द्र-शुक्ल-पादा हिन्दी-समीक्षा-प्रवर्तकत्वेन समादर-भाजः । अनन्य-परतन्त्रैस्तेषां विचारैस्तत्कालादारभ्य हिन्दी-जगदद्यापि प्रपूरितम् । यद्यपि तैर्न कोऽपि काव्य-शास्त्र-ग्रन्थः प्राणीयत, तथापि स्फुटैर्लेखैः, रसमीमांसाख्य-लेख-संग्रहेण, तदन्ते साहित्यदर्पणात् संकलिताभिष्टिप्पणीभिश्च तन्मतं पौस्फुरीति तद्वैदुषीसीमा च प्रचाकाशीति । तस्मै समर्पित-यथार्ह-प्रश्रयेणापि तच्छेमुषी-वशंवदेनापि मया यत्किञ्चिदिह समीक्ष्यते तद्विचारनिकाय इति तदात्मानं क्षमां प्रार्थये ।

१. भावालम्बनमधिकृत्याचार्यचरणा आहुः-(रसमीमांसा—पृ० १६—२०)

'यद् वस्तु अस्माकं कमपि भावं जनयेत् तद् (वस्तु) तस्य भावस्यालम्बनं कथ्यते । ईदृशानि रसात्मकानि वस्तूनि (तथ्य), पूर्वं ज्ञानेन्द्रियैरुपस्थाप्यन्ते, अनन्तरं च ज्ञानेन्द्रियोपस्थापितसामग्रातो भावना कल्पना वा तन्नियोजनं विदधाति ।' इति । अत्र विचार्यते :

आलम्बनविभावो भावमुत्पादयतीति केवलं भट्टलोल्लटमतेन संगच्छमानमपि न युक्तिमभिस्थातुमलम् । न हि जन्यमानो भावः सहृदयानां भाववासना भवति, न वा तदुपस्थापनं ज्ञानेन्द्रियैर्बहुभिः क्रियते, प्रत्युत मनसैव, सा च मानसी वस्तूपास्थतिर्भावनाकृतैवेति निर्विवाद किन्तु भावनायां विभावादिभिरनुमाप्यन्ते वा भाव्यन्ते वाथ व्यज्यन्ते वा भावाः भट्टशङ्कुक-भट्टनायक-ध्वनिकारमतैर्यथायथ, नोत्पाद्यन्ते । उत्पत्तिश्च भावस्यानुकार्ये भवति, न जातु सहृदये । अपि च ज्ञानेन्द्रियैरिति किमभिप्रैति ? बाह्यकरणानि वा मनो वा ? नाद्यः । चक्षुरादीनि न विभावानुपस्थापयन्ति, बौद्धो हि प्रत्ययो येयं विभावाद्युपस्थितिः । यथोक्तं हरिणा —

"शब्दोपहितरूपांस्तान् बुद्धेर्विषयतां गतान् ।
प्रत्यक्षमिव कंसादीन् साधनत्वेन मन्यते ॥" इति॥

प्रत्यक्षोऽप्यत्र मानस एव । द्वितीये च ज्ञानेन्द्रियैरिति बहुत्वं निरर्थकम् । किं च, यत्र भाव एव भावान्तरस्य विभावो भवति तत्र मनोऽन्तरेण कान्येषां ज्ञानेन्द्रियाणां गतिः ? न हि स्थूला एव पदार्था विभावतां भजन्ते, किन्तु सूक्ष्मा अपि । तथा चाहुस्ते स्वयमेव (रसमीमांसा—पृ० ३१) :

"कविता न केवलं रूपच्छटामाविष्करोति, प्रत्युत (?) कर्मणो मनोवृत्तेश्च सौन्दर्यस्य मार्मिकानि दृश्यानि प्रत्यक्षयति ।" इति ।

२. आचार्य शुक्लैः कल्पित-रूप-विधानमेव काव्यघटकं मतम् । परन्तु कल्पितैरिव प्रत्यक्षैरपि स्मृतैरपि रूपै रसनिष्पत्तिस्तैः साध्यते । 'रसात्मकबोधस्य विविधानि रूपाणि' इति लेखे तैस्तथा प्रमाणीकृतम् । अत्र पृच्छ्यते— "रसो वै सः । रसं ह्येवायं लब्ध्वानन्दीभवति ।" इति जगत्कारणभूतरसपरा वा वाचो युक्तिः परिमितलोकसुख संभार-संवित्तिप्रवणा वा ? आद्ये दु:ख संविदपि परमानन्द हेतुकी-स्यात् । द्वितीये यत्र सुखातिरेको लोके तत्र रसदशापरिकल्पने मानाभावः । उभयथापि लक्षणीयस्य रसस्य लक्ष्यतावच्छेदकनिर्णयो न संभवति । अथ साधारणीकृतो भावो रसत्वेनाभिमतो वः स्यात् तर्हि केयं साधारणीकृतिर्या लोकेऽपि रसनिष्पत्तिमाविष्कुरुते ? भावकारणाना विश्वजनीनता वा चैतन्यस्य निर्वैयक्तिकता वा तदुभयं वा ? नाद्यः । जुगुप्सादेः कारणानां विष्ठाप्रभृतीनामपि लोके बीभत्सरस-विभावीभावापत्तेः । न द्वितीयः । परिमित-प्रमातृ-भाव-परिमोप एव नैकाकी रस-प्रयोजकः, अपितु कारण-कार्य-सहकारिभावानां साधारणीभाव एव तथा । यथा चाहुः 'एतेभ्यः सामान्यगुणयोगेन रसा निष्पद्यन्ते ।' इति । नापि तृतीयः । न हि लौकिकानि वस्तूनि सर्वत्र सुखायन्ते । क्रोध-शोकादि-स्थलेषु तथानुपपत्तेः । काव्यानन्दस्य लक्षणीयताविरहापत्तेश्च । काञ्चित् सुन्दरीं सर्वलोक-मनोरमां पश्यतो नाम यो भावोद्रेकः स एव न जातु रस-पदवीं भजते । न वा कंचनशोकपरीतं दृष्ट्वा 'सहानुभूतिं' भजतो रसात्मको बोधो जायते; सहानुभूतेः समानुभूतेश्च (from sympathy and empathy) व्यतिरिक्तत्वाद् रसानुभूतेरित्यवोचाम परत्र ।

अपि च शुक्लपादा दुःखात्मकभावेभ्यः आनन्दबोधं प्रति शङ्कन्ते इति तेषां मन्तव्यं दिनमिव स्पष्टं जागर्ति, यत्र व्यावहारिकं सुखं व्यतिरिच्य नास्ति कश्चित् परमानन्दात्मको लोकोत्तरो रस-प्रत्यय इति । आचार्यशुक्ला यदा रस भाव-मुक्ति-दशां मन्वते तदा लौकिकयोः सुखदुःखयोरेव क्रोडे पातः किमर्थ इति त एव विदुः ।

३. अन्यच्च "करुण नाट्येषु वस्तुतो दुःखस्यैवानुभवः । हृदयस्य मुक्तदशोपलब्धेः तद् दुःखमपि रसात्मकं संजायते ।" इत्याहुः शुक्लचरणाः (काव्य में रहस्यवाद) । तदपि न विवेकपदवीमवतरति । दुःखानुभव–रसयोरेकत्र भावे कथं समञ्जसो व्यपदेशः ? केयं वा हृदयमुक्तिर्यत्र दुःखाद् न मोक्षः ? इदमप्यत्रावधेयम् । रसप्रत्ययक्षणे न केवलं लौकिकाद् दुःखादेव, अपितु तादृशात् सुखादपि मुक्तिरेव सम्पद्यते, अन्यथा शृङ्गारकाव्येषु लौकिकमिन्द्रि-

यस्य दनमेव लभ्यत लौकिक बोध विरेचनमव मुक्ति स च रसस्य प्रथमाऽनुबन्धः। फ्रायडप्रभृतीनां मनोविदामपि मतेन कलात्मको बोधः सर्व-प्रयोजन-मौलिभूत इत्यलं प्रपञ्चेन।

४. व्यञ्जनाशक्तिवादस्तावच्छुक्लपादानां बहुमतः। तत्रापि तैर्मौलिकता-मौलि-माला ग्रथिता। तथा हि—

"व्यञ्जितैर्भावैः सह पाठकानां सहानुभूतिः साधारणीकरणं वा रसस्य पूर्णानुभूतावपरिहार्यम्" इति। (चिन्तामणिः—भागः १—संस्करणम् १९०७ पृ० १७३) अत्र विचार्यते—आचार्य-शुक्लाना मते भावाः क्वचिदन्यत्र व्यज्यन्ते, न सहृदये। अन्यत्र व्यञ्जितानां भावानां सहानुभूतिरेव भवति पाठकस्य सहृदयस्यैव वासनात्मको भावो रसरूपेण व्यज्यत इति ध्वनिमत-स्योपरि कुठारपात एव कृतो भवतीति स्पष्टमेव प्रतिभाति। किमीयो भावो व्यज्यते, येन सहृदयस्य 'सहानुभूतिः' संभवति? शुक्लचरणानां मतेन स आश्रयस्य (अनुकार्यस्य) भावो भवितुमर्हति। न हि आश्रय-भावो व्यज्यते, प्रत्युत, कारणेन जन्यते, कार्यैरनुमीयते, सहकारिभावैश्च विशदीक्रियते। आभव्यक्तिस्तावत् सहृयस्यैव वासनाया भवतीति राद्धान्तः, किन्तु शुक्लपादा अन्यथैव व्यतिषङ्ग-पराःप्रतीयन्ते।

अथ केयं सहानुभूतिः। सहशब्द : समानकालिकता परो वा तादात्म्य-परो वा स्यात्? नाद्यः। युगान्तर-सतां रामादीनां सहृदयैः सह यौगपद्य न घटते; कल्पितपात्राणां समानकालिकता तावदसंभाव्यैव। नापि द्वितीयः। न हि विभावादीन् शब्दमात्र-संदृब्धान् व्यतिरिच्य काव्ये कस्यापि सत्ता येन तादात्म्यापत्तिर्भवेत्। अनुकार्यानुकार्ययोः-नटाश्रययोः-तदावेशतापत्तिरेव तादा-त्म्यम्। सा च रसिकानुकारकयोरपि संघटत एव, किन्तु कथमुभय-भाव-तादात्म्यं घटेत, यदा नैवास्ति नटे कापि भाव-सत्ता। इदमेवाघटमान तादात्म्यं शुक्लैः साधारणीकरणमिति व्यपदिश्यते इत्यहो अघटित-घटना-पटीयस्त्वम्। तथा चोक्तं तैः—

"पाठकानां श्रोतॄणां वा मनसि यो व्यक्तिविशेषो वस्तुविशेषो वा समुदेति, स यथा वर्णितस्याश्रयस्य भावं प्रति आलम्बनं भवति, तथैव सर्वेषां सहृदयाना पाठकाना श्रोतॄणा वा भावस्यालम्बनतां भजति, इति साधारणीकरण-स्याभिप्रायः।" (चिन्ता० पृ० १८५)

अत्र पश्यामः। शुक्लमते आश्रय-सहृदययोर्यथा तादात्म्यं तथा तदालम्ब-नयोरपीति तदेव साधारण्यम्। अतएवाहुः—

"यदि कस्यापि पाठकस्य श्रोतुर्वा काञ्चित् सुन्दरीं प्रति प्रेमा, तर्हि शृङ्गाररसस्य स्फुटोक्तीः श्रोतुं समये क्षणे-क्षणे आलम्बनत्वेन तत्प्रेयस्या एव मूर्तिः कल्पनायामुदेष्यति यदि नास्ति तथा प्रेमा तदा सुन्दर्याः कापि कल्पितैव प्रतिमा समेष्यति ।" इति । (पृ० १८५)

एतदविचाररमणीयम् । पुरुषा एव रसास्वादाधिकारभाजः कच्चित् ? अथ स्वीक्रियेत—स्त्रियोऽपि स्व-स्व-प्रेमालम्बनीभूत-पुरुष-प्रतिमाः कल्पयन्तीति ततोऽपि न निस्तारः । पुरुषस्याश्रयत्वे स्त्रिया आलम्बनत्वे स्त्रीणाम्, स्त्रिया आश्रयत्वे पुरुषस्यालम्बनत्वे पुरुषाणां वा कथंकारं रसो निष्पद्येत ?

न हि स्त्रियः पुरुषैः पुरुषाश्च स्त्रीभिः सह तादात्म्यं लब्धुमलम् । महती च विडम्बना स्यात् यदि आलम्बनीभूतया स्त्रिया सह सहृदया कापि तादात्म्यं लभेत, स्वं च यं कमपि काव्य-निबद्धं पुरुषं प्रति प्रेयसीत्वाय कल्पेत । न हि शुक्लपादाः आश्रयालम्बनयोर्व्यक्तिता-हानि सहन्ते । सहृदया स्त्री शकुन्तलाभावं भजन्ती दुष्यन्तप्रियां एवं मन्वाना शुक्लमते स्यात् ।

५. शुक्लमते भाव-व्यञ्जना तावत् आश्रये भवति न रसिके—तथा च तैरनेकत्रोक्तम्—

'आश्रयस्य यां भाव—व्यञ्जनां श्रोतुः पाठकस्य वा हृदयं न किञ्चिदङ्गीकरिष्यति, तस्या ग्रहणं शीलवैचित्र्य-रूपेणैव भविष्यति ।'

(पृ० १८७) इति ।

'पात्रस्य भवा-व्यञ्जनया सह श्रोतुर्दर्शकस्य वा पूर्णा सहानुभूतिर्भविष्यति ।' (पृ० १८७) इति च ।

इत्थं च व्यञ्जनानुमानयोरैक्यमेव स्थापितं भवति, न्यायमतं च समर्थितं भवति । इयं चापरा हानिर्यत् शुक्लपादा नैयायिकानां साहित्यसमीक्षायां पदनिक्षेपमपि न सहन्ते—

'साहित्यशास्त्रे नैयायिकानां मतस्य यथावद् ग्रहणेन काव्य-स्वरूप-निर्णये बाधा जाता । तदुदाहरणं च शक्तिग्रह-प्रसङ्गो यत्र संकेतग्रहो व्यक्तौ न मतः किन्तु जातौ मतः ।' (पृ० १८९) इत्याहुस्त एव ।

अहो स्वमताग्रह-विजृम्भितम् । न हि नैयायिका जातौ संकेतग्रहं स्वीकुर्वन्ति, अपितु जातिविशिष्टव्यक्तौ तं मन्वते । भाट्ट-मीमांसकास्तावज्जाति-संकेत-वादिनः इति सर्वविदितम् । अपि च तेऽचकथन्—

'काव्ये भाषायाः प्रत्यक्षीकरण पक्ष एव धुरि तिष्ठति। तत्र शब्दद्वारेण सूचितस्य वस्तुनो बिम्ब-ग्रहणं भवति। अर्थात् तन्मूर्तिः कल्पनायामुज्जृम्भते।' इति।

अत्र प्रष्टव्यम्—कस्या व्यक्तेरियं मूर्तिः? सर्वे सहृदया एकामेव मूर्तिं कल्पयन्ति, पृथग् वा? असम्भवः प्रथमः पक्षः। न हि काव्यं कामपि स्पष्टामाकृतिमर्पयति। द्वितीये पक्षे व्यक्ति-बिम्ब-स्थापना खण्डिता भवति। न हि काव्यं व्यक्तिबिम्बमुपस्थापितं दृश्यते। सर्वे सहृदया यदा स्व-स्व-प्रेयसी-मूर्तिमेव कल्पयन्ति तदा काव्योपस्थापिता व्यक्तिमूर्तिः कथमागृह्यते। अस्पष्टेव कापि गुण—धर्म—रेखासु चित्रिता प्रतिमा काव्येनार्प्यते, इति शुक्लपादैरपि स्वीकर्तव्यमापतति।

भट्टनायकादिभिर्नेयं साधारणीकरण—सरणिः स्वीकृतेति वृथैव पूर्वाचार्याणां नामग्रहः।

६. बीजभाव—स्थापना शुक्लचरणानां नूतनः प्रयासः। तन्मतेन बीजभावोऽन्तःसंज्ञा-स्थित कोऽपि भावो यो घटनाचक्रं विविध—भाव—स्फुरणं च प्रेरयति। अयं च स्थायिभावादङ्गिभावाच्च भिन्न एव। यस्मिन् पात्रेऽस्य भावस्य प्रतिष्ठा भवति, तद्गतानां सर्वभावानां (कोमलानां कठोराणां च) तथा ग्रहणं भवति यथा सहृदयानां तैः सहानुभूतिर्जायते। त एव भावा रसत्वेनानुभूयन्ते येऽनेन बीजभावेनोपस्थाप्यन्ते।

(चिन्तामणि—पृ० १७८)

अत्र भरतो रामचरितमानसीय उदाहरणम्। अन्यायं प्रति क्रोधो भरतस्थो बीजभावः। तं च बीजभावमाश्रित्य भरतो यदा मातरं कैकेयीं भर्त्सयति तदापि सहृदयानां सहानुभूतिरक्षुण्णा जागर्ति। अत्र विचारणीयम्। काव्याद् बहिः का भरतस्य सत्ता, यत्र बीजभावः स्यात् भावस्फुरणं च सहृदयेषु विदध्यात्? न हि रसिकमतिरिच्य कापि वास्तवी सत्ता यत्र कस्यापि भावस्योपस्थितिः प्रमीयेत। वस्तुतः सहृदय—हृदये विद्यमानामन्यायं प्रति क्रोधवासनामेव बीजभावपदेन वक्तुं सभावयामः। प्रत्युदाहरणमपि हि सुलभम्—गान्धिमहोदयः शत्रवेऽपि नैवाक्रुध्यत् किन्तु तत्पक्षपातिनस्तावदक्रुध्यन्नेव। अन्यायं प्रति क्रोधवासनाऽस्मासु तिष्ठति, न गान्धिनि, इति बीजभाव—परिकल्पनेव भज्यते।

७. हास्यरसे नाश्रयः प्रायेण निबध्यते। तत्र सहृदय एवाश्रयपदवीं भजति, तत्रैव च बीजभावस्योपस्थितिर्मान्या भवतीति हासभावनां वासनारूपां विना बीजभावो नास्ति कश्चित्। सा च सहृदय—हृदये तिष्ठति। तथा चाहुस्त

एव 'हास्येऽप्येवं घटते। यावत् तत्पात्रं सम्मुखीनं भवति तावत् मनुष्यः सकलं सुखं दुःखं च विस्मृत्य विलक्षणं कमपि आह्लादमनुभवति।'

(चिन्तामणि- पृ० २०१) इति।

अत्र 'पात्र' पदेन क उच्यते? आश्रय आलम्बनं वा? हास्ये प्रायेणाश्रयो नोपनिबध्यते इति प्रथमः पक्षो दूरापास्तः। द्वितीये पक्षे स्वीकृते आश्रयस्य भावव्यञ्जकता शिरोऽधिरोहति। यदा तत्र ह्लादे सुखदुःखे उभे अपि विस्मृते जायेते तदा करुणादौ कोयं दुःख–स्मरणाग्रहः? यदा हास्ये विभावस्य भावव्यञ्जकता मता तर्हि शृङ्गारेऽपि तस्यैव मान्येति समूलघातं हता शुक्लचरणानामुपस्थापना।

८. 'आलम्बनत्व–धर्मस्य–साधारणीकरणं भवति' इति शुक्लपादानां कश्चिदुपन्यासः। किमिदमालम्बनत्वम्? आलम्बनकारणतावच्छेदको वा आलम्बनविभावतावच्छेदको वा धर्मः? दुष्यन्तं प्रति हि शकुन्तलालम्बन-कारणम्, सहृदयं प्रति चालम्बनविभावः। कारणातावच्छेदकं शकुन्तलात्वं दुष्यन्त–प्रियात्व–समानाधिकरणम्। विभावतावच्छेदकं तावत् स्त्रीत्वसामा-न्यमेव, न शकुन्तलात्वम्, इत्येव प्राचां मतिः। स्त्रीत्वसामान्यं हि शकुन्तला-त्वस्य साधारणीकृतो धर्मः। एतच्चासहमानाः शुक्लपादा आहुः—

'यं व्यक्तिविशेषं प्रति कस्यचिद् भावस्य व्यञ्जनां कविः पात्रं वा करोति, स व्यक्तिविशेष एव पाठकस्य श्रोतुर्वा कल्पनायामुपतिष्ठते' इति।

विषम उपन्यासः। व्यक्तिविशेषः कथमिवोपस्थातुं शक्नोति? न हि गुणान् धर्मान् वोपनिबद्धान् विहाय कापि व्यक्तिमूर्तिः काव्ये चित्र्यते। अतएवाहुर्भरताः—

'एतेभ्यश्च सामान्यगुणयोगेन रसा निष्पद्यन्ते।' इति। सहस्रशः सहृदयेषु नाम कथं व्यक्तिहृदयं लप्स्यते? अकस्माद् 'गौः' इत्युदीरिते नैक एव गौर्व्यक्तिः सर्वेषां बुद्धौ समायाति। नास्ति काव्य–वर्णिता व्यक्तिः सहृदयानां परिचितपूर्वेति तथा संभवेत्।

९. 'विभावादयः सामान्येन प्रतीयन्त इत्यस्यैतदेव तात्पर्यं यद् रस-मग्नानां पाठकानां मनसि ममेदं परस्य वेति भेदभावो नावशिष्यते। कञ्चित् कालं पाठकस्य श्रोतुर्वा हृदयं लोक–सामान्य–हृदयतां समश्नुते।' इत्याचार्य-चरणानां प्रस्तावोऽपि अविचार–रमणीय एव। न हि ममत्व–परकीयत्व–निरासात् पूर्वं रसमग्नता घटते। अपि च, किं नाम लोकसामान्य-हृदयत्वम्? समूह मानसत्वं वा निर्वैयक्तिक-चैतन्यं वा? नोभयथापि तादात्म्य–पर्यायस्य

साधारणीकरणस्य शुक्लसंमतस्यावकाशः। तादात्म्यं हि पृथग्-द्रव्ययोरेव घटते। एकत्वं गतस्य सतः का वार्ता तादात्म्यस्य ?

१०. 'पात्रस्थस्यैव भावस्य प्रतीतिः श्रोतुः पाठकस्य वा रसरूपेण जायते। अतः वै प्रतीतिकाल एव साहित्य-दर्पण-कारेण रसस्य सत्ता मता, पूर्वं वा पश्चाद्वा न-न तु दीपेन घट इव पूर्व-सिद्धो व्यज्यते।'(रसमीमांसा-पृ० १६३)

इति ब्रुवाणैराचार्यपादैः साहित्यदर्पणकारा अपि कर्दमक्षिप्ताः कृताः। पात्रस्थस्येति कोऽर्थः ? अनुकार्यस्थो वानुकारकस्थो वा भावः प्रतीयते ? आद्ये भट्टलोल्लटमतस्य पुनरुज्जीवनम्। द्वितीयेऽनुमानवाद एव शरणम्। नोभयथापि दर्पणकृतां किमपि सामञ्जस्यम्। अथ पात्रस्थो रसिक-प्रतीतिमवतीर्ण एव रसनाम भजतीत्यभिप्रेतम्। तदापि प्रतीतिरनुमितिरिति पर्यायौ, न हि तथाभूतायाः प्रतीतेर्व्यञ्जनायाश्च कोऽपि सम्बन्धः। दर्पणकाराणां तावदेष आशयः—

'रसिकस्थो वासनात्मको भावो यावत्क्षणो प्रतीयते (व्यज्यते) तावदेव रसत्वं भजति स भावे इति चर्वणैकप्राणत्वाद् रसस्य। चर्वणायाः पूर्वं च पश्चाच्चाव्यक्तो भाव आस्तां, किन्तु रस्यमानताया अभावान्न तत्र रसत्वव्यपदेशः। यथा पयो दधिरूपेण परिणमति द्रव्यान्तरयोगवशात्; तथैव विभावादिसंयोगाद् वासनारूप-भावस्य रसरूपेण परिणतिरिति तात्पर्यम्।

११. भावकोशानां मत-स्थापना शुक्लपादानां नवीन उपक्रमः। यथा चाहुस्ते—

"रतिस्तावत्। प्रियस्य साक्षात्कृत हर्षः, वियुक्तौ विषादः, तद्विपत्तिग्रासे विरहशङ्का, तस्य दुःखदातारं प्रति क्रोधः—एवंभूतानामनेकेषां भावानां स्फुरणं रति-प्रणाल्यां स्थिरायां जायते। एतान् भावानतिरिच्य नैव रतेः काचित् स्वतन्त्रा सत्ता, न च किमपि स्वरूपम्" इति। हंहो। यदि कथितसहकारिभावान् विहाय रतेः सत्तैव नास्ति तर्हि किङ्कृता प्रियता ? हर्षादयोऽपि कस्माज्जायन्ते ? रति-प्रणाल्यां स्थिरायामेव ते ते सहकारिणो भावाः स्फुरन्तीति वदतोव्याघातः। पूर्वं हि रतेः स्थिरत्वम्, अनन्तरं च तत्तद्भाव-स्फुरणमिति भवतामेवोक्तिः, इति रतेः सत्ता प्रमाणिता तिष्ठति। किं च—'यो रतिरिति स्थायि उच्यते स नास्ति कश्चिदेको भावः परन्तु तन्मूलं कश्चिद् भावोऽवश्यं तिष्ठति यस्य स्थायिदशां रतिरिति प्रीतिरिति वा वदन्ति' इत्युक्तौ संगतिर्मृग्यैव। नास्ति भाव इत्युक्त्वा भावोऽवश्यं तिष्ठतीति कोऽयमुपक्रमः ?

उक्तदिशा रामचन्द्रशुक्लानां रसविषयकं मतं दिङ्मात्रेण विविक्तम्। विद्वद्भिः पुनरपि अनुशीलनेन सन्देहनिरासः कार्यः।

—:०:—

वाल्मीकेर्गोत्रं स्वभावः समयश्च

डॉ० पुरुषोत्तम लाल भार्गवः

वैदिकसाहित्ये या संस्कृता वाक् प्रयुक्ता सैव यदा वैदिकयुगस्य समाप्तौ भाषाविकासस्य नैसर्गिकनियमेन परिवर्तनं प्राप्ता तदा लौकिकसंस्कृत-भाषेत्यभ्यधीयत। लौकिकसंस्कृतभाषाया आदिकविर्वाल्मीकिरासीत्।

गोत्रम्

सर्वेष्वेव प्राचीनग्रन्थेषु येषु वाल्मीकेरुल्लेखो विद्यते स भृगुवंशोद्भवो ब्राह्मणः कथितः। स्वयं रामायणे (७, ९४, २६) एतद् लिखितं वर्तते—

संनिबद्धं हि श्लोकानां चतुर्विंशत्सहस्रकम्।
उपाख्यानशतं चैव भार्गवेण तपस्विना॥

महाभारते (१२, ५७, ४०) वाल्मीकेरुल्लेख एवंप्रकारेण कृतः—

श्लोकश्चायं पुरागीतो भार्गवेण महात्मना।
आख्याते रामचरिते नृपतिं प्रति भारत॥

प्राचीने मत्स्यपुराणे (१२, ५१) तदनुगामिनि पद्मपुराणे च (५, ८, ११५) रामचरितस्य प्रसंगे वाल्मीके प्रशंसायामिदं कथितम्—

वाल्मीकिस्तस्य चरितं चक्रे भार्गवसत्तमः।

अश्वघोषसदृशः प्राचीनकविरपि स्वरचिते बुद्धचरिते 'कृतानि पुत्रैर-कृतानि पूर्वैः' इति स्वकथनं साधयितुं यान्यनेकान्युदाहरणानि दत्तवान् तेष्वेकमिदम्—

वाल्मीकिनादश्च ससर्ज पद्यजं ग्रन्थयन्नच्यवनोमहर्षिः।

अनेनोदाहरणेनेदं स्पष्टं यदश्वघोषोऽपि वाल्मीकिं भार्गवस्य च्यवनस्य वंशजममन्यत।

वस्तुतः बौधायनश्रौतसूत्रस्य प्रवराध्याये भृगुवंशस्य वत्सपक्षे यानि गोत्राणि परिगणितानि तेष्वेकस्य नाम वाल्मीकिः। अतो नात्र संशयस्य लेशोपि विद्यते यद्वाल्मीकिर्भृगुवंशे समुत्पन्न आसीत्।

स्वभावः

इदं महद् दुर्भाग्यं यत् केषुचित् परवर्तिषु ग्रन्थेष्वेका कपोलकल्पिता कथोपलभ्यते यस्यामेतत्प्रतिपादितं यद्वाल्मीकिः स्वयौवनकाले जनाना

लुण्ठको मारकश्च दस्युरासीत् पश्चाद् रामनाम्नो जपं कृत्वा ऋषिरभवत्। एषु ग्रन्थेषु स्कन्दपुराणमध्यात्मरामायणं चोल्लेखनीयौ । एतावुभावपि ग्रन्थौ रामायणमहाभारतमत्स्यपुराणेभ्यो नितरां परतरौ । अतो रामायणादीनां साक्ष्यस्य विरोधि एतयोः साक्ष्यं न कदापि स्वीकरणीयम्। अधुना रामायणाद् एतयोः साक्ष्यस्य विरोधित्वं प्रदर्श्यते ।

रामायणे वाल्मीकेः स्वभाव एतावान् कोमलः प्रतिपादितो यद् निषादबाणेन स्वभर्तुर्वधं वीक्ष्य शोकाभिभूतायाः क्रौञ्च्याश्चीत्कारं श्रुत्वैव स करुणया विह्वलो जातः सहसाचेदं वचनमब्रवीत्—

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥

को हि धीमान् इदं विश्वसितुं शक्नोति यदेक एव मनुष्य एकदा निःशङ्कं नराणां वधं करोत्यन्यदा चैकस्य तुच्छपक्षिण एव वधान्न केवलं द्रवीभवत्यपि तु घातकाय शापमपि ददाति ।

इदमपि सुष्ठु विचारणीयं यदृषो वाल्मीकिः स्वरचितेषु रामायणस्य मूलपञ्चकाण्डेषु रामं सर्वत्रैकं महापुरुषमेव मन्यते स एव कथं तमीश्वरं मत्वा तस्य नाम्नो जपं कर्तुं शक्नोति । एतेनेदं स्पष्टं यत् स्कन्दपुराणाध्यात्मरामायणयोः वृत्तं प्राचीनग्रन्थेषूपलभ्यमानाद् वृत्ताद् नितरां विपरीतं त्याज्यं च ।

समयः

वाल्मीकिः कदा जात इत्यपि विचारणीयम् । भाषायाः साक्ष्यमिदं पूर्णतया स्पष्टं करोति यद् वाल्मीकी रामस्य समकालीनो नासीत्। रामो वैदिकयुगे जातो नात्र संशयः । ऋग्वेदस्य दशममण्डलस्य त्रिनवतितमे सूक्ते अनेकनृपाणां नामसु रामस्य नामापि विद्यते । वैदिककाले या संस्कृता भाषासीत् तस्या एव क्रमशो विकसितं रूपं लौकिकसंस्कृतमभवत् । लौकिकसंस्कृतभाषाया आदिकविर्वैदिककाले जातस्य रामस्य समकालीनो भवितु कथमपि न शक्नोति। वस्तुतो रामस्य कथा राजवृत्तान्तानां रक्षितृभिः सूतैश्चिरकालपर्यन्तं रक्षिता । सूतेभ्य इमां कथां संगृह्य वाल्मीकिः स्वकाव्यं रचितवान् । लौकिकसंस्कृतस्य प्रादुर्भावः खीष्टात् षट् शतानि वर्षाणि पूर्वमभवत् । यतो वाल्मीकिर्लौकिकसंस्कृतभाषाया आदिकविस्तस्मात्तस्याप्ययमेव समयः प्रतिभाति ।

वाल्मीकिना रचितं रामायणं पश्चात् कुशीलवनाम्ना प्रसिद्धैश्चरित्रगायकै-रनेकशः गीत्वा लोकप्रियं कृतम्। किन्त्वियं लोकप्रियता गुणापेक्षिण्यासीत्। अनेनैव कारणेनाद्यापि रामायणस्य लोकप्रियताऽनपाया विद्यते। रामायण-मधिकृत्य सत्यमेवोक्तम्—

यावत्स्थास्यन्ति गिरयः सरितश्च महीतले।
तावद्रामायणकथा लोकेषु प्रचरिष्यति॥

अनेन महाकाव्येन न केवलं भारतनिवासिनोऽपित्वेशियामहाद्वीपस्य दक्षिणपूर्वस्यां दिशि स्थितानां देशानां निवासिनोऽपि प्रेरणां प्राप्तवन्तः। ईदृशस्य प्रेरणादायकस्य महाकाव्यस्य रचयिता वाल्मीकिः परमार्थतः संस्कृत-भाषाया भारतवर्षस्य च गौरववर्धकोऽस्ति। अद्यापि स विश्वस्य महाकवीनां मध्ये नक्षत्राणां मध्ये चन्द्रमा इव प्रकाशते।

—(०)—

भगवतो बुद्धस्य चत्वारि आर्यसत्यानि

कु० विमला कर्नाटकः

भारतीयद्वादशदर्शनेषु यानि वैदिकेतरषड्दर्शनानि तत्र ताथागतदर्शनस्य स्थानं महत्त्वपूर्णमिति जेगीयते। तत्र कारणमिदमेव यत् तस्य दर्शनस्य साहित्यं विशालं, अनुयायिनोऽनल्पास्तथा तत्त्वचिन्तनं विश्लेषणकारिदृष्टिपथमायाति।

मानवानां कल्याणार्थं बहुकालं यावत् तलस्पर्शिगभीरपारदर्शि च चिन्तनं विधाय भगवता बुद्धेन इमानि चत्वारि आर्यसत्यानि निरूपितानि। येषां यथार्थज्ञानाद् विना बौद्धदर्शनस्य यथावदवबोधो न भवितुमर्हतीति कृत्वा तन्निरूपणं स्वल्पैरेवाक्षरैरत्र क्रियते।

'आर्यसत्य'शब्दश्रवणेन कोऽर्थो मतिमारोहतीति जिज्ञासायां 'उत्कृष्टं सत्यं' 'महापुरुषाणां सत्यं' चेत्यर्थ एव समुपस्थितो भवति। 'आर्यसत्यस्य' ज्ञानादृते मानवः संसारस्य निर्वाणस्य वा स्वरूपमवगन्तुं न शक्नोति। मानवजीवने यस्य ज्ञानं नितान्तमावश्यकं तदेव 'आर्यसत्यं' नाम।

जैनदर्शने तद्दर्शनविदामभिमतेषु सप्तसु तत्त्वेषु श्रद्धान-ज्ञानयोर्यत् प्रयोजनमभिमन्यते तदेव बौद्धदर्शने आर्यसत्यानां चतुर्णां प्रयोजनमभ्युपगम्यते। सांख्यदर्शने पञ्चविंशतितत्त्वानां, न्यायदर्शने षोडशपदार्थानां, वैशेषिकदर्शने षट्पदार्थानां, मीमांसादर्शने सप्तपदार्थानां, तदेकदेशिनां मते अष्टपदार्थानामिव बौद्धदर्शनेऽपि तत्त्वव्यवस्थासम्पादनार्थं चत्वारि आर्यसत्यानि स्वीकृतानि सन्ति।

तस्य आर्यसत्यस्य दुःख-दुःखोदय-मार्ग-निरोधश्चेति चत्वारो भेदाः। कतिपयैर्बौद्धदार्शनिकैः दुःखं, आयतनं, मार्गः, दुःखोदय इति चत्वारि आर्यसत्यानि स्वीकृतानि। प्रथमपक्षस्य दार्शनिकाः दुःखोदयसंज्ञके आर्यसत्ये 'आयतनस्य' तथा द्वितीयपक्षस्य दार्शनिका मार्गसंज्ञके आर्यसत्ये 'निरोधस्य' अन्तर्भावं विधाय आर्यसत्यस्य चतुःसंख्यां पूरयन्ति। आयतन नाम स्थानं कारणं वेति। क्षितिसलिलानलानिलरूपाः विज्ञानञ्चेति सर्वे समनस्काः स्पर्शादिपञ्चानामिन्द्रियाणां आयतनानि कथ्यन्ते। यत एतेषां सम्पर्केणैव इन्द्रियेषु समुदयन्ति दुःखानि।

अत्र तावत् प्रथमभेदानुसारेण आर्यसत्यानां किञ्चिद् विवेचनं सुस्पष्ट क्रियते। दुःखविवेको नाम प्रथम आर्यसत्यम्। वेदान्तदर्शनं अखिलं विश्वमेव आनन्दात्मकं ब्रह्मरूपं स्वीकरोति। किन्तु बौद्धदर्शनं खलु एतद् विपरीत चिन्तयति। दर्शनमिदमखिलं विश्वं दुःखात्मकमभ्युपगच्छति नानन्दात्मकम्। अस्य मते आनन्दो न खलु स्वाभाविकः, स तु प्रयत्नलभ्यः सुखार्थं यत्नः अपेक्ष्यत इति को वा न जानाति किन्तु न नियता तदुपलब्धिः। दुःखार्थं न हि तावत् प्रयत्नापेक्षा तथापि तत् स्वयमेव उपनतं भवति। अतः अस्य विश्वस्य दुःखात्मकतैव युक्तियुक्तेति विज्ञायते। अयमेव दुःखविवेक इत्यभिधीयते। अस्मिन् विषये वेदान्तबौद्धदर्शनयोः चिन्तनसरणिः परस्परं नितान्तं विपरीता वर्तते।

दुःखभेदाः—दुःखसंज्ञकस्यास्याऽऽर्यसत्यस्य पञ्चभेदा भवन्ति। तथाहि—रूप संज्ञा-संस्कार-विज्ञान-वेदनाभिधा इमे प्रसिद्धाः। वेदान्तदर्शनं तावत् सत्ता-चेतना-ऽऽनन्द-कर्म-रूप-नामसंज्ञिकाः षट्भावना अभ्युपैति, किन्तु तत्र सत्तासंज्ञकः पदार्थो न हि तर्कारुढो भवतीति बौद्धदार्शनिकाः प्रतिपादयन्ति। यतो जगति सर्व एव पदार्था असद्रूपाः, अतएव उपर्युक्तानां पञ्चस्कन्धाना अभ्युपगम एव समुचितः प्रतिभाति।

रूपस्कन्धशब्देन न हि केवल रूपसंज्ञको गुण एव गृह्यते, अपितु द्रष्टरि बुद्धिद्वारा दृश्यपदार्थेषु समवेतानां रूपरसगन्धस्पर्शादीनां पृथ्वीजलवाय्वादीना श्वेतनीलहरितपीतादीनां कषायकटुमृदुकठोरमन्दामन्ददूरादूरशुभादीनां यो रूपनिश्चयः क्रियते स एव रूपस्कन्धशब्देन उच्यते। आर्हतदर्शनोक्तं पुद्गलद्रव्यं बौद्धाऽभिमतो रूपस्कन्धश्च प्रायश एक एव। रूपस्कन्धश्चैषः दुःखहेतुत्वात् दुःखरूप एव।

यथा रूपस्कन्धो दुःखरूपस्तथैव संज्ञास्कन्धोऽपि दुःखरूप एव। यदृच्छा-जात्यादिभेदैः शब्दस्तावदनेकविधः। शब्दात् यज्ज्ञानमुत्पद्यते, तत् खलु भिन्नमेव रूपकर्मभ्यामुत्पद्यमानात् ज्ञानात्। अत आभ्यां खलु संज्ञास्कन्धो भिन्नः, अयमपि च दुःखरूप एव।

तृतीयः संस्कारस्कन्धोऽपि दुःखात्मक एव। सत्ता प्रवृत्ति-सृष्टि-शक्तिभेदा-दस्यापि चत्वारो भेदाः। 'अस्ति' इत्याकारिका बुद्धिस्तावत् सत्ताशब्दार्थः। अयमपि एकः संस्कारविशेषः, सन्तानकल्पनया अस्योत्पत्तिर्भवति। वस्तुतस्तु पदार्थः सर्वथा क्षणिक एव, अतः असन्नेव। शरीरस्य वचसो मनसश्च गतिरेव प्रवृत्तिरिति कथ्यते। सृष्टिर्नाम पदार्थपरिवर्तनमिति। प्रत्येकस्मिन्-

पदार्थे या अर्थक्रियाकारिता वर्तते सा एव तस्य शक्तिः। यथा जलधारणादिषु घटस्य अर्थक्रियाकारिता सर्वैरनुभूयत एव। एतच्चतुर्विधं कार्यमेव संस्कार-शब्देनोच्यते। अयमात्मीयपदार्थेषु आत्मन्यपि च प्रवाहरूपेण उत्पद्यमानो वर्तते। पुण्यपापजन्यादृष्टादीनां रागद्वेषक्लेशादीनां मदेर्ष्याद्युपक्लेशादीना सर्वेषामपि संस्कारनामके दुःखस्कन्धेऽन्तर्भावो भवति। वेदान्तदर्शने सत्ता-कर्मणोर्भेदोऽभ्युपगम्यते, किन्तु बौद्धास्तावत् न स्वीकुर्वन्ति तन्मतम्। सत्ता-कर्मणी द्वे अपि पृथक्-पृथक् संस्काराविस्याहु बौद्धदर्शनिकाः।

विज्ञानस्कन्धोऽपि दुःखरूप एव। अस्य च त्रयो भेदा भवन्ति। आत्मा, आत्मीयः, तयोश्च सम्बन्धः, अहमस्मीत्याकारको विचारोऽपि आलयविज्ञान शब्देनोच्यते। अस्य नामधेयं आत्मरूपविज्ञानस्कन्ध इति निगद्यते। अयं तावत् विषयेभ्यः पृथगपि स्वयं निर्विशेषो वरीवर्ति। अस्मिन्नेव अन्ये सर्वे पदार्थाः प्रतिबिम्बिता भवन्ति। अस्य विज्ञानस्कन्धस्य त्रयो भेदाः, प्रमाण-प्रमेयात्मायतनानीति। तत्र प्रमाणविज्ञानस्य आलम्बन-समनन्तर-नियामक-सहकारीति भेदेन चत्वारो भेदा भवन्ति। इदमेव प्रवृत्तिविज्ञानमित्युच्यते। नीलशब्दश्रवणेन जायमानं नीलाकारज्ञानमेव आलम्बनमित्युच्यते। पूर्वा-वगतस्य पदार्थस्य संस्कारात् उत्पद्यमानः 'स एवायं पदार्थः, यः पूर्वं दृष्ट' इत्याकारकं ज्ञानं समनन्तरसंज्ञकं आत्मीयविज्ञानमित्यभिधीयते। चक्षुरादयः नियामकविज्ञानशब्देन उच्यन्ते। एतद्बलेनैव रसादिज्ञानात् रूपादिज्ञानस्य भेदः सिद्धो भवति। तथा प्रकाशः सहकारिविज्ञानमिति निगद्यते। यतो तेन विना रूपज्ञानं नैव भवितुमर्हति। एषु चतुर्षु आलम्बनसमनन्तरनियामकाना त्रयाणां सामूहिकमभिधानं चित्तमित्यभिधीयते।

चित्तस्य आत्मीयेन सह यः सम्बन्धः स एव विज्ञानस्कन्धस्य तृतीयो भेदः सम्बन्धशब्देनोच्यते। अस्यापि त्रयो भेदाः—अवग्रहः, ईहा, अवायश्चेति। अवायस्यैव नामान्तरमपायः, अथवा अवगम इति। धारणासंज्ञकज्ञानमेव त्रयाणा फलं भवति। इन्द्रियाणां विषयैः सह यः सम्बन्धः स एव अवग्रह इत्यभि-धीयते। तदनन्तरं ईहासंज्ञकस्य सम्बन्धस्यापि षड्भेदाः भवन्ति। ते च संशय-बुभुत्सा-प्रमाणदृष्टि-तद्ग्रह-तन्नियोग निर्धारणसंज्ञकाः।

अविद्यारूपाः सुखदुःखमोहा एव वेदनाशब्देन निगद्यन्ते। ते सर्वे दुःख-स्वरूपा भवन्ति। न हि सुखसंज्ञकः कोऽपि स्वतन्त्रः पदार्थः प्रसिद्धः। यतो-ऽतिशयितस्य दुःखस्य अभिभूतावस्थैव सुखपदवाच्या भवति। इत्थं दुःखा-भिधानस्य आर्यसत्यस्य पञ्च भेदा वर्णिताः।

[३]आर्यसत्यस्य द्वितीयो भेदः दुःखोदयः समुदयो वा ऽस्ति । अस्यापि त्रयो भेदाः—रागद्वेषमोहाश्चेति । क्रोधमानमायानां तथा लोभादीनामप्येतेष्वेवान्तर्भावो भवति । यतः त एव दुःखस्य जनका भवन्ति ।

[४]तृतीयस्य आर्यसत्यस्य नाम निरोधः । दुःख-दुःखोदयाभ्यां जायमाना मुक्तिरेव निरोधशब्दार्थो भवति । आभ्यां प्राप्यमाणा मुक्तिरेव आत्मनो निर्वाणमित्यभिधीयते । आत्मनः स्वरूपतो नाश एव निर्वाणशब्दार्थः ।

[५]चतुर्थमार्यसत्यं मार्गसंज्ञकम् । सर्वमेव दुःखात्मकं, क्षणस्यापि क्षयित्व-

---

३. (क) कादाचित्कतया सिद्धा दुःखस्यास्य सहेतुता ।
नित्यं सत्त्वमसत्त्वं वा हेतोर्बाह्यानपेक्षणात् ॥
प्रमाणवार्तिकं १।१८१

(ख) असामर्थ्यादतो हेतुर्भववाञ्छा परिग्रहः ।
यतोऽपि प्राणिनः कामविभवेच्छे च ते मते ।
सर्वत्र चात्मस्नेहस्य हेतुत्वात् सम्प्रवर्तने ॥
प्रमाणवार्तिक १।१८५,१८७

(ग) इदं खो पन भिक्खवे दुक्खसमुदयं अरियसच्चं । योयं तण्हा पोनब्भविका नन्दिरागसहगता तत्र तत्राभिनन्दिनी सेयमीदं कामतण्हा भवतण्हा बिभवतण्हा—मज्झिमनिकाय महाहत्थिपदोपमसुत्त । दृष्टव्य—मज्झिमनिकाय महादुक्खखन्धसुत्तम् ।

४. (क) मोहश्च मूलं दोषाणां··············· ।
सत्कायदृष्टेर्विगमादाद्य एवाभावो भवेत् ॥
प्रमाणवार्तिक १।१९८, २०१

(ख) इदं खो पन भिक्खवे दुक्खनिरोधं अरियच्चं सो तस्सायेव तण्हाय असेसविरागनिरोधो चागो पटिनिस्सागो मुत्ति अनालयो ।
मलिन्द पञ्ह पृ० २०५ ।

५. (क) आत्मात्मीयग्रहकृतः स्नेहः संस्कारगोचरः ।
हेतुर्विरोधि नैरात्म्यदर्शनं तस्य बाधकम् ॥
बहुशो बहुधोपायं कालेन बहुनास्य च ।
गच्छन्त्यभ्यस्यतस्तत्र गुणदोषाः प्रकाशताम् ॥
प्रमाणवार्तिकं १।१३७, १३८

(ख) उक्तो मार्गः तदभ्यासादाश्रयः परिवर्तते । मार्गः नैरात्म्यदर्शनलक्षणः । तस्याभ्यासादाश्रयः क्लेशवासनाभूतमालयविज्ञानं क्लिष्टदशानिरोधात् क्लेशविसंयुक्तचित्तप्रबन्धात्मना परिणमति— प्रमाणवार्तिकं १।२०७

(ग) मग्गानट्ठङ्गिको सेट्टो । धम्मपद २०।१

मित्याकारिकाया वासनायाः दाढर्यमेव 'मार्ग' इत्यभिधीयते। अयं 'मार्ग' एव निरोधसंज्ञकस्य आर्यसत्यस्य कारणम्। अस्यैव हितकारिमार्गस्यावलम्बनेन मानवः निर्वाणं प्राप्नोति। आलयसंज्ञकविज्ञानमेव आत्मनः स्वरूपम् तस्मादेव निखिला वासना उद्भवन्ति। एतासां वासनानां नाश एव आत्मशुद्धिरिति निगद्यते। मार्गशब्दस्यार्थोऽपि संमार्जनं शुद्धिर्वा भवति। वस्तुतस्तु आत्मा 'वासना' रूपम् एव। स च ज्ञानप्रवाहरूपः। अस्थिरज्ञानसन्ततेर्नाश एव आत्मनो विनाशः। सर्वाणि दुःखानि आत्मन एवोत्पद्यन्ते, अत आत्मनो विनाशेनैव दुःखस्य क्षयो भवति। दुःखनाश एव पुरुषार्थः। अयं पुरुषार्थ एव आत्मनिर्वाहशब्देन कथ्यते। इत्थं भगवता बुद्धेन स्वकीयान् शिष्यान् प्रति चत्वारि आर्यसत्यान्युपदिष्टानि।

अक्षरविवेचने ऋकारऌकारौ

विश्वनाथमिश्रः

विप्रतिपद्यन्ते केचित् स्वर एवाक्षरम्, न तु व्यञ्जनमपि। तत्रापि ऋकारऌकारौ न स्वरौ किन्तु व्यञ्जनवर्णौ। स्वरमात्रस्याक्षरत्वप्रसाधिकेयं विप्रतिपत्तिर्नास्त्यहैतुकी यजुःप्रातिशाख्ये "स्वरोऽक्षरम्" १।८९ इति सूत्रेण तथा ऋक्प्रातिशाख्येऽपि—"सव्यञ्जनः सानुस्वरः शुद्धो वापि स्वरोऽक्षरम्" १८।३२ इति सूत्रेण च केवलं स्वराणामेवाक्षरत्वव्यवस्थापनेन तत्र सहेतुकत्वस्य स्पष्टं वक्तव्यत्वात्। अत एव स्वर्यते शब्द्यते व्यञ्जनं येन स स्वरः। विगतम् अञ्जनम्—उच्चारणं यस्य तत् व्यञ्जनम् अर्थात् यस्योच्चारणं न स्यात् तदेव व्यञ्जनमित्युभयोर्व्युत्पत्तिः शक्यते कर्तुम्। अतएव छन्दःशास्त्रे केवलं स्वराणामेव मात्रागणना कृता न तु व्यञ्जनानामपि। अतः स्वरा एवाक्षराणि इति सिद्धयति।

अत्रोच्यते नहि व्यञ्जनशब्दस्य व्युत्पत्तिः-विगतमञ्जनमुच्चारणं यस्येति युज्यते वक्तुम्, विशिष्टम् अञ्जनमुच्चारणं यस्येति व्युत्पत्तेरपि संभवात्। उच्चारणे वैशिष्ट्यञ्च-स्वरप्रयोज्यम्। अतएव स्वर्यते शब्द्यते येनेति स्वरशब्दस्य व्युत्पत्तिरपि संगता भवति। अत एव अचमन्तरेण व्यञ्जनस्योच्चारणमपि न सभवतीति भाष्यमपि संगच्छते। तस्मात् स्वर इव व्यञ्जनमपि अक्षरमिति शक्यते वक्तुम्। अतएव "वर्णैकदेशा वर्णग्रहणेन चेत् सन्ध्यक्षरे समानाक्षरविधिप्रतिषेधः"[१] इति भाष्यप्रदीपोद्योते "अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ" दश समाना इत्युक्त्वा समानाक्षरेषु ऋऌवर्णयोर्ग्रहणं कृतं संगच्छते। ऋक्प्रातिशाख्येऽपि "अष्टौ समानाक्षराण्यादितः" १।१ सूत्रे वर्णसमाम्नायस्यादाक्षराणि समानाक्षरसंज्ञकानि भवन्तीत्युक्तम्। यद्यपि भाष्योद्योते दशवर्णाना समानाक्षरत्वं तथा इह चाष्टौ वर्णानां तदिति पार्थक्यं वर्तते, तथापि ऌकारमतिरिच्य ऋकारस्य तु अक्षरत्वम् ऋक्प्रातिशाख्यतोऽपि साधितमेव। किञ्च ऌकारस्याक्षरत्वं तत्राप्यच्त्वं तस्य "ततश्चत्वारि सन्ध्यक्षराण्युत्तराणि"[२] इति सूत्रव्याख्याने निपुणमेव प्रसाधितम्। तत्र ह्युक्तम्—"तत इत्यनयैव पञ्चम्या

१. नवाह्निकमहाभाष्यम् पृ० ११६।

२. ऋग्वेदप्रातिशाख्यम्-श्रीमंगलदेवशास्त्रिसम्पादितम् पृष्ठम् २४।

सन्ध्यक्षराणां समानाक्षरैः सहानन्तर्यं सिद्धे यदुत्तराणीति वदति तदन्तरा ऌ ॡ इत्यनयोः स्वरयोः प्रतिषेधार्थम् ।" अत्र नामग्राहम् ऌकारस्य स्वरत्वमुक्तं तेन तस्य अक्षरत्वञ्चापि सिद्ध्यत्येव । नह्यक्षरत्वमन्तरा तदधिकरणकं स्वरत्वं शक्यते वक्तुम् ।

किञ्च वर्णानां मात्राप्रयुक्तह्रस्वादिसंज्ञाविधानावसरे "मात्रा ह्रस्वः"[1] इति सूत्रं व्याख्यानं कुर्वता "ह्रस्वस्वरो मात्राकालो वेदितव्यः । यथा अ इ उ ऌ" इत्युदाहरणं च प्रदर्श्य ऌकारस्य स्वरत्वं तद्द्वाप्यमक्त्वञ्च निपुणं प्रादर्शि ।

यदि चोच्येत—एवं चेत् यजुःप्रातिशाख्ये "स्वरोऽक्षरम्" तथा ऋग्वेदप्रातिशाख्ये च "सानुस्वरः सव्यञ्जनः शुद्धो वापि स्वरोऽक्षरम्" इति स्वरमात्रस्याक्षरसंज्ञाविधानमयार्थमेवेति चेदत्र ब्रूमः--वेदे स्वराणामुच्चारणस्य महती प्रधानता दत्ता वर्तते । "यो वा इमां स्वरशोऽक्षरशश्च वाचं विदधाति" तथा "मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह" इत्यादि भाष्येण चैतदेव ध्वन्यते । तत्र स्वरपदेन क्वचिदुदात्तादयः क्वचिच्च स्वरपदेनाकारादयो गृह्यन्ते । एवमेव उच्चारणप्राधान्यमधिष्ठायाक्षरपदमपि तत्र पारिभाषिकमेवावतिष्ठते । उक्तञ्च "उभये त्वक्षराणि"[2] १।१९ इति सूत्रभाष्ये उव्वटेन "ननु कस्मात् प्रकृता एव स्वरा दीर्घा ह्रस्वाश्चोभयग्रहणेन नान्तर्भाव्यन्ते । येनेमौ व्यवहितावपि ऌकारप्लुतावुभयग्रहणे नान्तर्भाव्येते इति । शृणु तन्त्रान्तरे "स्वरोऽक्षरम्"[3] इति स्वरमात्रस्याक्षरसंज्ञा विधीयते । अयमपि "सव्यञ्जनः सानुस्वरः शुद्धो वापि स्वरोऽक्षरम् १८।३२ इति स्वरस्याक्षरसंज्ञां विधास्यति । न चाक्षरसंज्ञां विनोदात्तादयस्तदाश्रयाः स्युः । किञ्च गुरुलघुपूर्वाङ्गपराङ्गचिन्तामक्षरस्यैवेदानीं वक्ष्यति" । एतेन सिद्ध्यति यत् प्रयोजनविशेषानुरोधात् वैदिकाक्षरसंज्ञा पारिभाषिकी । तत्रार्धमात्राकालावच्छिन्नव्यञ्जनानामनुपयोगिता एवेति न कृता तेषां पारिभाषिक्यक्षरसंज्ञावैदिके विधाने । अन्यत्र तु सर्वत्राक्षरशब्देन स्वराणामिव व्यञ्जनानां चापि ग्रहणं दृश्यते । उक्तञ्च याज्ञवल्क्येन—

संयोगे तु परं स्वार्थं परं संयोगनायकम् ।
संयुक्तस्य तु वर्णस्य न स्वार्थं पूर्वमक्षरम् ॥[4]

---

१. ऋक्प्रातिशाख्यम् पृष्ठम् ३६ ।
२. तत्रैव पृष्ठम् ३१ ।
३. अथ० प्रा० १।६३ ।
४. याज्ञवल्क्यशिक्षा ।

अर्थात् व्यञ्जनानां संयोगे परं व्यञ्जनं स्वार्यं = स्वरसहितं कार्यं, तदेव च संयोगनायकम्। पूर्वमक्षरं व्यञ्जनं न स्वार्यं न स्वरसहितं कार्यमिति। अत्राक्षरशब्देन व्यञ्जनग्रहणं स्पष्टतया कृतम्।

अनुस्वारे विवृत्यां तु विरामे चाक्षरद्वये।
द्विरोष्ठ्यौ तु विगृह्णीयात् यत्रौकारवकारयोः॥[१]

अत्राक्षरशब्देन संयुक्तव्यञ्जनद्वयस्य ग्रहणं कृत्वा व्यञ्जनानामक्षरत्वं साधितमेव।

अतएव अक्षराणां गणनावसरे ऋक्प्रतिशाख्ये अष्टौ समानाक्षराण्यादितः इत्यारभ्य "सर्वः शेषो व्यञ्जनानि"[२] इत्यन्तं यावदक्षरविभागः कृतः। तत्र च अक्षरपदेन स्वराणां व्यञ्जनानामुभयेषां गणना कृता। एवमेव यजुःप्रातिशाख्येऽपि" "अथातो वर्णसमाम्नायं व्याख्यास्यामः" इति प्रकरणे स्वरव्यञ्जनयोरुभयोर्ग्रहणं कृतम्। भगवता भाष्यकृताऽपि स्वरव्यञ्जनसमुदायात्मकचतुर्दशसूत्राणामक्षरसमाम्नायत्वं व्याहृतम्—"सोऽयमक्षरसमाम्नायः पुष्पितः फलितः चन्द्रतारकवत् प्रतिमण्डितो ब्रह्मराशिरिति"[३]। किञ्च—अक्षरशब्दस्य व्याख्यानं कुर्वता भाष्यकारेण प्रत्याहाराह्निके "अक्षरं न विद्यात्" इत्युक्तम्। तत्र न क्षरतीति न क्षीयते वा यत् तदक्षरम्। अथवा "अशू व्याप्तौ" अस्मात् औणादिके सरन्प्रत्यये निष्पन्नोऽक्षरशब्दो व्यापकार्थकः। "अथवा वर्णं वाहुः पूर्वसूत्रे" अर्थात् पूर्वेषामाचार्याणां सूत्रे वर्णा अक्षराणीति इति वर्णानामेव अक्षरसंज्ञा कृता। एवञ्चोपर्युक्तप्रपञ्चेनेदं निश्चप्रचं यद् अक्षरशब्दो वर्णपर्यायः। स च द्विविधः स्वरो व्यञ्जनञ्च। स्वतन्त्रोच्चारणविषयः स्वरः। स्वराधीनोच्चारणविषयो व्यञ्जनमिति ज्यायसी व्यवस्था। छन्दःशास्त्रे मात्राणामावश्यकतामनुरुध्य स्वराणामेव ताः परिगणिताः न तु अनुपयोगिन्यो व्यञ्जनमात्राः। नैतावता व्यञ्जनानामक्षरत्वाभावः शंकनीयः कदाचित्।

यदप्युच्यते-ऋकारलृकारौ न स्वरौ, किन्तु व्यञ्जने, यतो हि "पदाद्यन्तयोर्न लृकारःस्वरेषु"[४] इति सूत्रेण लृकारस्य स्वरेभ्यः पृथक्करणस्य दृष्टचरत्वात्। किञ्च "धातौ स्वरः कल्पयतावृलृकारः"[५] इति सूत्रे कृपधातोः ऋकारस्य लृकार-

---

१. पाणिनीयशिक्षा।
२. ऋक्प्रातिशाख्यम् पृष्ठम् २८
३. नवाह्निकं भाष्यम् पृ० १४७
४. ऋक्प्रातिशाख्यम् पृ० १८
५. तत्रैव पृ० ३६३

भावे तस्य स्वरत्वं साधितम्। तच्च साध्यते पूर्वतोऽसिद्धमेव। यदि लृकारे पूर्वत एव स्वरत्वं स्यात् तदा तस्य तद्विधानं व्यर्थमेव स्यात्। किञ्चानयोः ऋकारलृकारयोः मध्ये रश्रुतिः लृकारश्रुतिश्चापि अनयोः स्वरत्वाभावमेव व्यञ्जयति। नह्यस्मिन् कस्मिंश्चिदपि स्वरे भवति श्रुतिर्व्यञ्जनवर्णस्य। तस्मादनयोर्व्यञ्जनत्वमेव युक्तमिति।

अत्र विचार्यते—ऋकारलृकारावुभावपि स्वरावेव। अक्षरसमाम्नाये, शिक्षायाम्, "एते स्वराः" इति ऋक्प्रातिशाख्ये च स्वरमध्ये तयोरपि परिगणनस्य दृष्टत्वात्। याज्ञवल्क्येनापि—

"लृकारस्य तु दीर्घत्वं नास्ति वाजसनेयिनः"

इत्युक्त्वा लृकारस्य स्वरत्वं स्वीकृतमेव। दीर्घत्वादयः स्वरधर्माः सन्ति। अतः स्वरत्वाभावे लृकारस्य दीर्घनिषेधः सर्वथैवासंगतः स्यात्। यद्यपि "कृपो रोलः"[1] इति सूत्रव्याख्यानात् "ऋति ऋ वा"[2] "लृति लृ वा"[3] इति वार्तिकद्वयव्याख्यानाच्च "ऋकारलृकारमध्ये रकारलकारौ स्तः" इति प्रतीयते तथापि नैतावता तयोरस्वरत्वं व्यञ्जनत्वं वा साधयितुं शक्यते, यतो हि ऋलृवर्णयोर्विषये प्रकारद्वयस्योज्जृम्भणात्। तत्र प्रथमः प्रकारोऽयं वर्तते यद् अक्षरसमाम्नाये -'ऋलृक्" इति सूत्रे पठितौ हि ऋलृवर्णौ विवृतप्रयत्नवन्तावेकमात्रिकौ स्वरौ। अतस्तयोः परत्वे "दध्यृकारः"; दध्य्लृकारः इत्यादीनि यण्घटितानि उदाहरणानि द्रष्टुं शक्यन्ते। अनयोश्च परस्परस्थानभेदात् सावर्ण्यं न प्राप्नोतीति ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यमिति प्रावोचत् वार्तिककारः। तेन ऋतः सवर्णे ऋति लृति च होतृकारः इति दीर्घघटितं रूपं भवति। भाष्यकारेण च "ऋति ऋ वा वचनम्," "लृति लृ वा वचनम्" इति रूपेणापरोऽपि पक्षः प्रस्तुतीकृतः। अत्र वार्तिकद्वये विधेयं वर्णद्वयं द्विमात्रम्। तयोराद्यस्य ऋकारस्य मध्ये द्वौ रेफौ तयोरेका मात्रा, तदुभयतः अज्भक्तेरपरा मात्रा। एवं 'लृति लृ वा" इति वार्तिकविधेये द्वौ लकारौ तयोश्चैका मात्रा, लकारद्वयस्याभितोऽज्भक्तेरपरा मात्रा। एवं चेमौ ऋकारलृकारौ न विवृतप्रयत्नवन्तौ, किन्तु रकारलकारद्वयवत् सादृश्यात् ईषत्स्पृष्टप्रयत्नवन्तौ बिभृतः कञ्चित् विशेषं स्वात्मनि। ईषत्स्पृष्टकरणत्वाच्च तयोरनच्त्वमिति संभावनायामाह-भाष्यकारः-

---

१. वैयाकरणसिद्धान्तकौमुदी बालमनोरमा पृ० १०६

२. नवाह्निकं महाभाष्यम् पृ० २४८

३. तत्रैव

"ऋकारस्य लृकारस्य[1]चाच्त्वं वक्ष्यामि" इति भाष्यवचनमिदं विवृण्वता कैयटेनोक्तम्–'ऋ वा वचनं लृ वा वचनं" इति ब्रुवता अच्त्वमनयोर्वक्तव्यम्। अन्यथा विधानमात्रमनयोः स्यात् नाच्कार्यं प्लुत। सति त्वच्त्वे ताभ्यां त्रिमात्रयोरपि सावर्ण्यात् ग्रहणे सति प्लुतसिद्धिः[2]। तच्च समीहितमच्त्वमनयोः "अइउण्" सूत्रानन्तरं पाठाद्बोध्यम्।

एतेनोपर्युक्तप्रपञ्चेन ऋकारलृकारयोर्द्वैविध्यं तत्र च तयोरच्त्वमिति प्रसाधितम्। इदमत्रापरं विज्ञेयम्—इह समुदाया अप्युपदिश्यन्ते, अवयवा अपि। समुदायास्तावत् ऋ–लृ–ए–ओ–ऐ–औ इति। अवयवास्तु–अइउणरट्लण इति। तत्र य एते वर्णेषु वर्णैकदेशा वर्णान्तरसमानाकृतयः सन्ति तेषामवयवसदृशवर्णग्रहणेन ग्रहणेऽभिप्रेते प्रलूय इत्यत्र दीर्घोकारेऽपि ह्रस्वत्वप्रयुक्तस्तुक् इव, किं वा, खट्वाभिरित्यत्र ह्रस्वाकारप्रयुक्तो भिसः स्थाने ऐस इव "प्रातर्–ऋतम्" इत्यत्र [3]रोरीति सूत्रेण रकारलोपविषयकं शंकासमाधानं न कृतं भाष्ये। किञ्च यदि वर्णावयवा वर्णग्रहणेन गृह्येरन् तावतापि "मातृणाम्" इत्यत्र "रषाभ्यां नो णः समानपदे"[4] इत्यनेन नकारस्य णत्वं न सेत्स्यति यतो "यत्तद्रेफात् परं भक्ते" इत्युक्त्यनुसारं ऋकारगतस्य रभागस्य सर्वतोऽज्भागेन व्यवहितत्वमिति रकारनकारयोरनान्तर्यात्।

विवेचनेनानेन यद्यपि प्रतिभासते ऋकारे रकारो लृकारे च लकारस्तथापि प्रतीतिरियं भ्रान्तिजन्यैवेति प्रतीमः। उक्तञ्च–कैयटेन "नरसिंहवद् वर्णान्तरत्वात् सादृश्याच्च प्रत्यभिज्ञानात् तत्त्वासिद्धया पृथगुपलब्धानां वर्णानां समुदाये नास्ति सत्त्वम्। भ्रान्तिवशात्तु अवयवप्रतीतिः[5]। कैयटोक्तेरस्या व्याख्यानं कुर्वतोद्योतकारेणोक्तं "सत्यपि गोसादृश्ये गवये गोत्वस्येव सन्ध्यक्षराद्यवयवेषु अत्वादिजातेरभावात् अकारादिग्रहणेन ग्रहणं नेति भावः। ऐकारादीनामेकेच्छाप्रयत्नजन्यत्वेनैकत्वमेव, अकारादिवत्। अत एवैषा पदवन्न वर्णसमूहत्वेन प्रतिभासः। भ्रान्तिगृहीतावयवाश्रयेण समुदायवाचोयुक्तिरिति[6]। एतेन निर्विवादं शक्यते वक्तुं यद् समुदायवत् प्रतीयमानानि वस्तुतोऽसमुदायरूपाणि सन्ध्यक्षराणि स्वतन्त्रसत्ताकानि सन्ति। भ्रान्त्या

१. तत्रैव पृ० २४६   २. तत्रैव पृ० २५०

३. सिद्धान्तकौमुदी बालमनोरमा पृ० ११२   ४. तत्रैव पृ० १५४

५. नवाह्निकं भाष्यम् पृ० १२१   ६. तत्रैव पृ० ११६

७. तत्रैव पृ० १२०

प्रतिभासन्तां तत्रावयवा इत्यन्यदेतत्। अतएव "मातृणामित्यादौ णत्वसिद्ध्यर्थं पठ्यते", 'ऋवर्णान्नस्य णत्वं वाच्यम्' इति।

इदमपरमप्यविचारितरमणीयं विवेचनीयतामापद्यते यत् "अ–इ–उ" इति स्वराणामुच्चारणकाल इव ऋलृवर्णयोरुच्चारणकाले जिह्वा शिथिला सती पतिता न तिष्ठति। तेन मन्तव्यम् 'ऋकारलृकारौ न स्वराविति। तत्रोच्यते अ–इ–उ स्वराणामुच्चारणकाल इव "ए ऐ ओ औ" इति वर्णानामुच्चारणकालेऽपि जिह्वा शिथिला सती पतिता न तिष्ठति। किमेतेन एषां वर्णानां व्यञ्जनत्वं स्वीकर्तुं शक्यते केनापि। नो चेत् ऋकारलृकारयोरेव कृते मुधैव एतादृश आग्रहः। वस्तुतः प्रत्येकं वर्णानामुच्चारणस्थानं भिन्नं भिन्नं भवति। तत्र स्थानप्रयत्नानुकूलैव जिह्वायाः स्थितिः। अतस्तद्द्वारा स्वरव्यञ्जनविभागो न शोभनः। अतएव एकेनैव कण्ठेनोच्चार्यते अकारेण सम व्यञ्जनं कवर्गोऽपि। स्वेन राजन्ते, स्वर्यन्ते वा यैस्ते स्वराः। एतादृशञ्च स्वरत्वम् अकारादीनामिव ऋकारलृकारयोरप्यव्याहृतमेव। यथा अकारो व्यञ्जनानामुच्चारणे साहाय्यमाचरति, तथैव कृष्णशब्दघटककारोच्चारणे ऋकारस्य तथा 'क्लृप्तशिखः' इत्यत्र ककारोच्चारणे लृकारस्य साहाय्यं न केनापि तिरोहितम्। तेनास्थाने खलु सन्देहोदयः ऋकारलृकारयोरज्विषयकः।

"यत्तद् रेफात् परं भक्तेः" इति भाष्ये "अभितोऽज्भक्तेरपरा मात्रा" इति कौमुद्याञ्च समाप्ततो भक्तिशब्दोऽपि नालम्बतेऽनालोचनताम्। तत्र भक्तिशब्दार्थो भागः। तेन रेफाद् भक्तेरित्यस्य रेफसदृशो यो भागः ऋकारे वर्तते तस्मात् परः अचो भाग एवाज्भक्तिः। तेन व्यवहितत्वात् मातृणामित्यादौ नस्य णत्वानापत्त्या आरभ्यते 'ऋवर्णान्नस्य णत्वं वाच्यमिति'। तस्मादकारादावचि स्वातन्त्र्येण यथा तेषामेव सर्वस्वम् तथैव ऋकारलृकारयोरप्यचोः यो रेफसदृशो लकारसदृशो वा भागस्तस्मात् परस्तस्यैव स्वकीयोऽज्भागो वर्तते, न तु तत्र अकारादिस्वराणां भागः कथंचित् शंकनीयः। "किरति गिरति," इत्यत्र ऋकारस्य, इरादेशः "मातुः" इत्यादौ तु उरादेशः "देवर्षिः" इत्यादौ च अरादेशः "ऋत्–इद्धातोः" "ऋत उत्" इत्यादिसूत्रद्वारा यथादिष्टं लक्ष्यैकचक्षुष्कैस्तथैव भवति। न तु तत्र अकारादीनां भक्तिं स्वीकृत्य विधीयते किमपि। अतः अक्षरशब्देन स्वरव्यञ्जनयोरुभयोर्ग्रहणम्। ऋकारलृकारौ चेत्युभावपि स्वरावेवेति नास्ति संशीति लेशः॥

---

१. सिद्धान्तकौमुदी बालमनोरमा भ्वादौ पृ० १४८

२. तत्रैव पूर्वार्धे पृ० १८३

आधुनिके युगे तर्कशास्त्रस्य परमोपयोगिता

डा० गजाननशास्त्री मुसलगांवकरः

चार्वाकप्रभृतयो निरीश्वरवादिन इति विश्रुतमेव सर्वेषाम्। जगदिदमाकस्मिकमिति ते आचक्षते। अस्य जगतो रचयिता न कश्चिदीश्वरो नाम सर्वज्ञः सर्वशक्तिमान् पुरुषविशेषः। क्षिति-सलिलानलाऽनिलानां भूताना विजातीयसंयोगात् किण्वेभ्यो मदशक्तिरिव समुत्पद्यते चितिशक्तिः। उत्तरोत्तरञ्च पदार्थस्वभावा विकसन्तो नानाविधरचनाभित्तीश्चित्रयन्तो दरीदृश्यन्ते। यत्र च 'अहं स्थूलः अहं कृश' इति सामानाधिकरण्यप्रत्यय उदेति, स एव भोक्तापरपर्यायो देह आत्मा, तदतिरिक्त आत्मनि प्रमाणाभावात्। प्रत्यक्षातिरिक्तञ्च नास्ति प्रमाणम्। न वा परलोकः सुकृताऽसुकृतसन्धानक्षमो नियन्तृविशेषाऽपेक्षः।

एवं जातीयकानां कुतर्काणां समूलोन्मूलनं तर्कशास्त्रादेव भवितुमर्हति। नहि तावत् निरीश्वरवादिदुर्दान्तचार्वाकादिकुमतपरासनमनायासेन न्यायशास्त्राश्रयणमन्तरा भवितुमर्हति। तथाचोक्तं महर्षिणा गौतमेन—

"तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत्"[1] अतएव "जल्पस्थले संशयस्य आवश्यकत्वेऽपि वादस्थले न तथा इति संशयमन्तरेणाऽपि अनुमित्साधीनानुमितिनिर्वाहाय न्यायप्रयोग सम्भवात्"[2] इति। अतः "सन्दिग्धेऽर्थे न्यायः प्रवर्त्तते इति नियमस्तु जल्प एव, नतु वादे" इति। तस्माद् वैदिकतत्त्वनिर्णयाय निरस्तसमस्तपुन्दूषणतया वेदा एव प्रमाणं, नहि तर्कस्योपयोग इति नैव वक्तुं शक्यम्। यतो महाजनपरिगृहीतागमप्रामाण्यविप्लावनतत्परचार्वाकादिकुतर्ककुठारकुण्ठीकरणक्षमतयाऽस्य शास्त्रस्य वैदिकसिद्धान्तरक्षणे परमोपयोगं मन्यन्ते आगमविदः।

अतएव उत्तरमीमांसायामपि दुर्दान्तवादिमतदलदलनाय श्रुतिप्रमाणापेक्षा परिहाय शास्त्रार्थाहवे केवलस्तर्कपाद एव पदातिमुख्यतां नीतः। यदि नाम प्रत्यक्षातिरिक्तमनुमानं प्रमाणं न स्यात्, कथं तर्हि अप्रतिपन्नाः सन्दिग्धा विपर्यस्ताश्च पुरुषाः प्रतिपद्येरन्, अर्थात् 'अयमज्ञानी, अयं संशयाकुल',

---

१. न्या. सू. (४।२।४८)

२. अवयवग्रन्थनिरूपणे गदाधरः।

अय भ्रान्तिमान्' इति ज्ञातुं चार्वाकः कथं प्रभवेत् ? नहि कश्चिदपि गौरत्वादिदेहधर्ममिव पुरुषान्तरवर्तिनोऽज्ञानादीन् कल्पकोटिभिरपि प्रत्यक्षेणाव्यक्षीकर्तुं क्षमते । मा नाम योगिप्रत्यक्षगोचरान् परकीयाज्ञानादीन् चार्वाको वराको ज्ञासीत् , किन्तु अज्ञातपरकीयाऽज्ञानसंशयविपर्यासस्तु यं कञ्चनापि पुरुष प्रति वर्तमानोऽनवधेयवचनतया प्रेक्षावद्भिर्नितान्तमुपेक्षणीयः सतां संसदि । तस्मात्परपुरुषवर्तिनोऽज्ञानादयोऽभिप्रायभेदा वचनभेदात्मकलिङ्गबलान्नास्तिकेनाऽप्यनुमेया मन्तव्याः, अन्यथा सकलव्यवहारोपप्लवप्रसङ्ग इत्यकामेनापि अनुमान मानमभ्युपेयम् ।

एवं सति ईश्वरस्य प्रत्यक्षाभावेऽपि कार्यलिङ्गेनानुमानेन तत्सिद्धौ न किमपि बाधकम् । अर्थात् यद्यपि रूपसाध्यभावात् ईश्वररूपोऽर्थः न प्रत्यक्षगोचरः, तदभावादेव च व्याप्तेरभावात् नानुमानगम्योऽपि, सादृश्याभावान्नोपमानमान्य', तदभावादेव च तत्कर्तृकागमाभावात्तदविषयश्च, दुर्जनतोषन्यायेन आगमस्वीकारेऽपि अन्योन्याश्रयादिदूषणगणग्रस्ततयाऽऽगमस्य तत्साधने सर्वथाऽसामर्थ्यमेवेति कुचोद्यजातमवतरति, तथापि कार्यलिङ्गकमनुमानमीश्वरसाधने समुचितमीक्षामहे ।

तथाहि—"क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वाद् घटवत्' इति । यद् यद् घटादिकार्यमुपलभ्यते तत् तत् सर्वमेव कुलालादिकर्तृजन्यमेवोपलभ्यते । अस्ति च क्षित्यङ्कुरादिकमपि कार्यत्वधर्मोपेतं, तत् कथं कर्त्तारमन्तरेणोत्पद्येतेति भवितव्यं तस्यापि केनचित् कर्त्रा । अस्माकमल्पज्ञानशक्तिमतां तु तत्कर्तृत्वं स्वप्नेऽपि भवितुं नार्हति । जडञ्च परमाण्वादि स्वयं किमपि कुर्वन्नोपलभामहे । तस्माद् यस्तस्य कर्त्ता स एवेश्वरः सर्वज्ञः सर्वशक्तिमांश्चेति नात्र सभीतिः ।

तथापि किमत्र पक्षतावच्छेदकमिति विचार्यमाणे न तावत् क्षितित्वं वक्तुं शक्यते, अङ्कुरादेरपि क्षितित्वेन पृथक् तदुपादानवैयर्थ्यात् अर्थात् पृथिवीत्वस्यैव पक्षतावच्छेदकत्वे अंकुरस्यापि पृथिवीकार्यतया पृथिवीत्वेन पृथक् तदुपादानं व्यर्थमेव । यद्येवमुच्येत पक्षकुक्षिनिक्षिप्तक्षितिपदस्य भूमण्डलपरतया भूमण्डलाङ्कुरादीनां सर्वेषामेव पक्षत्वलाभः, ततश्च सर्वानुगतं पक्षतावच्छेदकं पृथिवीत्वमेवेति नाङ्कुरादिपदोपादानवैयर्थ्यं तदा एवं प्रष्टुं शक्यते किं प्रकृते पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धरुद्देश्या ? पक्षतावच्छेदकावच्छेदकासामानाधिकरण्येन वा ? आद्ये दृष्टान्तभूतघटादौ अंशतः सिद्धसाधनम् । नहि तत्र कार्यत्वेन कर्तृजन्यत्वे कस्यचिद् विवादः । द्वितीये

पृथिवीपरमाणौ क्षितित्वसत्त्वेऽपि कार्यत्वहेतोर्बाधः । नहि तत्र क्षितित्वसत्त्वेऽपि कार्यत्वं स्वीकर्तुं शक्यम् । अथ जन्यक्षितित्वं पक्षतावच्छेदकं चेत् ? तदा व्यर्थविशेषणम् परमतेऽजन्यक्षितेरभावात् । किञ्च जन्यत्वस्यैव पक्षतावच्छेदकत्वे पक्षतावच्छेदककोटौ क्षितित्वनिवेशो व्यर्थः । अपि चैवं जन्यत्व-कार्यत्वयोरविशेषात् पक्षतावच्छेदकहेत्वोरैक्यप्रसङ्गोऽनिवार्यः स्यात् । किन्तु प्रसङ्गोऽयमेवम्परिह्रियते—'स्वरूपसम्बन्धविशेषरूपकार्यत्वं पक्षतावच्छेदकं, प्रागभावप्रतियोगित्वरूपं कार्यत्वं हेतुतावच्छेदकमिति न पक्षतावच्छेदकहेत्वोरैक्यप्रसङ्गः ।

इत्थम्पक्षविवेचनानन्तरं साध्यविवेचनमपि किञ्चित् क्रियते—कर्तृजन्यत्व साध्यं न तावत् स्वोपादानगोचराऽपरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वम्, यतः कार्यमात्रं प्रति अन्वयव्यतिरेकाभ्यां कृतिरेव कारणं, कृतिजन्यज्ञान-चिकीर्षयोर्घटम्प्रति रासभस्येव अन्यथासिद्धत्वम्, तेन च तत् त्रितयजन्यत्वरूपस्य साध्यस्य बाधः । अपिच यादृशं स्वत्वं दृष्टान्तभूतघटादौ, न तादृशं पक्षवृत्तीति दृष्टान्त पक्षसाधारणस्य स्वत्वस्यैकस्य अभावात् तद्घटित "स्वोपादानगोचरे" त्यादिसाध्यस्य सुतरामसम्भव एवेति चेत् ? न, कार्यमात्रं प्रति कृतित्वेन अन्वय-व्यतिरेकाभ्यां ज्ञानत्वेन इच्छात्वेन च हेतुत्वस्वीकारात् । तादृशज्ञानजन्यत्वस्य कृतिजन्यत्वरूपस्य वा साध्यस्य विवक्षितत्वेन कोऽपि बाधः ।

अस्मिन् प्रसगे आर्हता एवमाहुः[1]—कार्यत्वहेतोरेव असिद्धत्वात् न हि तावत् उक्तानुमानेन ईश्वरसिद्धिः । न च 'क्षित्यादि कार्यं सावयवत्वात् पटवत्' इति वाक्यम्, सावयवत्वस्यैव अनिरुक्तेः । तथाहि—सावयवत्व किमवयवसंयोगित्वम्, अवयवसमवायित्वं वा ? अवयवजन्यत्वं वा ? समवेतद्रव्यत्वं वा ? सावयवबुद्धिविषयत्वं वा ? इति पञ्च विकल्पाः । न तावदाद्यः पक्षः क्षोदक्षमः, आकाशस्य कपालाद्यवयवसंयोगित्वेऽपि कार्यत्वाभावात्, तेन 'सावयत्वं' हेतुरनैकान्तिकः । द्वितीयोऽपि न; सामान्यादौ व्यभिचारात्, नहि अवयवत्वरूपं सामान्यमवयवेषु समवायसम्बन्धेन वर्त्तते इति तवापि स्वीकारः । न च तृतीयः साध्यविशिष्टत्वेन साध्यसमत्वात्, तथाहि—यथा क्षित्यादिषु कार्यत्वं साध्य तथाऽवयवजन्यत्वमपि साध्यं, तेन साध्येन अविशिष्टत्वात्, साध्यसमो हेत्वाभासः । चतुर्थे तु अवतरति विकल्पद्वयम्—किं नाम समवेतद्रव्यत्वम् ? समवायसम्बन्धमात्रवद्द्रव्यत्वमिति चेत् आकाशादौ व्यभिचारः, गुणादिसमवायस्य तत्र सत्वात् द्रव्यत्वस्यापि च विद्यमानत्वात् । अथ

१. प्रमेयकमलमार्तण्डीयपक्षोऽर्थत उपक्षिप्तः ।

अन्यत्र समवेतद्रव्यत्वं विवक्षितं तदा पूर्ववत् साध्याविशिष्टत्वेन साध्यसमता। वस्तुतस्तु समवाय एव नास्ति प्रमाणाभावात्। नापि पञ्चमः, सावयवबुद्धिविषयत्वेऽपि कार्यत्वाभावात् आत्मनि अनैकान्तिकत्वम्।

अपि च—यदि एकः कर्ता साध्यते तदा विशिष्टकार्येषु प्रासादादिषु व्यभिचारः, तत्र स्थापत्यादीनां बहूनां पुरुषाणां कर्तृत्वोपलम्भात्। कर्तृबहुत्वं चेत् तदा एककर्तृत्ववादभङ्गः। तस्माज्जगत्कर्तुरीश्वरस्याङ्गीकारो युक्तिपराहतः, तथा सति रागादिविशिष्टतया तस्य अनीश्वरत्वप्रसङ्गः।[१]

किन्तु उक्तमेतत्सर्वमनालोचितकर्कशतर्कस्वरूपाणां सुकुमारमतीनामभिधानमाकाशमुष्टिहननायते। तथाहि–'कार्यत्वं' हेतुर्नाऽसिद्धः सावयवत्वेन तस्य साधनात् सावयवत्वञ्च समवेतद्रव्यत्वम्। तच्च—जन्यत्वे सति समवायसम्बन्धावच्छिन्नस्वाश्रयवृत्तिमत्वम्। तेन नैव जन्यगुणादिमदाकाशादिषु व्यभिचारः। 'जन्यत्वे सति अवयवसमवायित्वं वा,' तेन सामान्ये न अनैकान्तिकत्वम्। अवयवजन्यत्वं वाऽस्तु। नच साध्यसमता, क्षित्यादिषु अजन्यत्वस्य आर्हतैरपि अस्वीकारात्।

सावयवबुद्धिविषयत्वं वा कार्यत्वमस्तु, तावतापि न दोषः। न चात्मनि अनैकान्तिकत्वम्, तादृशबुद्धिविषयत्वे तत्र कार्यत्वावश्यंभावस्वीकारप्रसंगात्, तत एव च तत्र अनात्मत्वापत्तेः किञ्च–'आत्मा अनित्यः सावयवत्वात् घटादिवत्' इति आभाससाम्यप्रसंग आर्हतपक्षे अनिवार्यो भवेत्। नच समवाय एव नास्तीति वाच्यम्, 'रूपी' इत्यादिविशिष्टबुद्ध्यनुपपत्तेः। स्वरूपसम्बन्धे च अनन्तस्वरूपकल्पना अपरिहार्या। तत्स्थाने च आर्हतैरपि स्वीक्रियमाणे कथञ्चित्तादात्म्यलक्षणसम्बन्धे विविधदूषणगणप्रसरप्रसंगः। एवं च सावयवत्वेन 'कार्यत्वं' हेतुर्नाऽसिद्धः। अथवा 'क्षित्यादि कार्यं भावत्वे सति विनाशित्वात्

---

१. उक्तञ्च वीतरागस्तुतौ—

कर्तास्ति नित्यो जगतः सचैकः
स सर्वगः सन् स्ववशः स सत्यः।
इमाः कुहेवाः कुविडम्बनाः स्यु
तेषां न येषामनुशासकस्त्वम्॥

२. अयमेव 'अविष्वग्भावलक्षणः सम्बन्ध इत्युच्यते आर्हतैः। तथाच-स्याद्वादमञ्जर्यां मल्लिषेणसूरिणा—तस्माद्धर्म-धर्मिणोरविष्वग्भावलक्षण एव सम्बन्धः प्रतिपत्तव्यो नान्यः समवायादिरिति।

पटवत्' यत्र यत्र भावत्वे सति विनाशित्वं तत्र तत्र कार्यत्वम् । किंवा 'यत्र यत्र कार्यत्वे सति भावत्वं तत्र तत्र विनाशित्वम्' इति विनाशित्वकार्यत्वयोः 'समैव व्याप्तिः पार्थसारथिमिश्रोऽप्याह—यत्र न्यूनाधिकभावेन व्याप्यव्यापकभावस्व-मसंकीर्णं, यथा गोत्वविषाणित्वयोः तत्र व्याप्यमेव गोत्वं विषाणित्वमनुमापयति । नतु व्यापिका विषाणिता गोत्वम् । अतः समोदाहरणेऽपि व्याप्यतैव अनुमि-तेरङ्गं न—व्यापकतेति । एवमीश्वरवादविद्विषां कार्यत्वं हेतुः स्वरूपाऽसिद्ध-इत्यभिधानमसङ्गतम् । नापि कार्यत्वं व्यभिचारि, पक्षादन्यत्र साध्याभावा-धिकरणे आत्मादौ वृत्तेरप्रसिद्धेः । न चायं विरुद्धो हेतुः, साध्याभावव्याप्तेर-भावात् । नापि कालात्ययापदिष्टः, बाधकस्य अनुपलम्भात् । न च सत्प्रतिपक्ष, साध्याभावसाधकस्य हेत्वन्तरस्य अदर्शनात् ।

अपि च यदिदं प्रत्यहमुपचीयमानं ज्ञानैश्वर्यादिकं मानवेषु वीक्षामहे तन्न स्वाभाविकं भवितुमर्हति तथा सति तस्य परसाहाय्यापेक्षानुपपत्तेः । न हि किञ्चिदपि स्वाभाविक सत् परसाहाय्यापेक्षि दृष्टचरम् । यदात्मलाभाव परसाहाय्यमपेक्षते न तत् स्वाभाविकम्, अपितु नैमित्तिकम् । उपलभ्यमानञ्च ज्ञानैश्वर्यादिकं नियमेन परसाहाय्यमपेक्षते इति सर्वविदितमेव । एवं ज्ञानैश्व-र्यस्य नैमित्तिकत्वे साम्प्रतमिव सर्गादावपि भवितव्यं तस्य केनचिन्निमित्तेन, नैमित्तिकस्य निमित्तमन्तराऽनुपलब्धेः । न हि विना निमित्तं कस्यचिन्नैमि-त्तिकस्य अस्तित्वमुपलभेमहि । नैमित्तिकं च स्वाभाविकं चेति विप्रतिषिद्धम् । सर्गादिभुवो मानवास्तु अनधीतविषयत्वेन अनधिगतार्थत्वेन च समानमतयः कथ परस्परं ज्ञानैश्वर्यविनिमयाय निमित्तभावमुपगच्छेयुः, असति च ज्ञानैश्वर्य-शालिनि कस्मिंश्चिदलौकिके शक्तिशालिनि अद्य यावज्जगदान्ध्यमेव प्रसज्येत । जडञ्च प्रधानादि स्वयं तादृशज्ञानैश्वर्यपरिणामाय विभवितुमसमर्थम् । परिशेष्यात् सर्वज्ञं सर्वशक्ति पारमार्थिकं किमपि वस्तु तेभ्यो वेदलक्षणया वाचा ज्ञानैश्वर्यं वितरतीति नूनं स्वीकार्यम् । योगसूत्रकारैः[२] पतञ्जलिरपि समर्थयति वृत्तमिदम् । यथा इदानीन्तनानामस्माकं वेदशास्त्रादिपरम्परया ब्रह्म एव ज्ञानैश्वर्यं प्रददद् गुरुः, तथा सर्गादिभुवां पूर्वेषामपि तादृशवेदशास्त्रपरंपरया ज्ञानैश्वर्यं प्रददद् गुरुर्विद्यत इति विज्ञेयम् । स च नास्मदादिवत् कालेना-

---

१. कुमारिल आह—'तेन यत्राप्युभौ धर्मौ व्याप्यव्यापकसम्मतौ ।
तत्रापि व्याप्यतैव स्यात् अङ्गं न व्यापिता मितेः ॥
(श्लो. वा. अनु. श्लो. ६)

२. "स एष सर्वेषामपि गुरुः कालेनाऽनवच्छेदात्" (यो. सू. १।२६)

वच्छिद्यते । एतादृशं शास्त्रं न निर्मूलं भवितुमर्हति, यच्च तन्मूलं तदेवास्माकं ब्रह्म, शास्त्रयोनिः जगत्कर्ता ईश्वर इति । भगवती श्रुतिरेव[1] न केवलं जैनजनगणश्रद्धेय आप्तम् आप्तपरीक्षाकारोऽपि एवमेवाह[2] । स खलु जगत्कर्तारमीश्वरमनङ्गीकुर्वन्नपि श्रेयोमार्गसिद्धिं परमेष्ठिनः सकाशादेव मन्यते । एतच्च भङ्ग्यन्तरेण श्रुतिसिद्धान्तानुसरणमेवाभिव्यनक्ति । इत्थं भूतचैतनिकवादादिनिरसने न्यायशास्त्रस्य महानुपकारः । अस्य शास्त्रस्य तर्कापरपर्यायमीमांसाद्वयसाहाय्यपर्यवसायितया वैदिकमार्गरक्षणाय परमोपादेयतायां न कस्यापि वैमत्यम् ।

यद्यपि अनीश्वरवादिषु मीमांसाशास्त्रस्यापि परिगणनं लोकैः क्रियते, तत्समर्थने च विद्वद्भिः श्लोकवार्तिक न्यायकणिकादि ग्रन्थाः पुरस्क्रियन्ते, तच्छ्रुत्वा अनीश्वरवादिनो वदन्ति यत् धर्मरक्षणगृहीतदीक्षैरेव जगत्कर्ता ईश्वरः परास्यते तत्रास्माभिरेव किमपराद्धं तदनङ्गीकारविषये ? किन्तु तैरवगन्तव्यमिदम्—सर्वेषां वेदप्रामाण्याभ्युपगन्तॄणां वेदस्य तात्पर्यांशे मनागपि विरोधो न दृश्यते । यश्च विरोध इव प्रतीयते, सचाधिकारिभेदनिबन्धनतया—प्रक्रियाभेदनिबन्धनः । सर्वेषामास्तिकानां वेदप्रामाण्यं रिरक्षयिषितम्, तत् क्वचित् स्वतःप्रामाण्याङ्गीकारेण, क्वचित् परतः प्रामाण्याङ्गीकारेण । आद्यपक्षस्थापना ईश्वरानङ्गीकारेऽपि प्रौढिवादमुद्रया भवितुमर्हति । कथमन्यथा "ब्राह्मेण जैमिनिरुपन्यासादिभ्यः" (ब्र. सू. ४।४।५) इत्यत्र सर्वज्ञत्व-सर्वेश्वरत्वरूपेण स्वरूपाभिव्यक्तिं महर्षिर्व्यासो जैमिनिपक्षत्वेन समुपन्यास्यात्, अत्यन्तासतोऽभिव्यक्तेरनुपपत्तेः । नैके मीमांसकाः स्वस्व ग्रन्थेषु कुतश्च ईश्वराङ्गीकर्तृवत् मङ्गलमातेनिरेयदि तेषामीश्वरानङ्गीकारे आग्रहः स्यात् ।

श्रीकुमारिलभट्टपादेन श्लोकवार्तिकादौ—

---

१. "नकिरिन्द्र ! त्वदुत्तरो न ज्यायाँ अस्ति वृत्रहन् ! नकिरेवा यथा त्वम् ।" (ऋ. ३।६।१०।१)

"न तत्समश्चाभ्यधिकश्च दृश्यते"—(श्वे. उ. ६ ८)—

२. "परमेष्ठी हि भगवान् परमोऽर्हन् तत्प्रसादात् परमागमार्थनिर्णयोऽपरस्य परमेष्ठिनो गणधरदेवादेः सम्पद्यते, तस्माच्चापरपरमेष्ठिनः परमागमशब्दसन्दर्भो द्वादशाङ्गः ।"

— (आप्तपरीक्षा)

विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ।
श्रेयःप्राप्तिनिमित्ताय नमः सोमार्धधारिणे ॥

श्रीपार्थसारथिमिश्रेन न्यायरत्नमालायाः प्रारंभे—

आनन्दममृतं ज्ञानमजं साक्षिणमीश्वरम् ।
ब्रह्म सर्वमसर्वञ्च वन्दे देवं हरिम्प्रभुम् ॥

श्रीशंकरभट्टेन मीमांसासारसंग्रहे—

नत्वा गणेशवाग्रामगुर्वङ्घ्रीन् भट्टशङ्करः ॥

श्रीवाचस्पतिमिश्रेण न्यायकणिकादौ—

परामृष्टः क्लेशैः कथमपि न यो जातु भगवान् ॥

श्रीकृष्णयज्वना मीमांसापरिभाषादौ—

सूर्यनारायणं वन्दे देवीं त्रिपुरसुन्दरीम् ॥

श्रीमदापदेवेन मीमांसान्यायप्रकाशे—

यत्कृपालेशमात्रेण पुरुषार्थचतुष्टयम् ।
प्राप्यते तमहं वन्दे गोविन्दं भक्तवत्सलम् ॥

श्रीखण्डदेवेन भाट्टदीपिकादौ—

विश्वेश्वरं नमस्कृत्य खण्डदेवः सतां मुदे ।

एवंच पूर्वमीमांसकानामीश्वरनिराकरणविषये तात्पर्यं कदाचिदपि नास्तीति सुदृढं वक्तुं शक्यते । यद्यपि श्रुतिमार्गे बद्धश्रद्धानामास्तिकानां वैदिकतत्त्वनिर्णयाय निरस्तसमस्तपुंदूषणतया वेदा एव प्रमाणं, तथापि वेदप्रामाण्याऽनभ्युपगन्तॄणां दुर्दान्तचार्वाकादीनामाधुनिकानां भौतिक वादिनां कुतर्कजालकृन्तनाऽकुण्ठकर्तरीभावङ्गतस्य आर्यजनपरिगृहीतागमप्रामाण्यविप्लावन तत्पराऽऽधुनिकविज्ञानवादिकुतर्क ठाकुरकुण्ठीकारणक्षमस्य भारतीयतर्कशास्त्रस्य परमोपयोगे न कस्यापि संशीतिः ॥

—[०]—

अपभ्रंशभाषा

डॉ० देवेन्द्रकुमार शास्त्री

संस्कृतस्य प्राचीने वाङ्मये "अपभ्रंश" शब्दो भूम्ना लभ्यते । तत्र क्वचिदसौ विकृतिवाचको दृश्यते क्वचिच्च भाषा-वाचकः । निबन्धेनानेन एतत्सर्वमेव संक्षिप्य प्रस्तूयते । तत्र

अपभ्रंश प्रयोगाः

पाणिनीये महाभाष्ये शेषावतारो भगवान् पतञ्जलिरुदीरयति—

'भूयांसोऽपशब्दाः, अल्पीयांसः शब्दाः ।
एकैकस्य हि शब्दस्य बहवोऽपभ्रंशाः । तद्यथा
गौरिति शब्दस्य गावी गोणी
गोता गोपोतलिका इत्येवमादयोऽपभ्रंशाः ॥[1]

वाक्यपदीय-नाम्नि व्याकरणागमे भर्तृहरिणाप्युच्यते—

साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते ।
तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते ॥
पारम्पर्यादपभ्रंशा विगुणेष्वभिधातृषु ।
प्रसिद्धिमागता येषु तेषां साधुरवाचकः[2] ॥ इति ।

कः पुनरपभ्रंशो नाम--

कः पुनरपभ्रंशो नामेति जिज्ञासायां वाक्यपदीयकार एव तत्रभवान् भर्तृहरिदेवं प्रतिपद्यते—

'शब्दः संस्कारहीनो यो गौरिति प्रयुयुक्षितः ।
तमपभ्रंशमिच्छन्ति विशिष्टार्थनिवेशिनम् ॥[3]

एतेनेदं स्पष्टं यत् 'संस्कृतादतिरिक्तं यदपि किञ्चित् तत् सर्वं शब्द-संस्कारहीनत्वात्, शब्दशास्त्रनियमरहितत्वात्, संस्कृतशब्दानुशासनासिद्धत्वाच्च 'अपभ्रंश' इति उच्यते ।

---

१. महाभाष्ये १.१.१

२. वाक्यपदीये, ब्रह्मकाण्डे १४८

३. तत्रैव १।१४८

अपभ्रंश-शब्दस्य भाषा-मिधायित्वं पुनस्तस्य साधुशब्दस्येवअर्थप्रकाशक-त्वात्कृतिवचनेभ्यः स्पष्टम् । तथा चाह संग्रहकारः—

'शब्दप्रकृतिरपभ्रंशः' इति,

वाक्यपदीयेऽपि—

'अस्व-गोण्यादयः शब्दाः साधवो विषयान्तरे ।

निमित्तभेदात् सर्वत्र साधुत्वं च व्यवस्थितम् ॥' इति,

नागेशभट्टोऽपि—

'सा च शक्तिः साधुष्विवापभ्रंशशब्देस्वपि ।' इति,

वैयाकरणभूषणसारेऽपि—धात्वर्थ-निर्णयविषये—

असाधुत्वेऽपि साधुत्वभ्रमाद् बोधोऽस्तु नाम अपभ्रंशवत् । इति,

लघुमञ्जूषाटीकायामपि—

'अपभ्रंशाः साधुशब्दैरभेदमिव प्रतिपन्ना अर्थस्य प्रकाशका' । इति ।

एवं हि अपभ्रंश-शब्दाः स्वतन्त्रशक्तिसम्पन्नतया स्वातन्त्र्येणैव 'भाषा'-रूपतां प्राप्नुवन्ति । अत्र प्रश्न :—

किं प्राकृतस्य प्रकृतिः संस्कृतम्

योऽयमुपरितनो विकृति-मात्रप्रतिपादकः अपभ्रंशशब्दः तेन प्राकृतमपि क्रोडीक्रियते । तर्हि को नु भेदः प्राकृतादस्यापभ्रंशपदवाच्यस्य भाषाभेदस्य । अत्र केचिद् भाषा-विभाषा-कल्पनया, प्रकृतिविकृतिकल्पनया वा समाधान-मिच्छन्ति । तत्र प्राकृतं संस्कृतादुत्पन्नं संस्कृतविकृतिरिति मन्यमानो

१. मार्कण्डेयः[1] 'प्रकृतिः संस्कृतम् , तत्र भवं प्राकृतमुच्यते' इति,

२. सिंहदेवगणिः[2] 'प्रकृतेः संस्कृतादागतं प्राकृतमि- ति,

३. धनिकः[3] प्राकृतेरागतं प्राकृतम् , प्रकृतिः संस्कृतम्' इति,

४. अभिनवगुप्तः[4] 'अव्युत्पादितप्रकृतेस्तज्जनप्रयोज्यत्वात् प्राकृतमिति केचिदि'—ति

---

१. प्राकृतसर्वस्वे

२. वाग्भटालङ्कारटीकायाम्

३. दशरूपकटीकायाम्

४. अभिनवभारत्य म्

५. नरसिंहलक्ष्मीधरौ[1] 'प्रकृतेः संस्कृतायास्तु विकृतिः प्राकृतीमता' इति,

६. चण्डः[2] 'सिद्धं प्राकृतं त्रेधा भवति, संस्कृतं योनि' रिति,

७. हेमचन्द्रः[3] 'प्रकृतिः संस्कृतम्, तत्रभवं तत आगतं वा प्राकृतम्' इति,

८. वासुदेवः[4] 'प्राकृतस्य तु सर्वमेव संस्कृतं योनि'-रिति

९. प्राकृतचन्द्रिका-कारश्च 'प्रकृतिः संस्कृतम्, तत्र भवत्वात् प्राकृतमि'-ति

तेषु तेषु सन्दर्भेषूदाहरन्ति। अत एव च ई. बी. कावेल-भण्डारकर प्रभृतयोऽपि प्राकृतं संस्कृतयोनिकमेव मन्वते।

तथाहि भाष्यकारेण पतञ्जलिना यथा "सिद्धे शब्दार्थसंबंधे" संस्कृतशब्दानामनुशासनप्रवृत्तिरसूचि तथैव प्राकृतशब्दानां संबंधप्रयोजकतासंसूचनाय शब्दरूपसिद्धिविषये "संस्कृतं प्रकृतिः, तत्र भवं तत आगतं वा प्राकृतम्" इति सशूचितम्। अतएव 'प्रकृति' शब्देन नात्र 'योनि', अपितु "रचनाऽऽकारः (मॉडल) एव संस्कृतशब्दशास्त्राणां मन्तव्यः। प्राकृतमञ्जर्यां प्राकृतप्रकाशस्य पद्यविवृतौ तदित्थं विवेचितम्[5]—

> एषामपरिमेयत्वाद् दाढादीनां पदं प्रति।
> न शक्या गणना वीचिर्गणयेत् को नु सागरे।
> याः सर्वलोकसामान्याः संस्कृतानन्विता गिरः।
> अट्टमट्टप्रभृतयस्ताश्चाप्यत्रैव दर्शयेत्।
> संस्कृतप्रकृतित्वेन ये न सिद्धयन्ति केवलम्।
> तेषां लक्ष्येषु शब्दानां दाढादित्व विमृश्यताम्।

संस्कृतयोनि—संस्कृतभव—तज्जप्रभृतिशब्दानामप्याकृतमितोऽन्वद्वितर्क्यमाणं न समीचीनमाभाति। मानवानां सहजवचनव्यापाररूपप्रकृतिभवाः स्वभावसिद्धाः प्राग्भवा एव। प्राकृतशब्दाः, तत्र शब्दानुशासने तु ते संस्कृतप्रकृतिमुपादाय संस्कृतसंस्कारोत्कर्षणपूर्वं शापिताः। अतएवोपचारात् ते तत्र संस्कृतयोनयः संस्कृतभवाः संस्कृतजा इत्यादि रूपेणोच्चार्यन्ते। परमार्थतस्तु ते प्रागेव सिद्धाः। अतएव वाक्पतिराजेन गौडवधे—

---

१. लक्ष्मीधरः षड्भाषाचन्द्रिकायाम्

२. प्राकृतप्रकाशे

३. सिद्धहेमचन्द्रशब्दानुशासने

४. कर्पूरमञ्जरीटीकायाम्

५. अपभ्रंशकाव्यत्रयीभूमिकायाम् पृ० ८३

'सकलाश्चेमा वाचः प्राकृतमहार्णवाद् निर्यान्ति, तत्रैव च प्रविशन्ति' इत्याद्युदगारि, यायावरीयराजशेखरेण काव्यमीमांसायाम् 'तद् योनिः किल संस्कृतस्य' इत्यादि वदता तदेवासूचि, नमिसाधुना रुद्रटीयकाव्यालङ्कारस्य टिप्पनेऽपि च तथा व्याख्यायि। एवं विचार्यमाणे सति लक्षणाभिधाने न: शब्दशास्त्रे ये न सिद्धाः प्रकृतिप्रत्ययादिविभागेन च न निष्पन्नास्ते 'बज्जर–पज्जर–उप्फाल–पिसुण–संघ–बोल्ल–चव–जंप–सीस–साहादयः देशविशेषेषु प्रसिद्धाः शब्दा अनादिप्रवृत्तप्राकृतभाषाशब्दा एव। एत एव देशीशब्देनोच्यन्ते।

प्राकृतमेवापभ्रंशः

'पाणिन्यादिव्याकरणोदितशब्दलक्षणेन संस्करणात् संस्कृतमुच्यते। तथा प्राकृतभाषैव किञ्चिद्विशेषलक्षणान्मागधिका भण्यते। तथा प्राकृतमेव किञ्चिद्विशेषात् पैशाचिकं भवति। शूरसेन्यपि प्राकृतभाषैव। प्राकृतमेवाभ्रंशः'–इत्याख्यातं रुद्रटीयकाव्यालङ्कार–टीकायाम्। वस्तुतः प्राकृतभाषायाः प्रवृत्तिविशेषाः शब्दानां विभक्तीनां च परिवर्तनं विनिमयाश्च अपभ्रंशे परिलक्ष्यन्ते एव। ततश्च "प्राकृतमेवापभ्रंशः "कथनं नोचितम्। देशविशेषेषु सर्वा अपि भाषाः स्वतन्त्राः स्वनियमप्रकृतिबन्धनत्वात्। न काचित् भाषा काश्चिदपि भाषां जनयितुं समर्था। अयं हि भाषायाः शाश्वतो नियमः। तर्हि न प्राकृतस्य जन्म संस्कृताज्जातम्, न वा प्राकृतादपभ्रंशस्य। यथोक्तं नमिसाधुना "सकलजगज्जन्तूनां व्याकरणादिभिरनादृतसंस्कारः सहजो वचनव्यापारः प्रकृतिः, तत्र भवं सैव वा प्राकृतम्' इति।

पाणिनीयमहाभाष्ये निरूपितं खल्वेतत् पतञ्जलिना—

"एकैकस्य हि शब्दस्य बहवोऽपभ्रंशाः, तद्यथा गौरित्यस्य।
शब्दस्य गावी गोणी गाता गोपोतलिका इत्येवमादयोऽपभ्रंशाः।"

अतएव प्राकृतदेशीशब्देषु संस्कृताभिधानेष्वपि च अपभ्रंशबहुलाः प्रयोगाः दृश्यन्ते। यतस्त एव गावी, गोणी प्रभृतयः शब्दाः न केवलं प्राकृतभाषायामेव अपितु वर्तमानेऽपि बहुशः प्रयुक्ताः दृश्यन्ते। यथा—

आचाराङ्गे "खीरीणियाओ गावीओ", 'गोणं वियालं'।

(श्रु० २, उ० ४, ५)

आवश्यकचूर्ण्यां च—"गावीए पुण दिण्णं तणं पि खीरत्तणमुवेइ",
"व्यवहारसूत्रे "गोणीणं संगेल्लं" (उ० ४),

आवश्यक–निर्युक्तौ च "वच्छग गोणी खुज्जा०" 'गोणी चंदणकथा०'।
(गा० १३३, १३)

दशवैकालिकवृत्तौ "एत्थं गोणीए दिट्ठंतो।
अप्पाहुया उ गोणी।
गोणिसरिच्छो उ गुरु।"

चण्डकृते प्राकृतलक्षणेऽपि 'गोणांवी' (२,१६)

सिद्धहेमचन्द्रशब्दानुशासने 'गोणादयः' (८, २, १७४), देशीनाममालायां 'गोणो साक्षी वृषभश्च'।

पालिभाषायामपि 'गोण नम्हि वा' कच्चायनव्याकरणान्तर्गते।
(२, १, २६)

उक्तं हि—

गोणञ्चे तरमानानं उजु गच्छति पुङ्गवो।
सब्बा गावी उजुं यन्ति नेते उजुगते सति॥

अद्यापि बङ्गलाभाषायां गावीशब्दः गोवाचकः विद्यते। सिन्धीभाषायामपि तस्य प्रचलनं वरीवर्तते। एवं 'गावी' शब्दः गवार्थप्रकाशकः परिलक्ष्यते। गोणो च वृषभवाचकः तथा गोपोतलिका च युवावस्थां प्रपन्नां गामभिधत्ते। अतएवात्र शब्दार्थभेदकाः वैकल्पिकरूपेषु प्रयुक्ताः भाषाभेदं चोद्योतते। प्रतिपादितं यत् श्रीवास्तव महोदयेन :—

वैदिकी भाषा (वेदनिर्माणकाले या लोकानां भाषासीन्न केवलं वैदिकवाङ्मयस्यैव) नानाविधप्रयोगैः लोकजीवनं प्रतिबिम्बितमिव दर्शयति। अथर्ववेदस्य पृथिवीसूक्ते 'नानाधर्माणं विवाचसं' जनं बिभ्रतीं भूमिं स्तुवता ऋषिणास्यैव पक्षस्य प्रदर्शनं विहितम्। सा वैदिकी भाषा शनैः शनैः लोकभाषातः पृथगस्तित्वं प्रातिशाख्येषु पाणिनीयव्याकरणे चालभत[1]।" इति। पाणिनीयसूत्रेषु 'भाषा' शब्दस्य यास्काभिमते एवार्थे प्रयोगः। वैदिकभाषार्थं पुनः 'छन्दस्' 'निगम' इत्यादि शब्दानां तत्र प्रयोगः। पातञ्जलमहाभाष्यस्यापि 'शब्दानुशासनम्। केषां शब्दानाम्? लौकिकानां च' इति वाक्यं ध्वनयति लौकिकशब्दाः यास्कपाणिन्यभिमतायाः लोकप्रयुक्तायाः भाषाया एव। एवमीसातः

---

१. विद्यावाचस्पति वीरेन्द्रश्रीवास्तवः अपभ्रंश भाषा का अध्ययन,
परिशिष्ट २, पृ० २७७

पूर्वमष्टशताब्दीत [illegible] यावद् [illegible] संस्कृतम[illegible]थमेव विद्यते। परस्ताद् भाषाशब्दो हि प्राकृत-देशी-नामरूपेणाख्यातः। उक्तञ्च शाकुन्तलटीकायां शंकरेण—"संस्कृतात् प्राकृतं श्रेष्ठं ततोऽपभ्रंशभाषणम्" (शा० ना० ६, १०)। अतोऽपभ्रंशो मध्यकालिकभारतीयार्यभाषाणामन्तिमावस्था कथ्यते। सा ह्याधुनिकभारतीयार्यभाषाणां जननी निरूपिता भाषाविद्भिः।

अपभ्रंशभाषायाः प्राचीनतमं निदर्शनं महाकविकालिदासस्य रूपके विक्रमोर्वशीये भरतमुनेर्नाट्यशास्त्रे च दृश्यन्ते। विक्रमोर्वशीये चर्चरीनृत्यगानस्य द्वादशचर्चरीपद्यान्यपभ्रंशभाषायां रचितानि लभ्यन्ते। प्राकृतापभ्रंशभाषायां 'चच्चरी', 'चाचरि' इति नाम्ना संस्कृतभाषायां च 'चर्चरी' इति संज्ञया प्रसिद्धाया गीतेर्नृत्यपूर्वं गानक्रीडनगुम्फनादपद्धतिः प्राचीना परिज्ञायते।[१] नाट्ये विक्रमोर्वशीये खलु देशीविधाभिधाने चर्चरीरचनाया प्रस्तुतं विधानमुचितमेव। (उपविश्य चर्चरी)

रे रे हंसा किं गोइज्जइ। (इति नर्तित्वा उत्थाय)
हउं मइं पुच्छिमि अक्खहि गअवरु
ललिअपहारें णासिअतरुवरु।
दूरविणिज्जिअ ससहरुकन्ती
दिट्ठी पिअ पइं संमुह जन्ती।

(विक्रमोर्वशीये ४।२२)

(अनन्तरे चर्चरी)

मोरा परहुअ हंस विहंगम
अलि गअ पव्वअ सरिअ कुरंगम।
तुज्झइ कारण रण्ण भमन्ते
बहु बहु पुच्छिअ मइं रोअन्ते॥ तत्रैव ४।३०

तथा च

हंसविहंगमु कुंकुमसंखकआभरणु
करिमअराउलकसणलकमलकआवरणु।
वलासलिलुव्वेल्लिअसरथदिण्णतालु
ओध्थरइ दस दिस रुन्धेविणु णवमेह आलु॥

—तत्रैव ४।२६

इत्येवमपभ्रंशप्रयोगा लभ्यन्ते । नाट्यशास्त्रे चैवम्—

मोरल्लउ नच्चन्तउ ।
महागमे संथन्तउ ॥ ना० शा० ३२।६६
मेह उट्ठउ ठोई जोहउं ।
णिच्च णिप्पहे एस चन्दउ ॥ तत्रैव ३२।७४

षष्ठशताब्द्यां भामहेन स्पष्टं चोदितम्—

शब्दार्थौ सहितं गद्यं पद्यञ्च तद्द्विधा ।
संस्कृतं प्राकृतं चान्यदपभ्रंश इति त्रिधा ॥ का० १।१६

एवमुल्लेखपुरस्सरेण स्पष्टमेव ज्ञायते षष्ठशताब्द्यां संस्कृतप्राकृतवदपभ्रंशोऽपि काव्यस्य भाषाऽऽसीत् । प्रसिद्धालङ्कारिकेण दण्डिना तस्याभिधानं 'आभीरादिगिरः' इति वचनात् निरूपितम् । उक्तञ्च—

आभीरादिगिरः काव्येष्वपभ्रंश इति स्मृताः ।
शास्त्रेषु संस्कृतादन्यदपभ्रंशतयोदितम् ॥ —काव्यादर्श १।३६

काव्यादर्शस्य काव्यलक्षणटीकायां आचार्यरत्नश्रीज्ञानेन व्याख्या व्यधायि । तत्रैवोक्तम् ।

आभीरा वाहिका । आदि शब्देन ढक्कादिपरिग्रहः । तेषा गिरो भाषा अपभ्रंश इति अपभ्रंशनाम्ना व्यपदिश्यत इति स्थितिर्व्यवस्था । कुत्रेत्याह-काव्येषु गद्यपद्यमिश्रात्मकेषु कविप्रयोगेषु । अपभ्रंशोऽपि प्राकृतवच्चतुर्धा स्मर्यते । शब्दभवं शब्दसमं देशीयं सर्वशब्दसामान्यम् । प्राकृतवदपभ्रंशं जानीहि चतुर्विधमाहितम् ।" इति भरतमुनिना 'आभीरोक्तिषु' या भाषा 'उकारबहुला' भाषा कथिता सा अपभ्रंशभिन्ना नास्ति । तथा चोक्तम्—

हिमवत्सिंधुसौवीरान्ये जनाः समुपाश्रिताः ।
उकारबहुलां तज्ज्ञस्तेषु भाषां प्रयोजयेत् ॥ ना० १७।६२

लंकेश्वरकृता प्राकृतकामधेनौ उकारबहुला भाषा अपभ्रंश इति कथिता । 'उः' पदान्ते अकारस्य स्थाने भवति, यथा—घरु, पिउ, सुन्दरु, पहु, चलउ, घरु, खरु, सुरसु, सरु, सासु प्रभृतिः । अपभ्रंशभाषाविषये राजशेखर उद्धरति श्लोकद्वयम्—

एकोऽर्थः संस्कृतोक्त्या सुसुकविरचनः प्राकृतेनापरोऽस्मिन्
अन्योऽपभ्रंशगीर्भिः किमपरमपरो भूतभाषाक्रमेण ।
द्वित्राभिः कोऽपि वाग्भिर्भवति चतसृभिः किञ्च कश्चिद् विवेक्तुं
यस्येत्थं धीः प्रगल्भा स्नपयति सुकवेस्तस्य कीर्तिर्जगन्ति ॥

---

१. द्रष्टव्यम् 'अपभ्रंशकाव्यत्रयी', पृ० ११४

गौडाद्याः संस्कृतस्थाः परिचितरुचयः प्राकृते लाटदेश्याः
साप‌भ्रंशप्रयोगाः सकलमरुभुवष्टक्कभादानकाश्च ।
आवन्त्याः पारियात्राः सह दशपुरजैर्भूतभाषां भजन्ते
यो मध्ये मध्यदेशं निवसति स कविः सर्वभाषानिषण्णः ॥

—काव्यमीमांसा १०।९–१०

बालरामायणेऽपि तेन तथैवोच्यते—

गिरः श्रव्या दिव्याः प्रकृतिमधुराः प्राकृतधुरः
सुभव्योऽपभ्रंशः सरसरचनं भूतवचनम् ।
विभिन्नाः पन्थानः किमपि कमनीयाश्च त इमे
निबद्धा यस्त्वेषां स खलु निखिलेऽस्मिन् कविनृपा ॥ (१।११)

तथा—"पश्चिमेनापभ्रंशिनः कवयः । तथा—

"सकलमरुभुवष्टक्कभादानकाश्च" (का० मी० अ० १०)

अपभ्रंशकाव्यत्रयी सम्पादकस्य शब्देषु उपलभ्यमानैः प्रमाणैः प्रतीयते खलु विक्रमीयप्रथमशताब्द्याः पूर्वमप्यपभ्रंश—भाषायां गद्यपद्यमयानि काव्यानि स्युरिति । छन्दोलक्षणं काव्यालङ्कारानुशासकैः पिङ्गलभामहस्वयम्भूहेमचन्द्र—प्रभृतिभिरन्यैरपि च भाषात्रयं तत्काव्यमसूचि । तथा च शकसंवत् ४०० तम-वर्षीये धरसेनताम्रपत्रे—

"संस्कृतप्राकृतापभ्रंशभाषात्रयप्रतिबद्धप्रबन्धरचनानिपुणतरान्तःकरणः"—

वलभीराजधरसेनशिलालेखः

(इण्डियन एण्टिक्वेरी १०,२८४)

अपभ्रंशभाषायाः प्राचीनतमं गद्यम् अश्वघोषस्य शारिपुत्रप्रकरणे, भासस्य पंचरात्ररूपके, शूद्रकस्य मृच्छकटिके, दाक्षिण्यचिह्नउद्योतनसूरेः कुवलयमालाकथायां, विविधप्राकृतग्रन्थेषु टीकाया चोद्धृतं समुपलभ्यते । उदाहरणार्थं कुवलयमालाकथायाम्—

"अण्णेण भणिअं—हुं हुं कहिउ वुत्तंतउ तेण जंपिएल्लउ । कहिं कोट । कहिं वाणारसि । मूलत्थाणु भडारउ भो काढइ जे देइ । उद्दालिलोअहुँ । अण्णेण भणिअं—काइं इमेण जत्थ चिरपरूढ पाउ फिट्टइ, तुब्भे उद्दिसह तित्थ । तत्थ वि सग—जवण—बब्बर—चिलाय—खस—पारस—भिल्ल—मुरंडाड्ड—बोक्कस—सबर—पुलिन्द—सिंघआइसु—परिभमंतस्स दुल्लहं चिय सुकुल—जम्मं ति । तत्थ वि काण—कुंट—मुंट—अंध—बहिर—कल्ल—लल्लायंगमो होइ । तथा—'तेरे मेरे आउ' त्ति जंपिरे मज्झदेसे य । 'एगे ले' जंपिल्ले अह पेच्छइ मागहे कुमारे ।" इति ।

उक्तं हि आख्यानकमणिकाशे सोमप्रभाख्यानके—

जहिं बिल्ल-पलासह तरुवराहं, पायउ अइ महिगउ होइ ताहं।
अह खंजरीडसंजोउ होइ, ता तत्थ निरुत्तु निहाणु जोइ।
जो पायउ रत्तइं रसिण जुत्तु, सो रयणहनिहिं अक्खइ निरुत्तु।
पीइं रसेण कंचणु विमिट्ठु धवलई कलहोउ मुणिंदु सिट्ठु॥

तथा उक्तिव्यक्तिप्रकरणेऽपि पण्डित दामोदरेण उक्तं— [१२।६]

देशे देशे लोको वक्ति गिरा अष्टया यया किञ्चित्। सा तत्रैव हि "संस्कृतरचिता वाच्यत्वमायाति॥६॥ प्रतिदेशभिन्ना येयं सर्वजनसाधारणा भाषा गावी गोणी प्रभृतिका सोऽपभ्रंश उच्यते।

ततो देशे-देशे प्रतिविषयं लोकः पामरजनो यया यया गिराऽपभ्रष्टया यत् किञ्चिदभिधेयं वस्तु वक्ति व्यवहरति साऽपभ्रंशभाषा।' यथा 'भाषा' भिधानेन—

भाषायाम्—

सूपें पच्छोड।
अँधारीं रौतिं चोरु ढूक।
आगि लागें बांस फूट।
छूट वाछा भमि भमि कूद।
पूतकरें बधावें नाच।

उक्तिरत्नाकरेऽपि देशीशब्दानां बहुलता दरीदृश्यते। अन्य राजस्थानी-भाषायां निबद्धेषु ग्रन्थेषु अपभ्रंशभाषाया निदर्शनं समुपलभ्यते। परवर्तीकाव्य-ग्रन्थेषु 'अवहंस' शब्देनापि अपभ्रंशस्योल्लेखो भवति। महाकवि पुष्पदन्तेन महापुराणे स्पष्टमुक्तम्—

सक्कउ पायउ पुणु अवहंसउ।
वित्तउ उप्पाइउ सपसंसउ॥

महा० ५, १८, ४

विद्यापतिः स्वकृतिकीर्तिलतायामपभ्रंशविषये मर्म प्रकाशयति—

सक्कय वाणी बुहय न भावइ।
पाउअ रस को मम्म न जानइ॥

देसिलबअना सब जन मिट्ठा ।
तैं तैसन जम्पओ अवहट्ठा ॥

अर्थात् संस्कृतवाणी बुधजनं न भावयति । प्राकृतरसस्य मर्मं न जानाति । देशी वचनानि सर्वजनमिष्टानि । अतः तादृशं जल्पामि अवहट्टम् ।

विद्यापतेःकीर्तिलता अपभ्रंशभाषायामेव रचिता । तस्योदाहरणं द्रष्टव्यम्—

तिहुअण खेत्तहि काइं तसु किंत्तिवल्लि पसरेइ ।
अक्खर खंभारंभ जउ मंचा बंधि न देइ ॥

प्राकृतपैंगलच्छन्दशास्त्रेऽपि अपभ्रंशभाषायां विविधरचना उद्धताः। कवितिल्हणस्य रचितं 'कुट्टणि' रासकमपि समुपलभ्यते । अतएव न केवलं जैनबौद्धवाङ्मये अन्येषा चापि रचनायामपभ्रंशस्य श्रेष्ठं निदर्शनं प्रतिपद्यते ।

यथा—

पअभरु दरमरु धरणि तरणि रह धुल्लिअ झंपिअ,
कमठपिट्ट दरमरिअ मेरु मंदर सिर कंपिअ ।
कोह चलिअ हम्मीर वीर गअजूह संजुत्ते,
किअउ कट्ट हाकंद मुच्छि मेच्छहके पुत्ते ॥

—प्रा० पैं ९८

कवितिल्हण स्वररचनाचातुरीं प्रकटयितुं काव्याभिनिवेशमुपनिबद्धयति । यथा—

सरस डक्क डहइ सरस मंदलरउ घुम्मइ ।
रणझणझणझंकारु सरस किंकिणिरउ गुम्मइ ॥
रसवसकस उल्हसइ वसुहलीला पउ दिंतह ।
झलहलंत सत्तउ समुद्द जसु णित्तु करंतह ॥

तथा—

छंदु लक्खणु णहु अलंकारु, णहु देसभाषा मुणहु ।
सुकइ गंथु णहु किंपि, दिट्ठउ जडउ ॥

अब्दुर्रहमानः स्वविरचिते सन्देशरासककाव्ये वर्णयति—

जसु पवसन्त ण पवसिआ मुअइ विओइ ण जासु ।
लज्जिज्जउ सन्देशडउ दिन्ती पहिय पियासु ॥

अतएवोपलभ्यमानैः प्रमाणैः सिद्धयति भाषापभ्रंशः स्वतन्त्रभाषारूपेण प्राकृतकालादुत्तरमेव विशिष्टं स्थानमलभत। अस्याः भाषायाः प्रचलनं भारतीयेतिहासस्य गुप्तकाले संजातः। भामहस्य समये अपभ्रंशभाषा-काव्य-रचना सम्यक्प्रकारेण संस्कृत-काव्यरचनावदेवासीत्। दशमशताब्धामस्य विशेषोत्कर्षमासीत्॥ अतएवानन्दवर्द्धनेनापि तस्योल्लेखो व्यधायि—

"यतः काव्यस्य प्रभेदा मुक्तकं संस्कृतप्राकृतापभ्रंशनिबद्धं सन्दानित-कविशेषककलापककुलकानि। पर्यायबन्धः परिकथा खंडकथा सकलकथे सर्गबन्धोऽभिनेयार्थमाख्यायिका कथे इत्येवमादयः। तदाश्रयेणापि सङ्घटना विशेषवती भवति। तत्र मुक्तकेषु रसबन्धाभिनिवेशिनः कवेस्तदाश्रय-मौचित्यम्।" (ध्वन्यालोकः ३, ७)

इत्थमपभ्रंशभाषाया जातिविशेषेण सम्प्रदायविशेषेण च सम्बन्धनं नोचितम्।

—:०:—

रसगंगाधरे रत्नाकरस्य सन्दर्भाः

श्री विहारि लालशर्मा

तैलङ्गदेशनिवासिनः पेरुभट्टस्यात्मजः पण्डितराजजगन्नाथः यवनशासकस्य शाहजहाँनामकस्य राज्ञः सभापण्डित आसीत्। अतोऽस्य समयः १६०० ईसवी वर्तते। अनेन बहवो काव्यग्रन्थाः विरचिताः। अस्य रसगङ्गाधरनामा ग्रन्थः साहित्यशास्त्रस्य सर्वाधिकः मर्मप्रकाशकः। यस्मिन् अलङ्काराणामतीव मनोरम-पद्धत्या विश्लेषणं कृतम्। एतेन विभिन्नेषु अलङ्कारप्रसङ्गेषु रत्नाकरस्य सन्दर्भाः गृहीताः। कुत्रचित् खण्डनं कुत्रचित् मण्डनं च कृतम्। अनेन रस-गङ्गाधरस्योपरि रत्नाकरस्य महान् प्रभावः दृश्यते। तथाहि—

उपमा

रत्नाकरकारः प्रसिद्धगुणेन उपमानेन अप्रसिद्धगुणस्य उपमेयस्य सादृश्ये उपमां ब्रवीति। जगन्नाथस्तु श्लेषमूलकोपमायां श्लिष्टशब्दस्य साधारणधर्मतया विवक्षितस्य कविकल्पितत्वेन उपमानगुणत्वेन अप्रसिद्धेस्तत्राव्याप्तेः, प्रसिद्ध-गुणत्वेन रूपेण उपमानस्य क्वापि प्रसिद्धत्वाभावात् लक्षणेऽस्मिन् अव्याप्तिनामकं दोषं दर्शयति। एतदित्थम्

"एवं प्रसिद्धगुणेन, उपमानेन अप्रसिद्धगुणस्य उपमेयस्य सादृश्यम् उपमा इत्यलङ्काररत्नाकरोक्तमपि लक्षणं न भव्यम्। श्लेषमूलकोपमायां तादृशशब्दा-त्मकस्य धर्मस्य कविनैव कल्पनात् तेन रूपेण उपमानस्य अप्रसिद्धेश्च।"

उपमेयोपमा

रत्नाकरकारेण[1] 'परस्परम् उपमानोपमेयत्वे उपमेयोपमा अलङ्कारः' निरूपितः। तत्र उपमानोपमेयत्वम् उपमानान्तरस्य निषेधार्थम्। पण्डितराज-जगन्नाथः तस्य उदाहरणे उपमानान्तर-निषेधस्य अभावं दर्शयित्वा ग्रन्थविरोध-मेवं प्रदर्शयति—

यदपि[2] 'परस्परम् उपमानोपमेयत्वमुपमेयोपमा' इति लक्षणं विधाय—

१—अलङ्काररत्नाकरः पृ० ११

२—रसगङ्गाधरः उपमेयोपमाप्रकरणम् पृ० ४०७

सविता विधवति विधुरपि सवितरति तथा दिनन्ति यामिन्यः ।
यामिनयन्ति दिनान्यपि सुखदुःख वशीकृते मनसि ॥

इति पद्यं रत्नाकरेण उदाहारि, तच्च तदीयेनैव 'स च उपमानान्तरनिषेधार्थ' इति ग्रन्थेन विरुद्धम् । न हि अस्मिन् पद्ये उपमानान्तरनिषेधः प्रतीयते इति प्रागेव आवेदनात् । प्रतीयते एवेति चेत्, पुनरपि पृच्छ हृदयमेव स्वकीयम् ।'' इति ।

अनन्वयः

रत्नाकरकारः[1] अनन्वयस्य

१. उपमानतया कल्पितेन तेन सादृश्यम् अनन्वयः,

२. उपमानतया कल्पितेन तदेकदेशेन सादृश्यमनन्वयः,

३. 'अवसितभेदेन तेन उपमानतया कल्पितेन सादृश्यमनन्वयः' इति ।

त्रिविधं लक्षणं कृतवान् । रसगङ्गाधरकारः अस्य लक्षणस्य अलङ्कारान्तरेषु अतिव्याप्तिं प्रदर्श्य तस्योदाहरणेऽपि असामाञ्जस्यमेवं प्रदर्शयति ।

यत्तु[2]—"तेन तदेशदेशेन अवसितभेदेन वोपमानतया कल्पितेन सादृश्यम् अनन्वयः । उपमेयेनैव उपमानतया कल्पितेन उपमेयस्यामुखावभासमानसाधर्म्योपादानम् एकः अनन्वयः, उपमेयैकदेशस्य तथैव उपमानताकल्पनम् अपरः । उपमेयस्यैव प्रतिबिम्बत्वादिना भेदेन अवसितस्य तावकल्पनं तृतीयः इत्यनन्वय-त्रिविधः इति रत्नाकरेण उक्तम् ।

तन्न । उपमानान्तरविरहमात्रादेव अनन्वयत्वे 'स्तनाभोगे पतन्भाति' इत्यत्र उपदर्शितायाः कल्पितोपमाया अपि तथात्वापत्तेः यद्यर्थातिशयोक्तौ अति-प्रसक्तेश्च । तादृशप्रतीतिफलकैकोपमानोपमेयकसादृश्यस्य तावे पुनः कथं नाम वामार्धदक्षिणार्धयोः भिन्नयोः सादृश्ये तद्भेदत्वोपन्यासः । न च स तदेकदेश-तत्प्रतिबिम्बश्च इत्येतदन्यतमप्रतियोगिकसादृश्यम् अनन्वयः इति क्वाव्याप्ति—रतिव्याप्तिः वेति वाच्यम् । नास्त्यन्वयोऽस्येति योगार्थविरहेण तदेकदेशसादृश्यस्य अनन्वयपदार्थत्वा,—सम्भवात् । अपि च अनन्वये 'गगनं गगनाकारम्' इत्यादौ उपमेयस्यैव उपमानत्वेन उपन्यासाद् उपमेयाति-रिक्तोपमानविरहप्रतीतिद्वारा निरुपमत्वम् उपमेयगतं सिद्ध्यति । अत्र च वामार्धस्य उपमेयस्य दक्षिणार्ध—

१—अलङ्काररत्नाकरः पृ० १०

२—रसगङ्गाधरे: अनन्वयप्रकरणम्

रूपोपमानकथनेन निरूपमत्वं विरुद्धमेव कान्तागत—निरुपमत्वप्रत्ययस्तु न अनन्वयस्य फलं भवितु मर्हति, तस्या अनुपमेयत्वात् ।" इति ।

रूपकम् सर्वस्वकारपर्यन्तं सर्वैरप्याचार्यैः सादृश्यमूलक आरोपः एव रूपकतया स्वीक्रियते परंतु शोभाकर[१]मित्रेण सादृश्येतरमूलक आरोपोऽपि रूपकत्वेन प्रतिपादितः । पण्डितराजजगन्नाथः रत्नाकरकारस्य मतं खण्डयति । तद्यथा —

रसगङ्गाधरकारः यत्तु [२] "सादृश्यप्रयुक्तः सम्बन्धान्तरप्रयुक्तो वा यावान् भिन्नयोः सामानाधिकरण्य—निर्देशः स सर्वोऽपि रूपकम् । सारोपलक्षणामूलकत्वस्य तुल्यत्वेन सादृश्यप्रयुक्तस्य तादात्म्यस्येव सम्बन्धान्तरप्रयुक्तस्यापि तादात्म्यस्य संग्रहीतुम् औचित्यात्, तस्माद् दुराग्रह एवायं प्राचाम्—उपमानोपमेययो अभेदो रूपकम् । न तु कार्यकारणयोः इति रत्नाकरेण उक्तम्, तन्न । अपह्नुत्यादौ भिन्नयोः सामानाधिकरण्यस्य सत्वात् तत्रातिव्याप्तेः । किञ्च सादृश्यमूलकं स्मरणं स्मरणालङ्कारः न तु चिन्तादिमूलम् इति भवतैव पूर्वमुद्रितम् । तत्र यदि सादृश्यामूलकस्यापि कार्यकारणादिकयोः कल्पितस्य ताद्रूप्यस्य रूपकत्वमभ्युपेयते तदा सादृश्यामूलकस्य चिन्तादिमूलस्य स्मरणस्यापि अलङ्कारत्वम् अभ्युपेयताम् । न च स्मरणस्य भावत्वम् उच्यमानं निर्विषयं स्याद् इति वाच्यम्, तस्य व्यज्यमानविषयत्वेन उपपत्तेः ।"

१—सादृश्यसम्बन्धनिबन्धनायाः अलंकृतित्वं यदि लक्षणायाः ।
साम्येऽपि सर्वस्य परस्यहेतोः सम्बन्धभेदेऽपि तथैव युक्ता ॥
अलङ्काररत्नाकर । पृ० ३३ पू० सं० १९४२

२—रसगङ्गाधरः रूपकप्रकरणम् पृ० ४८७ चौ० सं० १९६९

रसगङ्गाधरे रत्नाकरप्रभावः

जगन्नाथेन असमोदाहरणालङ्कारौ रत्नाकराद् एव गृहीतौ । अनयोः अलङ्कारयोः सर्वप्रथमं रत्नाकरकारेण एव उद्भावना कृता । तद् यथा—

असमः

रत्नाकरकारः—(सू०) तद्विरहोऽसमः । (वृत्तिः) उपमानस्य विरहोऽसम्भव तत्प्रतिपादनम असमाख्योऽलङ्कारः ।

अलङ्काररत्नाकरः पृ० ६

रसगंगाधरः उपमा प्रकरणम् पृ० २३६ द्वितीयो भागः

अलङ्काररत्नाकरः पृ० ११

यथा—

भ्रमर ! भ्रमता दिगन्तराणि क्वचिदासादितमीक्षितं श्रुतं वा ।
वद सत्यमपास्य पक्षपातं यदि जातीकुसुमानुकारि पुष्पम् ॥

अत्र च सामर्थ्यात् तथाविधं नास्तीति प्रतीयते ।

जगन्नाथः

(सू०) सर्वथैव उपमानिषेधोऽसमाख्योऽलङ्कारः ।

उदाहरणं यथाः—

भुवनत्रितयेऽपि मानवैः परिपूर्णं विबुधैश्च दानवैः

न भविष्यति नास्ति नाभवन् नृपः । यस्ते भजते तुलापदम् । राजस्तुल्यत्कर्षक-त्वाद् अत्र असमालङ्कारः ।

उदाहरणम्

शोभाकरमित्रः

(सू०) सामान्योद्दिष्टानाम् एकस्य निदर्शनम् उदाहरणम् ।

(वृत्तिः) सामान्येन अभिहितानाम् एकस्यैवाद्युपादान मुखेन प्रतीतिविशदी-करणार्थं निदर्शनम् उदाहरणालङ्कारः ।

उदारणं यथा—

अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम् ।
एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ।

जगन्नाथः

(सू०) सामान्येन निरूपितस्यार्थस्य सुखप्रतिपत्तये तदेकदेशं निरूप्य तयोर-वयवावयविभाव उच्यमान उदाहरणम् ।

उदाहरणं यथा—

अमितगुणोऽपि पदार्थो दोषेणैकेन निन्दितो भवति
निखिलरसायनराजो गन्धेनोग्रेण लशुन इव ।

रसगंगाधरः द्वितीयो भागः पृ० ४३३ अलंकाररत्नाकरः पृ० १२

इत्यत्र हिमकर्तृकसौभाग्याविलोपनरूपस्य विशेषस्य गुणसन्निपाते दोषनि-मज्जनं सामान्येन समर्थकतयाभिहितम् ।

अत्रामितगुणपदार्थसामान्यं प्रागुपवर्णितम्, ततस्तदेकदेशो विशेषभूतो ।
लशुनो निरूपितस्तयोश्चावयवावयोवभाव 'इव शब्देन बोधितः ।

रसगङ्गाधरस्य द्वितीये भागे पृ० ४४३

एवं प्रकारेण ७

त्वत्पादनखरत्नानां यदलक्तकमार्जनम् ।
इदं श्रीखण्डलेपेन पाण्डुरीकरणं विधोः ॥

इति सर्वस्वकारेण निदर्शनाप्रसङ्गे उदाहृतायां कारिकायां निदर्शनां खण्ड-यित्वा वाक्यार्थरूपकं साधितं पण्डितराजेन सः सर्वोऽपि रत्नाकरकारस्य एव प्रभावः ।

रसगङ्गाधरकारेण असमोदाहरण ७ नामकौ अलङ्कारौ रत्नाकराद् एव गृहीतौ । एवं रसगंगाधरस्य विभिन्नेषु स्थलेषु रत्नाकरस्य उल्लेखः उपलभ्यते ।

—:*:—

७—रसगङ्गाधरः निदर्शना प्रकरणम् पृ० १३६

८—रसगङ्गाधरः पृ० ४३३ द्वितीयो भागः

९—रसगङ्गाधरः पृ० ४४३ द्वितीयो भागः

कालिदासस्योपमा बिम्बश्च

संस्कृत-साहित्यस्य शीर्षस्थकेवः कालिदासस्योपमा—प्रयोगनैपुण्यं काव्य-जगति विशेषेण प्रसिद्धमस्ति। अत एव प्रायशः सर्व एव काव्यानुशीलिनो विद्वान्स 'उपमा कालिदासस्ये' त्युक्तिमाश्रित्य यत्किञ्चित्परम्परीणमैधषत। तस्यामेव सरण्यामहमप्यत्र पुनर्लेखनं चिकीर्षन्नप्याधुनिके सन्दर्भे कवेरुपमानां नवीनमूल्याङ्कने कृतप्रयत्नोस्मि।

कविः स्वानुभूतिप्रकाशने कलात्मकतामाश्रयते। असमात्कलासन्निवेशाभिनिवेशत्वादेवालंकाराणां विकासः समजनि। एवमलंकाराभावाभिव्यक्ते प्रमुखसाधनं, काव्यसौन्दर्याधानस्य प्रमुखमुपकरणञ्चेति। किन्तु नेदं विस्मर्त्तव्यं यत्सायासमलंकारविधानं काव्यसौन्दर्यं विकरोति। वस्तुतः 'कविप्रतिभानुग्रहवशादलंकाराणां स्वत प्रस्फुरणमेव' काव्यस्य नैत्रं वस्तु। तेष्वलंकारभेदबहुलेषु सादृश्यमूलकस्योपमालंकारस्य वैशिष्ट्यं समेषां काव्यरसज्ञानां विदितमेवास्ति। अप्पयदीक्षितस्तु 'उपमैषा शैलूषी सम्प्राप्ता चित्रभूमिकाभेदात्। रञ्जयति काव्यरङ्गे नृत्यन्ती तद्विदा चेत' इति कथनेनास्या माहात्म्यं प्राकाशयत्। काव्यशास्त्रिणोऽनयोक्त्या न केवलमुपमालंकारस्य महत्त्वं प्रतिपाद्यते, अपितु अस्य परिधेः परिमाणमपि भवति। रूपकोत्प्रेक्षादृष्टान्ताद्यलंकाराणां मुख्यो हेतुरुपमावत्साधर्म्यमेवातस्तेषामप्यन्तर्भाव इहोपमायामेव भवितुमर्हति। इत्थमुपमालंकारेणात्र सादृश्यमूलकाः समस्ता अपि अलंकारा बोधव्या न तु उपमात्रम्। तदर्थमपेक्षितेषु चतुर्षूपादानेषूपमेयोपमानवाचकसाधारणधर्मेषूपमानमेवातिशयमहत्त्वपूर्णमस्ति। उपमानमेवोपमेत्युक्तौ नातिरंजना स्यात्। सन्दर्भानुसार्यनुरूपोपमानचयनं कविकल्पनाप्रावीण्यं द्योतयति। महाकविः कालिदासः अस्मिन् कलाविधौ महान् कुशला इति निबन्धोऽय प्रकाशयति।

कवेरुपमानविवेचनात्पूर्वमत्राधुनिकपाश्चात्यसाहित्यासिद्धान्तस्य प्रमुखस्वीकृति-बिम्बस्यानुशीलनमपिप्रकृतोपयोगि स्यात्। भारतीयकाव्यशास्त्रे बिम्बविषयको विचारः स्वतन्त्रतया नोपलभ्यते। काव्यशास्त्रस्य कस्मिं विधायमस्यान्तर्भावो भवितुमर्हति, पृथक्त्वेन वा स्थिति रिति तु स्वतंत्रमीमांसाविषयः परमेतत्तु निश्चितमेवयत्बिम्बः कविकर्मणः साधनमेव, नतु काव्यस्यात्मकत्वम्। यथाह डॉ०

नगेन्द्रोपि—'बिम्ब काव्य का अत्यन्त प्रभावी माध्यम है, और इसलिए काव्य के सन्दर्भ में उसका मूल्य असंदिग्ध है; परन्तु वह स्वतंत्र नहीं है. माध्यम ही है, प्राणतत्त्व नहीं है; काव्य का सहकारी मूल्य अवश्य है, प्राथमिक मूल्य नहीं है।' —'काव्य-बिम्ब; पृ ६२।

अधिकस्पष्टरूपेण बिम्बस्य स्वरूपाधिगमने साम्यसाम्यदृष्टया तस्याध्ययनमुपमानेन सहावश्यकमस्ति। अत:, पूर्वं तल्लक्षणं ज्ञातव्यम्।सी० एफ्० स्पर्जियन-महोदया 'Shakespeare's imaginary and what it tells to us' इति ग्रन्थेबिम्बमित्थं परिभाषयति—'A description or an idea which by Comparison or anology; Stated or under stood, with Something else; transmits to us through the emotions and associations it arouses, something of the 'wholeness' the depth and richness of the the writers viewes, conceives or has felt what he is telling us. अर्थात् एकं वर्णनं भावो वा यत्तुलनयोपमया वा प्रस्तूयते वावगम्यते भावनात्मकतया सन्दर्भेण चान्वितं स्यात्, समग्रतां परिचापयेत्, तथा लेखकस्य गाम्भीर्यं समृद्धिं वावबोधयेत् प्रकाशयेच्च तस्याशयं यत्स किं कथयितुमीहत इत्यनेन स्पष्टं प्रतीयते यत्सादृश्यधिया बिम्बस्योपमानेन सह किंचित्सामीप्यमस्ति। काव्यस्य बाह्यपक्षीयत्वाच्छ्र्जनप्रक्रियया द्वयोः सम्बन्धः सुतरां सिद्धः। उभेप्यरूपभावात् रूपयतः। तथाप्यनयोर्भेदः। यतस्सर्वदाऽप्रस्तुतमेवोपमानं प्रयुज्यते। बिम्बस्तूभयत्र प्रस्तुताऽप्रस्तुतेपि संभाव्यते। प्रेषणीयताविरहेप्युपमानं काव्यालंकरणे सहायकत्वं भजते। किन्तु बिम्बेभावोत्तेजकत्वमपरिहार्यम्। चित्रात्मकत्वमैन्द्रियत्व–संवेदनशीलत्वौचित्यादिकञ्च बिम्बस्य मुख्यो गुणः। यथावोचत् आई० ए० रिचर्ड्स् महानुभावोपि—'Too much importance has always been attached to the sensory qualities of images, what gives an image efficacy is less its vividness as an image than its character as a mental event peculiarly connected with sensation;—Rene wellek इतिलेखकस्यtheoy of literature' इतिपुस्तके १६१ पृष्ठे। उद्धृतम्।

वस्तुतास्चित्रात्मकतया स्पष्टप्रतिभासमानत्वन्तु बिम्बस्य प्रकृतिरेव, संवेदनशीलत्वं भावोत्तेजकत्वं वा तस्यप्राधान्यं वैशिष्ट्यम्।

सम्प्रत्यप्रस्तुतविधानस्य प्रकृतिमवलम्ब्येह महाकवेरुपमाविवेचनं प्रस्तुवीमहे। प्रायेणाप्रस्तुतविधानस्य चत्वारो भेदा दृश्यन्ते। तद्यथा—अमूर्तप्रस्तुताय मूर्तोपमान विधानं, अमूर्तप्रस्तुतायामूर्त्तोपमानविधानं, मूर्तप्रस्तुतायामूर्तोपमानविधान मूर्तप्रस्तुताय मूर्तोपमानविधानञ्चेति तत्क्रमेणोदाहरणपुरःसरं निरूप्यते।

अमूर्तप्रस्तुताय मूर्तोपमानविधानम्—

> **कृत्ययोर्भिन्नदेशत्वाद् द्वैधी भवति मे मनः।**
> **पुरः प्रतिहतं शैलैः स्रोतः स्रोतोवहां यथा॥** शा० २।१८।

राज्ञो दुष्यन्तस्य पुरतो युगपदेव कार्यद्वयमुपस्थितमस्ति। एकत्रस्थितेन तेन द्वयोः सम्पादनं न संभाव्यते। स मातुराज्ञां परिपालयितुं हस्तिनापुरं प्रतिनिवर्तेद्वा तत्रस्थितस्सन्नाश्रमं राक्षसोपद्रवाद्रक्षेदित्यस्य मनो द्विविधया ग्रस्तमस्ति। अत्र राज्ञोऽमूर्तं मन एवोपमेयं प्रस्तुतं वा। तदर्थं शैलैः प्रतिहतं सरितो द्विधा विभक्तं पृथग्दिग्गामि स्रोतो मूर्तमुपानपदम्। राज्ञो मनसोऽस्थिरत्वमुद्विग्नत्व दोलायमानत्वादिकञ्चेतिसूक्ष्मभावं विभक्तसरित्प्रवाह-रूपमप्रस्तुतमेव सम्यक् प्रेषणीयतामापादायितुं शक्येत। इह सामान्यतया प्रवहन्त्याः सरितो विम्बः, अग्रत शिलासंघातप्रतिहतायाः प्रवाहद्वयात्मिकायाः सरितो बिम्बश्च सहजमेव सचेतसश्चेतसि प्रतिबिम्बितौ भवतः।

कविरिदमेवोपमानं विक्रमोर्वशीये किंचित्परि-वर्तनेन सह प्रयुनक्ति। यथा—

> **नद्या इव प्रवाहो विषमशिलासङ्कटस्खलितवेगः।**
> **विघ्नितसमागमसुखो मनसिशयः शतगुणो भवति॥** ३।८

उर्वशी प्रत्यासक्तः पूरूरवास्तन्मिलनहेतावतितरामातुरोप्यन्तरायत्वात्तत्समागमसुखमनुभवितुं न शक्नोति। अतोऽत्यधिकमेधमानस्तस्यामूर्तकाम एवात्र प्रस्तुतमस्ति। तत्कृते 'नद्याः प्रवाह' इति मूर्तं मुपमानपदम्। निम्नोन्नतशिलासंघातव्यवहितो नद्याः प्रवाहोऽतिशयवेगगामी भवतीति सर्वविदितमेवास्ति। 'रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णामिति' मेघदूते नर्मदाया वर्णन मप्यनुसन्धेयम्। प्रकृतोदाहरणे कामाभिभूतस्य पुरुरवसो मनसिजवेगं विषमशिलावत्या नद्या गतिशीलप्रवाहरूपो बिम्बः सुस्थमुद्भासयति।

मनसो विविधसूक्ष्मसंवेदनानां मनोवैज्ञानिक-विश्लेषणेऽद्वितीयोऽयं महाकविः। अस्मिन्नेव प्रसङ्गे मनोवैज्ञानिकनिरूपणे साम्यत्वादुक्तवर्गीकृतसीम्न्यसमाहितोप्ययं श्लोकः प्रस्तूयते—

तं वीक्ष्य वेपथुमती सरसाङ्गयष्टि—
निक्षेपणाय पदमुद्धृतमुद्वहन्ती ।
मार्गाचलव्यतिकराकुलितेव सिन्धुः
शैलाधिराजतनया न ययौ न तस्थौ ॥

—कु० ५।८५

कपटिनो वाचालस्य ब्रह्मचारिणः परुषवाक्प्रहारेण भृशमुद्विग्ना, विक्षुब्धा कुपिता च पार्वती यावदेव ततश्चलितुमचेष्टिष्ट, तावद्भूम्यामुत्थितपदस्थापना-त्पूर्वमेव तस्य तत्क्षणपरिवर्तितं महेश्वरस्य प्रियरूपमवलोक्य जातसात्त्विकभावतया स्वेदबिन्दुभिः स्विन्नदेहा वेपमाना च सा, प्रवाहमार्गेऽकस्मात्समापतितपर्वतावरोध-व्याकुला सरिदिव, नाग्रतो गन्तुं नापि स्थातुं शशाक । पुरतो वर्तमानस्य शिवस्य समक्षमुद्धृतं पदमुद्वहन्त्याः लज्जित-पार्वत्याः, उत्तुंगशिखरैर्मार्गं रुद्धतस्य लम्बायमानस्य विशालपर्वतस्य, तद्व्यवधानजन्यावरोधेनाकुलितनद्याश्चेह बिम्बत्रय युगपदेव कविनानिरमायि । सत्यमेवोक्तं श्री बलदेव उपाध्यायेन– 'ये मानव-हृदय की विभिन्न परिस्थितियों में उदीयमान वृत्तियों का चित्रण लोकव्यवहार के साथ, पूर्ण सामंजस्य से करते हैं' । —सं० सा० का इतिहास, पृ० १७२ ।

उक्तेषु त्रिष्वप्युदाहरणेषु पात्राणां मनःस्थिते-रुद्घाटनमभूत् । मनसोऽरूप-भावना मूर्तोपमानयोजनयैवात्राधिकसंवेद्यास्संजाताः । प्रतिभावतो महाकवेः कौशलमिह 'शैलविषमशिला-अचल' पदसन्निवेशे साधु मुखरितमस्ति । यत्किंचित्परिवर्तनेन सह विविधमनोभावानुन्मीलयितुं प्रयुक्तेष्वेतेषु शब्देषु यत्रैकतो विविधता वरीवर्ति, तत्रैवापरतो नवीनतापि प्रस्फुरत्येव । उदाहरणत्रयेऽपि पृथक्त्वेन स्वतंत्रबिम्बसृष्टिरपि भवति ।

गच्छति पुरः शरीरं धावतिपश्चादसंस्थितं चेतः ।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य ॥

शा० १।२६

अत्रामूर्तचित्तस्य चाञ्चल्यं मूर्तंश्चीनांशुक एव सम्यगभिव्यक्तिमादधाति । स्थूलशरीरस्याकारसाम्यताप्यनु-पात्तकेतुदण्डेनानुमानगम्यास्ति । चीनांशुकशब्दस्तु राज्ञो मनस उत्कृष्टतामभिव्यंजयति अनुरूपाप्रस्तुतविधानमेवानुक्तमोपमालंकरणमिह चारितार्थ्यमुपैति । भाषायाश्चित्रधर्मत्वेन प्रतिवातप्रतिहतगतिकेतोश्चिमिहो-ज्जृम्भते ।

वृद्धव्यक्तबुद्धौ ह्रासो जायते एकस्मिन् क्षणे कस्यचिद्वस्तुनो ज्ञानस्य संस्कार उद्बुध्यते त्वपरास्मिन्नेव क्षणे लीयते एकतानताऽऽभावे स्थितेर्नैरन्तर्यमुच्छिद्यते। महाकविर्बुद्धेरिमामस्थिरतां रूपयितुं निर्वास्यमाणप्रदीपस्य शिखामुपमानरूपेणाचर्पीत्। तद्यथा—

क्षणात् प्रबोधमायाति लङ्घ्यते तमसा पुनः।
निर्वास्यतः प्रदीपस्य शिखेव जातो मतिः॥ शा० ५.२

अत्रोपमायाः सौन्दर्येण सह 'निर्वास्यमाणप्रदीपस्य चंचलशिखाया अचंचलो बिम्बश्चित्तं चमत्करोति। मतिरत्रोपमेयाऽऽमूर्तमेव। प्रदीपशिखोपमानन्तु मूर्तम्।

साम्प्रतं दृश्यतां दुःखात्मकामूर्तभावाभिव्यक्तौ महाकवेः कलाचातुरी। इन्दुमत्या मृत्योरनन्तरं कुलगुरोर्वशिष्ठस्य शान्तिवचो निशम्य, पुत्रदशरथस्याज्ञत्वात्, कथमिवाजो महाराजच्छोकसंविग्नमनसा निनाय कालस्याष्टसंवत्सराणि। किन्तु, इन्दुमतिवियोगजन्यशोकशङ्कुस्तद्धृदयं तथैव व्यदारयत्, यथा प्लक्षवृक्षस्य प्ररोहः कालान्तरे, शनैः स्वमूलानि दूरतो विस्तीर्य, उन्नतप्रासादतलं भिनत्ति। तद्यथा—

तस्य प्रसह्य हृदयं किल शोकशङ्कुः
प्लक्षप्ररोह इव सौधतलं बिभेद।
प्राणान्तहेतुमपि तं भिषजामसाध्यं
लाभं प्रियानुगमन त्वरया स मेने॥
रघु० ८।९३।

अमूर्तशोकशङ्कुः प्रस्तुतमत्र। तत्कृते मूर्तमप्रस्तुतं 'प्लक्षप्ररोह' इति। इह सन्दर्भानुकूला यथार्थता वर्तत अत एव संवेदनाया रमणीयाभिव्यंजनाऽभूत्। प्लक्षप्ररोहस्योपमानविधानं नितान्तमौचित्यसंमितमस्ति। अन्यथैतदतिरिक्तमन्यक्तिमुपमानपदमिन्दुमत्याः मृत्योरनु तद्दीर्घमन्तरालं, शोकप्रसरपरिपाकं तस्य शोकशङ्कोः तीव्रतमां प्रचण्डताञ्चाभिव्यंजितुं क्षमेत? अजस्य धीरताभिव्यंजने सौधतलमेव शक्यम्। अत्र परिव्याप्तजटासमूहस्योन्नतप्लक्षवृक्षस्य तत्समीपमेव भिन्नान्तस्तलस्याप्युच्चैरुत्थितसौधशृंगस्य च संश्लिष्टो बिम्बः।

अमूर्तप्रस्तुतायाममूर्तोपमानविधानम्—

बिम्बसर्जने दृश्यता मुख्यं वस्तु। तदभावे बिम्बसृष्टिर्न संभवति। अमू प्रस्तुतयोजनायां भाषायाश्चित्रधर्मस्यकृते नावकाशः। चित्रात्मकत्वाभावे कु बिम्बविधानम्? अत एव महाकवेः कालिदासस्य काव्येश्वमूर्ताप्रस्तुतविध प्रायेणाव्याल्पमेवोपलभ्यते। यतो महाकवेर्वैशिष्ट्यन्तूत्कृष्ट बिम्बरचनायामेव बिम्बविरहेपि उपमाया अनूपमो विलासस्तु विलसत्येव। तद्यथा—

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥ रघु० १।१

अत्र प्रस्तुतपार्वतीपरमेश्वरयोर्न किंचिद्वास्तविकं रूपं जगत्यां दरीदृश्यते अप्रस्तुतौ शब्दार्थावप्यमूर्त्तावेव। एवंविधयोपमया न किमपि चित्रं संसृज्यते कल्पनाचमत्कारस्त्वत्र शास्त्रीयज्ञानसंवलिते बुद्धिवैभवे आसक्तिमादत्ते।

एतदमूर्ताप्रस्तुतविधानदृष्ट्या भवभूतेरुत्तररामचरितमधिकसमृद्धमस्ति।

प्रसाद इव मूर्तस्ते स्पर्शः स्नेहार्द्रशीतलः।
अद्याप्यानन्दयति मां, त्वं पुनः क्वासि नन्दिनि॥ उ० ३।१४

अत्र प्रस्तुत-स्पर्शरूपामूर्तभावाय प्रसाद—अनुग्रहरूपामूर्तभाव एवोपमानत्वेन प्रयुक्तः। सीतया विहितो रामस्य स्पर्शः तस्मै मूर्तितः प्रसादो यथा प्रतीयते इत्थमेव १/३०, १/३५, २/२६ इत्यादिस्थलेपि उदाहरणान्युपलभ्यन्ते।

मूर्तप्रस्तुतायामूर्तोपमानविधानम्—

गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसन्धेः
कैलाशस्य त्रिदशवनितादर्पणस्यातिथिः स्याः।
शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं
राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः॥पू० मे० ५८

अलकापुरीं गन्तुकामाय मेघाय यक्षः कैलाशपर्वतस्य परिचयं ददाति तत्सन्दर्भे स कैलाशस्यातिशयश्वेतिमानं निर्मलतां वाभिव्यक्तमितुमिच्छति। अत स्वाभिप्रायसिद्धये सः तत्कृते क्रमेण 'दर्पणकुमुदेवदयोरप्रस्तुतयोजनां विदधाति परमेतेनापि तुष्टिमलभमानच्छिवस्य राशीभूताट्टहासस्योत्प्रेक्षां कुरुते।

अत्र कैलाशे मूर्तमुपमेयम्। अट्टहासस्त्वमूर्तोपमानम्। दृश्यताया अभावेपि कल्पनाप्रवणत्वेन सहृदयस्यबिम्बबोधच्छक्येत। परं तत्प्रतीतये भारतीयकवि समयसिद्धान्तस्याध्यात्मिकधारणायाः पौराणिकगाथादिकस्य च परिचयमावश्यक

प्रतिभाति । एतेन स्पष्टमेव यद्यत्र तत्र बिम्बावगमे संस्काराणां पार्थक्यं जटिलता-मुत्पादयति ।

तस्याः खुरन्यासपवित्रपांसु-
मपांसुलानां धुरि कीर्तनीया ।
मार्गं मनुष्येश्वरधर्मपत्नी
श्रुतेरिवार्थंस्मृतिरन्वगच्छत् ॥ रघु० २।१

अत्रोपमेयौ सुदक्षिणामार्गौ मूर्तौ स्तः । ताभ्यां क्रमेण प्रयुक्ते स्मृतिश्रुत्यर्थो-पमानेऽमूर्ते । एतादृश्वप्युपमानस्थलेषु सुस्पष्टमांसलबिम्बस्य सृष्टिर्न संभवति । मनुष्येश्वरधर्मपत्न्या सुदक्षिणया मार्गस्यानुसरणं यावदेव सहजबोधगम्यमस्ति, स्मृत्या श्रुत्यर्थस्यानुसरणं, शास्त्रीयज्ञानसापेक्ष्यत्वात्तावदेव दुर्बोधं प्रतीयते । अत , उपमाया उत्कृष्टतायां नास्ति मनागपि सन्देहावसरः, किन्तु बिम्बस्य काल्पनिक-सर्वग्राह्यतायां तु अस्त्येव संशयावकाशः ।

मूर्तप्रस्तुताय मूर्तोपमानविधानम्

मूर्तप्रस्तुताय मूर्ताप्रस्तुतविधानं प्रायेण बिम्बात्मकं भवति । ऐन्द्रियत्व-मिहार्दिकमुद्भासते । अत एव बिम्बनिर्मितिरप्यनायाससाध्या भवति । प्रयोऽत्र प्रस्तुताप्रस्तुते द्वे पि बिम्बनिर्माणे सामर्थ्यमु पेतः तद्यथा—

पुरस्कृता वर्त्मनि पार्थिवेन
प्रत्युद्गता पार्थिवधर्मपत्न्या ।
तदन्तरे सा विरराज धेनु-
र्दिनक्षपामध्यगतेव सन्ध्या ॥ रघु० २।२०

सायंकाले चारणोपरान्तं धेनुमग्रतः कृत्वा महाराजो दिलीप आश्रमं प्रति प्रतस्थे । इतो राज्ञी सुदक्षिणापि तत्प्रत्युद्गमनार्थं चचाल । मार्गे त्रयाणा सम्मेलने सुदक्षिणा दिलीपयोर्मध्ये धेनुस्तथैव शुशुभे, यथा दिनरात्र्योर्मध्ये सन्ध्या शोभते अत्रोपमेयं धेनुपदं मूर्तमस्ति । तदर्थं प्रयुक्तमुपमानं सन्ध्यापि मूर्तमेव । इत्थमेव दिनक्षपयोरप्युपमानयोजना क्रमेण दिलीप-सुदाक्षिणयोः कृते मूर्तमेव । गुणप्रभावसाम्यदृष्ट्या विहितोऽस्मिन्नुपमानविधानेऽनासमेवात्र सफलबिम्बस्य रमणीयाप्रतिच्छविस्सहजसंवेद्यास्ति । दिनपदं राज्ञस्तेजस्विता, कर्मठतां, एकात पत्रतां, परोपकारपरायणतादिगुणं व्यंजयति । 'क्षपा' सुदक्षिणायाः विश्राम-दायिसेवापरायणशान्तप्रकृतिमुद्बोधयति । सन्ध्यापदेनात्र कामधेनोः पावित्र्यं

सर्वोत्कृष्टत्वं, रक्ताभसौन्दर्यञ्चव्यन्यन्ते। महाकविरत्र प्रस्तुताप्रस्तुतयोरुभयो-र्लिङ्गसाम्येपि दत्तावधानोऽस्ति। अतः, अनुत्तमेयमुपमा। तथा, प्रकाशवता सूर्येण समन्वितदिनस्य, चन्द्रेण नक्षत्रैश्चालंकृताया रात्रेः, स्निग्धसिन्धुरायित-सन्ध्यायाश्च पवित्रं प्राकृतिकं बिम्बत्रयामिह युगपदेव सचेतसां चेतांस्याह्लादयति।

महाकविकालिदासस्यकाव्येषु प्रकृतिविषयकं बिम्बबाहुल्यमस्ति। प्रकृते, सन्दर्भानुरूपाप्रस्तुतचयनेन महाकवेः तद्विषयकोऽनुरागो व्यजते। यथाह श्रीबलदेव उपाध्यायः—"विम्ब-ग्रहण वहीं होता है, जहाँ कवि अपने सूक्ष्म निरीक्षण द्वारा वस्तुओं के अंग, प्रत्यंग, वर्ण, आकृति तथा उसके आस-पास की परि-स्थिति का परस्पर संश्लिष्ट वर्णन देता है। यह तभी संभव है, जब कवि के हृदय में प्रकृति के लिए सच्चा अनुराग हो।—

सं० सा० का इतिहास, छठवाँ संस्करण, पृ० १५४।

लेखकस्येमामुक्तिं प्रस्तुतोयं श्लोकोऽपि पुष्णाति—

तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलां

न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन्।

या वः काले वहति सलिलोद्गारमुच्चैर्विमाना

मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् ॥ पू० मे० ६३।

अत्र, अलका-कैलाश-गङ्गाव-अभ्र-सलिलेति मूर्तपदपञ्चकं प्रस्तुतम्। तदर्थं क्रमशः, कामिनी-प्रणयी-दुकूल-अलक-मुक्ताजलेति मूर्ताप्रस्तुतपदयोजना। अत, विधूतोद्गिरच्छजप्रवाहमेधकदम्बकस्योन्नतसौधशृंगान्वितालकावस्थानस्य गंङ्गा-प्रभवस्य कैलाशस्यैको बिम्बः, स्रस्तशुभ्रवस्त्राया मौलिकसरग्रथितकेशविन्यासाया प्रियोत्सङ्गस्थिताया रमण्याश्चापरो बिम्बः, द्वयोः संश्लिष्टात्मको बिम्बश्चेति। अलकामुपवर्णयन्निह कविस्तत्पार्श्वपरिस्थितिमपि संश्लिष्टत्वेनोपनिबध्नाति। अत एव तस्या मानसी छविः पूर्णरूपेण चित्रात्मकतामाकलयति।

तपोवनकन्यका पतिगृहं याति। अतस्तत्तपोवनपरित्यागकातराद्य न केवलं शकुन्तलैवापितु तया वियुक्तस्य तत्तपोवनस्यापि कीदृशी दशा? यत्राचेतना अपि सचेतना इव व्यथामनुभवन्ति, किमुत चेतनाः? समस्तं तपोवनमेव वियुक्तमिव प्रतिभाति। वियुक्ता हरिणी कुशग्रासमप्युद्गिरति, नृत्यं परित्यज्य विमनायमानेव तिष्ठति मयूरी, लताश्चाश्रूणीव पाण्डुपत्राणि पातयन्ति। तद्यथा—

उद्गीर्णदर्भकवला मृगी परित्यक्तनर्तना मयूरी।

अपसृतपाण्डुपत्रा मुञ्चन्ति अश्रु इव लताः॥ शा० ४।१४

उपमानरूपेण प्रयुक्तमश्रु इति पदमिहमूर्तम्। उपमेयं पाण्डुपत्रन्तुमूर्तमेव। इह वातेरितानां पाण्डुपत्रपातिनीनां लतानां खण्डितो विम्बः। एतदतिरिक्त प्रकृतेः स्वतन्त्रवर्णने शोकोद्विग्नमृगमयूर्योविम्बद्वयमपि शकुन्तलाविरहजन्यदुःखातिशयनिमग्नस्य सर्वस्यापि तदाश्रमपदस्य चित्रमातनोति। त्रय एवात्र खण्डित विम्बाः पृथक्त्वेन्, समेत्य वा कवेः प्रयोजनं साधयन्ति।

कालिदासीयकाव्येषु प्रायः प्रकृतेर्वर्णनं पात्राणां मनःस्थित्यनुसारं, कथानकस्य मानवीयपरिस्थित्यनुकूलं भावसामञ्जस्यानुरूपञ्च कृतमुपलभ्यते। यादृशं वस्तुनो घटनाचक्रं वातावरणं वा तादृशमेव प्रकृते रूपमपि दृश्यते। कथानकस्य भावानुरूप-वातावरण-निर्माणेऽनुपमोयं महाकविः। अत एवात्र दुःखात्मकपरिस्थितौ प्रकृतिरप्युन्मनायते।

भाविघटनार्थसाधनपरं बिम्बात्मकं स्वतन्त्रप्रकृतिचित्रणमपि दृश्यतानेस्मिन्नेव प्रसङ्गे—

यात्येकतोऽस्तशिखरं पतिरोषधीनाम्

आविष्कृतोऽरुणपुरःसर एकतोऽर्कः।

तेजोद्वयस्य युगपद् व्यसनोदयाभ्यां

लोको नियम्यत इवैष दशान्तरेषु॥ शा॥ ४।२

चन्द्राकौमूर्तप्रस्ताविह। मूर्तो लोकश्चाप्रस्तुतः। प्रभातवर्णनापदेशाच्चन्द्रस्यास्ताचलगमनेनार्कस्योदयवर्णनेन चेश्वरीयविधानंसूचितम्। ह्रासोल्लासौ, क्षयोदयौ, विपत्सम्पदौ वा न कस्यापि व्यवस्थितविषयौस्तः। 'कस्यात्यन्त सुखमुपनतं दुःखमेकान्ततो वा, नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण' इत्यपादमेवोद्घोषयति। अतः प्रकृतिपरवशा शकुन्तलापि पतिप्रत्याख्यानकातरा सती विपदुदधिदशाविपर्यये पतितेति कवेर्लक्ष्यम्। सर्व एव प्रतिभावन्तो महाकवय एवमेव भाविघटनार्थव्यंजकं बिम्बसर्जनं प्रकृतेरेव कुर्वते। तुलनात्मकाध्ययनधिया विचार्यतामिह शैक्यसपियरमहाकवेरपि प्रकृतिकोऽयं विम्बः—

"Light thickens and the crow
Makes wing to the rockey wood
Good things of day begin to drop and drowse"

मैकबैथ

अर्थात् **ज्योतिर्मलीमसतामादधाति**

काकाश्च यान्ति त्वरितं स्वकुलायदिक्षु

सर्वं दिनस्य सुभगं मलतामुपैति ।'

डंकननामकपात्रस्य बधात्पूर्वं कृतमिदं प्रकृतेर्वर्णनं भाविबधरूपमनर्थं सूचयति । तज्जघन्यकुकृत्यात् प्रागेव प्रकृतिर्म्लायमाना दृश्यते । आलोचको रेनेवेलेकमहोदयो बिम्बमिमं व्याकुर्वाणो निर्दिशति—'In these last lines, Shakespeare gives us a "metaphorical setting for crime.'—पृ० २०६, 'theory of literature.'

उपर्युक्त विवेचनेन सुतरां स्पष्टमिदं यत् क्वचिदुपमालंकारेण सह बिम्बस्य मनोहारिणी छटा क्वच्चिोपमालंकारमात्रमेव काव्यमलङ्कुरुते । सम्प्रत्युपमाविरहेपि बिम्बस्य स्थितिरवेक्षणीया—

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः

पश्चार्द्धेन प्रविष्टः शरपतनभयान्भूयसा पूर्वकायम् ।

शष्पैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्मा

पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ।। शा० १।७

कविरत्रशरसंपातभीत्या कामं पलायमानं मृगमुपवर्णयति । स्वभावोक्ताविहोच्चैरुत्प्लुत्योत्प्लुत्याशु प्लवमानस्य मध्ये-मध्ये पश्चात्परावृत्य रथमन्वीक्षमाणस्य च भीतमृगस्यैको बिम्बः, उद्घातभूमौ स्खलितगतेः मृगानुधाविनो रथस्यापरो बिम्बः, धावतो मृगस्य श्रमविवृतमुखात् पतितार्द्धावलीढैस्तृणसमूहैराकीर्णमार्गस्य च तृतीयो बिम्ब एकसार्द्धमेव पठतां शृण्वतां च काव्यास्वादनपराणां हृदयवतां चित्तेपूत्पद्यन्ते । कस्यचिदपि वस्तुनो याथा-तथ्यवर्णनकलायामभूतपूर्वोयं महाकविः । कथ्यं वस्तु सम्यक् प्रकाशयितुं बिम्बविधानमाश्रयते । अत एवास्य काव्यमधिकं-सम्प्रेषणीयमस्ति । यथाह पं० रामदहिनमिश्रः—

'कविता तब हमें अधिक भाव-प्रवण कर देती है, जबकि वह स्वाभाविक रूपों और व्यापारों की योजना करती है, वर्णनीय विषय को गोचर रूप मे लाने के लिए पूर्ण चित्र खड़ा कर देती है'—

—काव्य मे अप्रस्तुत-योजना, पृ० ५२ ।

उपर्युक्तोदाहरणैरिदं स्पष्टमेव जातं यन्महाकवेः कालिदासस्योपमानानि न केवलं बाह्याकारगतसाम्याश्रितानि अपितु तेषु प्रभावसाम्यतापि वरीवर्ति। रम्यता–औचित्य–यथार्थता–पूर्णतादयस्तु तेषां मुख्यं वैशिष्ट्यम्। एतदतिरिक्तं तस्याप्रस्तुतेषु कल्पनायाः विशालत्वमपि प्रभूतेनोपलभ्यते। तद्यथा—

उदयगूढशशाङ्कमरीचिभिः—
स्तमसि दूरतरं प्रतिसारिते।
अलकसंयमनादिव लोचने
हरति मे हरिवाहनदिङ्मुखम्॥ वि० ।३।६।

चन्द्रबिम्बं पूर्णतो बहिर्न निर्गतमस्ति। तदुदयगूढमिन्दुमण्डलमेव पूर्वदिग्वध्वाः भास्वरमुखमिवोत्प्रेक्षितम्। अन्धकार समूह एव तस्या कुन्तलभरः। गूढेन्दुकरनिकरैस्तिमिरापसरणन्तु तस्या अलकसंयमनम्। अतः शनैः शनैः अन्धकारराशिं विनाशयता उदीयमान चन्द्रेण प्रकाशितायाः पूर्वदिशो बिम्बः, अलकसंयमनेन सज्जितायाः दीप्ताननायाः रमण्या बिम्बश्चेह युगपत् प्रस्फुरतः। अनुभवसिद्धमिदं यत् विराटकल्पनाश्रितसाम्यविधानानुरूपमेव हृत्स्वपि विराट्भावना अभ्युदेति। महाकवेः कालिदासस्यान्तर्दृष्टिः निखिलचराचरमध्यस्थसूक्ष्मसम्बन्धसूत्राणि आकलयितुं पूर्णसमर्था आसीत्। तस्य दिव्यकल्पना स्वविराडौपम्ययोजनया मानव-प्रकृत्योर्मध्ये मधुरसम्बन्धस्थापने अद्वितीयेव प्रतिभाति। सुष्ठु भाषते आचार्यो रामचन्द्रशुक्लः—"साम्य का आरोप भी निस्सन्देह एक बडा विशाल सिद्धान्त काव्य मे लेकर चला है। वह जगत् के अनन्तरूपो या व्यापारों के बीच फैले हुए उन मोटे-महीन सम्बन्ध-सूत्रों की झलक-सी दिखाकर नीरसता के सूनेपन का भाव दूर करता है, अखिल सत्ता के एकत्व की आनन्दमयी भावना जगाकर हमारे हृदय का बन्धन खोल देता है।"

कार्यमिदं कतिपयसमर्थविराट्कल्पनावद्भिरेव कविभिः शक्यसम्पाद्यम्। कविर्माघ इममेव चन्द्रोदयविषयमन्यथैवोपस्थापयति—

विशदप्रभापरिगतं विबभावुदयाचलव्यवहितेन्दुवपुः।
मुखमप्रकाशदशनं शनकैः सविलासहासमिव शक्रदिशः॥
—शिशु० ९।२६

अत्र 'विशदप्रभापरिगतम्' अपि पूर्वदिशः स्मितमिन्द्वाननं विगतप्रभमिव प्रतीयते। किन्तु तत्र उदयगूढम्' अपि शशाङ्कमुखं सद्य एव प्रमातॄणामन्तराह्लादयति। क्व 'हरिवाहनदिङ्मुखस्य अलकसंयमनं' क्व च 'शक्रदिशः अप्रकाशदशनं सविलासहासम्'? महाकवेः प्रतिभा-वैलक्षण्यमत्र विदग्धैस्सुतरां निर्ग्राह्यमस्ति।

कालिदासस्य काव्येषु न केवलमुपमान-वैविध्यमपितु नूतनोपमानबाहुल्यमपि विद्यते । अद्यतनाः कवयस्समालोचकाः वा प्रायः इदमाक्षिपन्ति यत्परम्पराप्रयुक्तेषूपमानेषु प्रभविष्णुता नावशिष्यते । अनयैव भावनया प्रेरिताः आधुनिक-हिन्दी-कवयः नवीनोपमानप्रयोगस्यार्थेऽग्रामपरिचिताप्रस्तुतविधाने कृतप्रयत्ना दृश्यन्ते । एतेन न केवलं काव्यचारुताहानिः, सहजबोधगम्यताऽभावोपि भवति । प्रवृत्तिरेषा कालिदासोत्तरसंस्कृत-काव्येष्वपि परिलक्ष्यते । नवप्रयोगलोभी श्रीहर्षस्तु उपमेयं 'तारागणम्' पक्वदाडिमफलस्य निष्ठ्यूतबीजमिव (२२।१४ नैष०), घुणव्रजद्वारमिव (२२।२५ नैष०) अस्थिभूषामिव (२२।१२६ नैष०) चोत्प्रेक्षते ।

कालिदासोत्तरसंस्कृतकवीनां कल्पना सादृश्य-सुनियोजने औचित्यमार्गमुपेक्षमाणेव दृश्यते । अतोऽमीषां भावोपकारविरहे, सन्दर्भाऽसंस्पृष्टे, अयथार्थोपमानविधाने न तादृशी निसर्गरम्यता न वा संवेदनशीलबिम्बशिल्पनमेवोपलभ्यते । भवतु नाम बुद्धि-वैभव-विलासो हृदयतोषस्तु दुर्लभ एव । किन्तु कविकुलगुरोर्नूतनोपमानविधानन्तु 'क्षणे-क्षणे यन्नवतामुपैति' इत्युक्ति चरितार्थयति ।

तद्यथा—

एषा मनो मे प्रसभं शरीरात् ।
पितुः पदं मध्यममुत्पतन्ती ।
सुराङ्गना कर्षति खण्डिताग्रात्
सूत्रं मृणालादिव राजहंसी ॥ वि० १।१८ ॥

उर्वशी स्वर्गं प्रत्युत्पतति । पुरुरवसो मनस्तु तस्यामासक्तमस्ति । अतस्तच्छरीरान्मन उद्धृत्येव गगने उत्पततीति प्रस्तुतं व्याकर्तुं राजहंस्या खण्डितमृणालात् विसकर्षणमित्यप्रस्तुतमायोजितम् । 'खण्डित' पदेनात्र वियोग स्यासह्यत्वं मनोहरत्वामनसो बलान्नयनं वा, 'सूत्र' मित्यनेनच पुरुरवसो मनस उच्चत्वं सूक्ष्मत्वानपाविश्र्यादिकं वा 'राजहंसीति' पदेन च उर्वश्याः सामान्याङ्गनापेक्षयोत्कृष्टत्वमपि ध्वन्यते । इत्थमेतत्त्रितयोपमानयोजनेनेह 'खण्डितमृणालात् सूत्रमाकृष्योत्पतन्त्या कस्याश्चिद्राजहंस्या रमणीयस्सुबोधश्च बिम्बः' कस्य मनो नाह्लादयेत् ?

एवमुपर्युक्तकतिपयोदाहरणैः कालिदासस्य बिम्बोपमयोश्च न केवलं वैशिष्ट्य सिद्ध्यति, अपितु तस्य महाकवेः कल्पना-सामर्थ्यमपि अनुमीयते ।

—:*:—

प्राध्यापकानां प्रकाशिताः कृतयः

डा० रामजी उपाध्यायेन विरचिताः सम्पादिताश्च कृतयः

१. प्राचीन भारतीय साहित्य की सांस्कृतिक भूमिका

२. भारतस्य सांस्कृतिकनिधिः

३. द्वासुपर्णा (संस्कृतोपन्यासः)

४. संस्कृत-साहित्य का आलोचलनात्मक इतिहास

५. Sanskrit and Prakrit Maha kauyas

६. धन्मपदं

७. आधुनिक-संस्कृतसाहित्यानुशीलनम्

८. संस्कृतनिबन्धावली

९. सागरिका त्रैमासिकी शोधपत्रिका (वर्ष १ से १०)

डा० वनमाला भवालकर विरचिताः

१०. महाभारत में नारी

११. पाददण्डम् (संस्कृतरूपकम्)

१२. रामवनगमनम् (संस्कृत-संगीतिका)

१३. पार्वतीपरमेश्वरीयम्

विभागे समापन्नाः शोधप्रबन्धाः

डी० लिट् उपाधेः

निबन्ध विषयः	शोधकर्ता
१. प्राचीन भारतीय साहित्य की सांस्कृतिक भूमिका	डा० रामजी उपाध्याय

पी० एच् डी० उपाधेः

२. रामायण का एक अध्ययन	डा० अँलेय कराडिकर
३. जैन अङ्गशास्त्र के अनुसार मानवव्यक्तित्व का विकास	डा० हरीन्द्र भूषण जैन
४. गुप्त कालीन नाटकों के नारी पात्रों का अध्ययन	डा० कृष्णा सिन्हा
५. पतंजलि कालीन भारत	डा० प्रभुदयाल अग्निहोत्री

निबन्ध विषय: शोधकर्ता

६. ऋग्वैदिक आचार डा० विष्णुदेव शर्मा

७ महाभारत में नारी डा० वनमाला भवालकर

८. श्री हर्ष के नाटकों का आचलोनात्मक अध्ययन डा० गोकुल प्रसाद त्रिपाठी

९. उत्सवों का आध्ययन डा० पद्मा भार्गव

१०. महाभारत में शिक्षण-पद्धति डा० इन्द्रजीत उप्पल

११. महाभारतीय शिष्टाचार डा० प्रेमदत्त पंचोली

१२. महाभारतीय धार्मिक प्रवृत्तियाँ डा० शशिबाला श्रीवास्तव

१३. आचाराङ्ग सूत्र का समीक्षात्मक अध्ययन डा० परमेष्ठीदास जैन

१४. पण्डिता क्षमाराव एक अध्ययन डा० कृष्णकान्त शर्मा

१५. महाभारत में लोककल्याण की राजकीय योजनाएँ डा० कमलेश्वरनाथ मिश्र

१६. कथासरित्सागर में सांस्कृतिक प्रवृत्तियाँ—ओमप्रकाश हर्ष

१७. बीसवीं शती में संस्कृत-पत्रकारिता का विकास–डा० रामगोपाल

१८. श्री महेशचन्द्र तर्कचूडामणि—एक अध्ययन–डा० जगदीशप्रसाद

१९. रामावतारशर्मा—एक अनुशीलन—डा० अच्युतानन्द झा

२०. बीसवीं शताब्दी में मध्यप्रदेश में संस्कृताध्ययन का विकास डा० कन्हैयालाल द्विवेदी

२१. सायण भाष्य तथा ऋग्वेद के द्वितीय मण्डल के विभिन्न मन्त्र आलोचनात्मक तथा तुलनात्मक अध्ययन—डा० सिद्धनाथ शुक्ल

२२. पारिजातहरण कथा का विकास—डा० गौतमप्रसाद मिश्र

२३. वैष्णव पुराणों में आचार समीक्षा—डा० प्रेमनारायण द्विवेदी

२४. अप्पाशास्त्री राशिवडेकर-व्यक्तित्व और कृतित्व–डा० हीरालाल

२५. अमरकोष में भारतीय संस्कृति—डा० गोमतीप्रसाद शुक्ल

२६. संस्कृत में टीकासाहित्य का विकास—डा० कृष्णहरि शर्मा

२७. महालिंग शास्त्री—व्यक्तित्व और कृतित्व—डा० सुदर्शन त्रिपाठी

२८. स्वातन्त्र्योत्तरकाल में संस्कृत साहित्य का विकास—डा० नि उपाध्याय

२९. प्रमुख उपनिषदों में सांस्कृतिक प्रवृत्तियाँ—डा० साधना गुप्त

निबन्धः विषय	शोधकर्ता
३०. सत्रहवीं शती में संस्कृत रूपकों का विकास	डा० शङ्करलाल स्वर्णकार
३१. उन्नीसवी शती में संस्कृत रूपकों का विकास	डा० शिवदर्शन तिवारी
३२. आचार्य मेधाव्रत शास्त्री—व्यक्तित्व और कृतित्व	डा० मायापरमहंस
३३. संस्कृतसाहित्य में गान्धीवाद का प्रभाव	डा० रामप्रसाद वाजपेयी
३४. श्रीमद्भागवत–सांस्कृतिक अध्ययन	डा० किशोरी शरण
३५. यतीन्द्र विमल चौधुरी–व्यक्तित्व तथा कृतित्व	डा० मनोरमा

लेखानुक्रमणिका

प्रथमवर्षतो दशमवर्षपर्यन्तम्

प्रथमं वर्षम्—अङ्कः प्रथमः

निबन्धः	लेखकः
सरस्वती	कुमारी शशिबाला श्री वास्तवः
नवावतारिका	तेलकपल्ले विश्वनाथ शर्मा
महाभारतीय तीर्थयात्रा विश्लेषणम्	कु० अर्चना वसुः
नाटकीयं वृत्तप्रपञ्चनम्	डा० विश्वनाथ भट्टाचार्यः
सद्गुरुतववनम्	डा० वनमाला भवालकरः
संस्कृतपत्रकारिता	श्री रामगोपाल मिश्रः
द्वितीयाङ्कः	
पद्मावती	डा० वासुदेव विष्णु मिराशी
भारतं तद्विराजताम्	डा० मंगलदेव शास्त्री
अग्निसंहिता	श्री जगन्नाथ वेदालङ्कार
काव्ये रसपर्याप्तिविमर्शः	डा० राममूर्ति त्रिपाठी
सुरापः	श्री मञ्जुल मयंकपन्तुलः
पाणिनीयस्य सुबोधता	श्री के० राजन्न शास्त्री
आर्यसमाजस्य संस्कृतसाहित्यकाराः	श्री विश्वनाथ शास्त्री
वसन्तवर्णनम्	स्व० म० म० रामावतार शर्मा
विज्ञानवादे प्रत्ययनिर्वाहः	डा० व्रतीन्द्रकुमार सेनगुप्तः
मल्लिनाथानुवीक्षा	श्री रेवाप्रसाद द्विवेदी
उपनिषदां संस्कृत-समीक्षणम्	कु० साधना गुप्तः
संस्कृतवृत्तम्	डा० विश्वनाभट्टाचार्यः
म० म० स्व० रामावतार शर्मा	श्री अच्युतानन्द झाः
संस्कृत-प्रकाशनम्	श्री भोजराजम्
तृतीयाङ्कः	
बौद्धेषु प्रमात्वविमर्शः	श्री जगन्नाथ उपाध्यायः
कालिदासस्य संगीतकलाकृतित्वम्	श० श्री परांजपे
संस्कृतपत्रकारिता	श्री रामगोपाल मिश्रः
कतमः स्विदेव सः	जगन्नाथ वेदालङ्कारः
महाभारतीया आत्मगुणाः	कु० शशिबाला श्रीवास्तवः
संस्कृतसाहित्ये पारिजातहरणकथा	श्री गौतमप्रसाद मिश्रः
रामावतारशर्मणां समाजोद्बोधनम्	श्री अच्युतानन्द झाः
पाददण्डः	डा० वनमालाभवालकरः

निबन्धः	लेखकः
भारतीयसंस्कृतेर्वैशिष्ट्यानि	डा० रामजी उपाध्यायः
कर्णपूरस्याप्रस्तुतविधानपाटवम्	श्री गौतमप्रसादमिश्रः
सप्तदशशतकस्य रूपकत्रयम्	श्री शंकरलालः स्वर्णकारः
अष्टादशशतकस्य त्रयो भाणाः	श्री बिहारीलालः नागार्चः
ऊनविंशशतकस्य नाटकत्रयम्	श्री शिवदर्शन तिवारी
विंशशताब्द्याः नाटकेषु राष्ट्रजागरणम्	श्री गुलाबचन्द्र जैनः
वसन्तवर्णनम्	पुल्लेल श्री रामचन्द्रुडुः
काव्येष्वलङ्कारः	श्री भूपतिभट्टः
चतुर्थाङ्कः	
प्राच्ययूरोपीयविश्वविद्यालयेषु संस्कृताध्ययनम्	डा० रसिकबिहारी जोशी
कालिदाससमयनिर्णयः	म० म० डा० वा० वि० मिराशी
तिलकमञ्जरीकारो महाकविर्धनपालः	डा० हरीन्द्रभूषण जैनः
संस्कृतपत्रकारिता	डा० रामगोपालमिश्रः
महाभारतयुद्धे नारी	डा० श्रीमती वनमाला भवालकरः
नाट्यस्वरूपपरामर्शः	डा० विश्वनाथ भट्टाचार्यः
पार्वतीतपोरहस्यम्	श्री रेवाप्रसाद द्विवेदी
वर्षं चतुर्थम्—अङ्कः प्रथमः	
सप्तदशशतकस्य कतिपयरूपकाणि	श्री शंकरआलः स्वर्णकारः
असमदेशीयं रूपकत्रयम्	पं० बिहारीलालो नाचार्चः
उनविंशशतकस्य रूपकत्रयम्	पं० शिवदर्शन तिवारी
विंशशताब्द्याः पौराणिकनाटकानि	श्री गुलावचन्द्रो जैनः
पुराणमित्येव न साधु सर्वम्	पुल्लेल श्रीरामचन्द्रुडुः
अमेरिकादेशे भारतीय-विद्याभ्यासः	जे० ए० बी० वन् बुइटेनेन
संस्कृतप्राणाः कालीप्रसादशास्त्री	पडाल ब्रह्मरेड्डि
अङ्कः द्वितीयः	
मेघदूते देवगिरिः	डा० वा० वि० मिराशी
अन्यापदेशकाव्यानि महिषशतकं च	पुल्लेल श्रीरामचन्द्रुडुः
कालिदास-भारती	डा० रेवाप्रसाद द्विवेदी
भक्तिः	आचार्यः शिवचन्द्रो भट्टाचार्यः

निबन्धः	लेखक
कालिदास भारती	डा० रेवाप्रसाद द्विवेदी
अलङ्कारप्राधान्यवादिनां ध्वनिविरोधस्तत्खण्डनञ्च	डा० रविशंकर नागरः
स्वातन्त्र्योत्तरकाले संस्कृतसाहित्यम्	श्रीमती निर्मलोपाध्यायः
धर्मविजय-नाटकम्	शंकरलालस्वर्णकारः
अष्टादशशतकस्य प्रहसनद्वयम्	बिहारीलालनागार्चः
ऊनविंशशतकस्य गीतकाव्यम्	कु० कृष्णा खरे
गीतकाव्यम्-कण्ठकाञ्जलिः	कु० माया तिवारी
द्वितीयाङ्कः	
राजशेखरस्यावन्तिप्राकृतम्	डा० भास्कराचार्यत्रिपाठी
व्यञ्जनायाः स्वरूपं विकासश्च	डा रविशंकर नागरः
कविकलानिधिः श्रीकृष्णभट्टः तस्य सुन्दरीस्तवराजश्च	डा० प्रभाकर शास्त्री
आदर्शदम्पती उपन्यासिका	पुष्करदत्त शर्मा
ऊनविंशशताब्द्या एकाङ्करूपकाणि	शिवदर्शन तिवारी
मेलनतीर्थ-भारतम्	कु० मनोरमा सक्सेना
भारतीयसंस्कृतिदर्शनम्	डा० रामजी उपाध्यायः
तृतीयाङ्कः	
कालिदास भारती	डा० रेवाप्रसाद द्विवेदी
अष्टादशशतकस्य तिस्रो वीथ्यः	बिहारीलालनागार्च
ऊनविंशशतकस्य रूपकाष्टकम्	शिवदर्शन तिवारी
रणेन्द्रनाथगुप्तस्य हरिश्चन्द्रचरितम्	गुलाबचन्द्र जैनः
अमरमीरम्	कु० मनोरमा सक्सेना
राजवैद्य श्रीकृष्णरामभट्टः तस्य कृतयश्च	डा० प्रभाकर शास्त्री
वसुमती चित्रसेनीयम्	शंकरलाल स्वर्णकारः
जागरणम्	श्रीमती माया पाठकः
कामस्य रसरूपेण प्रथमः समुल्लासः	रमाशंकर जैतली
तैत्तिरीयसंहिता ५।६।१।१-२ मन्त्रस्य विनियोगः	डा० कृष्णलालः